२३. म.य.वि. पृ. ९-१०

२४. धर्मसंग्रहे अत्र पृथ्वी इति पाठः किन्तु भाष्यकारः नागः इति लिखति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सितकमलोपरि कुङ्कुमगन्धमण्डलके चिन्तयेद्देवं भाष्करं तापसरूपधरं भुजाभ्यां शितकमलधरं रक्तवर्णं सहस्रसूर्य्यकोटिसमतेजोमालिनं विग्रहं-अस्य देयं क्षीरभोजनं कुन्दुरूधूपं ।

रक्तकमलोपरि प्रियङ्गुगन्धमण्डलके सोमो ब्राह्मण-इति ज्ञेयं-शितवर्णं-जटामुकुटधरं भुजद्वयेना-क्षसूत्रकमण्डलुधरं - कुमुदपुष्पावसक्तं भोजनघृतोदनं श्रीवासधूपः ।[२५]

अवशिष्टयोः नागासुरयोः विवरणं अभिधीयते यथा दुर्गतिपरिशोधनमण्डले —

असुराश्च नानावर्णाः सकवचाः खड्गधराः स-भूतमृद्वासना नागाश्च समणिफणाः सभार्याः साञ्जलयः।[२६]

द्रष्टव्यम्ः अष्टलोकपालेषु वरुणनागराज्ञो विवरणमपि ।

११. दश क्रोधाः । तद्यथा–यमान्तकः, प्रज्ञान्तकः, पद्मान्तकः, विघ्नान्तकः, अचलः, टर्किराजः, नीलदण्डः, महाबलः, उष्णीषचक्रवर्तीः, सुम्भराजश्चेति ॥

---

२५. स.पु. पृ. ३७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दशक्रोधाः तारासमाधौ यथा प्रतिपादिता इह समुपस्थाप्यन्ते —

यमान्तकः कृष्णः कृष्णसितरक्तवक्त्रो वज्रमुद्गलचक्रवज्रपाणि हृदि सपाशतर्जनी घण्ठापरशुन् बिभ्राणः ।

प्रज्ञान्तकः श्वेतः सितकृष्णरक्तवदनो वज्रवज्राङ्कितसितदण्डखड्ग हृदि सपाशतर्जनी घण्ठापरशुभृत् ।

पद्मान्तको रक्त कृष्णसितास्यो रक्तपद्मखड्गमुशल घण्ठापरशुपाशधरः ।

विघ्नान्तको नील नीलसितरक्तास्यो विश्ववज्रचक्रमुशलसपाशतर्जनीघण्ठापरशुधरः ।

अचलो नील नीलसितरक्तमुखः खड्गवज्रचक्रतर्जनीपरशुपाशधरः ।

टक्किराजो नील नीलसितरक्तमुखः पाणिभ्यां वज्रहुंकारमुद्रामपरैर्वज्रखड्गपाशाङ्कुशान् बिभ्राण ।

नीलदण्डः कृष्णः कृष्णसितरक्तवक्त्रो वज्राङ्कनीलदण्डखड्गचक्र हृदि सपाशतर्जनीपद्मपरशुधरः।

---

२६. नि.यो. पृ. ७०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

महाबल कृष्णः कृष्णशुक्लरक्तवदनो वज्राङ्कदण्ड खड्गचक्र हृदि सपाशतर्जनीपद्मपरशुधरः।

उष्णीषचक्रवर्ती कृष्णः कृष्णसितरक्तास्यः प्रधान-भुजाभ्यामुष्णीष मूर्ध्नि धारयेत् शेषैर्वज्रपद्मतर्जनीखड्गान्। प्रसृतसमोत्तान पाणिरनामिकानखयो रूपर्यऽङ्गुष्ठ नखौ धारयेत् कनिष्ठ सूचि । तथैव मध्यमे समनखशिखे संसक्त प्रदेशिन्यौ मध्यसुच्या करेणेति समन्तावभा-सानामोष्णीष मुद्रा क्वचित् । क्वचित्तु अन्यथा ।

शुम्भराजः कृष्णः कृष्णसितरक्तानन वज्रचक्ररत्न हृदि सपाशतर्जनीपद्मखड्गधरः ।[२७]

१२.अष्टौ बोधिसत्त्वाः । तद्यथाः – मैत्रेयः, गगनगञ्जः, समन्तभद्रः, वज्रपाणिः, मञ्जुश्रीः, सर्वनिवरणविष्कम्भी, क्षितिगर्भः, खगर्भश्चेति ॥

तेषां बोधिसत्त्वानां स्वरूपं लोकेश्वरसमाधौ निरुक्तमिह समुपस्थाप्यते —

मैत्रेयः पीतवर्णो नागपुष्पवरप्रदः ।
गगनगञ्जो रक्तवर्णः नीलोत्पलवरप्रदः।
समन्तभद्रः पीताभो रक्तोत्पलवरप्रदः ।
वज्रपाणिः शुक्लाभो वज्रहस्तौ वरप्रदः ।

---

२७. ता.पू.वि. पृ. १७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मञ्जुघोषः कनकाभः खड्गपुस्तकधारकः।
सर्वनीवरणविष्कम्भी क्षारवर्णः रत्नोत्तमवरप्रदः।
क्षितिगर्भो श्यामवर्णः कलशं वामे तथा ।
खगर्भो श्यामाभो चिन्तामणिवरप्रद ।[२८]

१३. षडयोगिन्यः । तद्यथा–वज्रवाराही, यामिनी, मोहिनी, संचारणी, संत्रासनी, चण्डिका चेति ॥

षडयोगिनीनां स्वरुपाणि प्रकाशयति वज्रवाराही- समाधौ यथा –

वज्रवाराही रक्तवर्णा त्रिमुखा मूलमुख रक्ता वामे श्यामा दक्षिणे पीता प्रतिमुख त्रिनेत्रा पञ्चमुद्रा विभूषिणी षड्भुजां प्रथमभुजाभ्यां कर्त्तिकपालखट्वाङ्ग द्वितीयाभ्यां नृमुण्डपाशं तृतीयाभ्यां डमरु घण्ठासार्द्धनरशिरोमालाधारिणीमालीढासनसंस्थितां ।

यामिन्या मोहिनी संत्रासनी संचारणी हुँ हुँ फट् चण्डिका नीलशुक्लरक्तपीतश्यामधूम्रवर्णा एकमुखा चतुर्भुजा प्रथमभुजाभ्यां कर्त्तिकपालं, द्वितीयाभ्यां डमरुखट्वाङ्गं पञ्चमुद्राविभूषिणी सार्द्धनरशिरोमालाधा-

---

२८. आ.अ.स. पृ. १७–१८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रिणी रक्तवर्तुलत्रिनेत्रा मुक्तकेशा पञ्चकपालकृतशेषरां आलीढासनसंस्थिता ।[२९]

षड्योगिनीनां निर्दिष्टचक्रस्थानं विशुद्धिं च आह ज्ञानोदयतन्त्रे यथा -

शिखास्थाने ललाटे च कण्ठे हृदयनाभितः ।
लिङ्गेषू त्रिदलं पद्मं चतुःषष्टचष्टषोडशम् ॥
द्वात्रिंशं चतुर्दलं चैव बोधिबीजेन शोभितम् ।
व्यञ्जनं च स्वरं तेषां मातृकास्वरव्यञ्जनम् ॥[३०]

१४. सप्तविधा अनुत्तरपूजा । तद्यथा- वन्दना, पूजनां, पापदेशना, अनुमोदना, अध्येषणा, बोधिचित्तोत्पादः, परिणामना चेति॥

किं नाम सप्तविधानुत्तरपूजा? तत्पूजाविधिं अभिधीयते यथा साधनमालायाम् —

...स्वहृद्बीजरश्मिभिरेव निर्गतसमस्ताकाशदेशव्यापि गुरुबुद्धबोधिसत्त्वान् स्फुरणसंहरणाकारेण जगदर्थक्रिया-करुणैकपरान् दृष्ट्वा स्वहृद्बीजकिरणैरेव दिव्यगन्धपुष्प-प्रकरादिकं निश्चार्य्य मण्डलपूर्व्वकं कृताञ्जलिना गुरु-बुद्धबोधिसत्त्वचरणकमलविन्यस्तमूर्द्धा प्रणामना-वन्दना । *(इति वन्दना)*

---

२९. व.स.(पा.)
३०. ज्ञा.त. पृ. १०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तद्रश्मेरेव निर्गतपुष्पधूपदीपगन्धचूर्णचीवरच्छत्र-ध्वज घण्टापताकादिभिस्तेषां च बाह्याध्यात्म्यपूजादिभि: संपूजनं पूजा । *(इति पूजना)*

द्वेषाच्च रागादथ मोहतोऽपि
कायेन वाचा मनसाऽन्यतोऽपि ।
पापं कृतं कारितमेव यत् तत्
सर्व्वं जिनानां पुरतो दिशामि ॥

इति पापदेशना ।

पुण्यं च यत् सर्व्वतथागतानां
अन्यच्च सम्बोधिसमाश्रितांनाम् ।
प्रत्येकबुद्धस्य च सद्गुरूणां
सर्व्वं जिनानां स्वनुमोदयामि ॥

इति पुण्यानुमोदना । [३१]

.............सत्त्वार्थमासंसारं कुर्व्वन्तु भगवन्त: संबुद्धास्तत्सुता अपि महाबोधिसत्त्वाष्तिष्ठन्तु मामा परिनिर्व्वाणादिति ।[३२] *(इति अध्येषणा) ।*

उत्पादयामि सम्बोधौ चित्तं बोधाय देहिनाम् । भद्रचर्य्यां चरिष्यामि सर्व्वसत्त्वहितोदयाम् ॥[३३] *(इति बोधिचित्तोत्पाद) ।*

---

३१. सा.मा.भा.१ पृ. ११५–११६
३२. " पृ. ५६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भवसागरे पतितान् सत्त्वान् तेषामुद्धरणं कर्त्तुं चित्तवज्रं श्रेष्ठं करोम्यहं इति बोधिचित्तोत्पादः ।[३४]

..... अहो बताहमनुत्तरां सम्यक्संबोधिमभिसंबुद्धेयं सर्व्वं सर्व्वसत्त्वानामर्थाय हिताय सुखाय यावदत्यन्त-निष्ठेर्व्व निर्वाणधातौ बुद्धबोधौ प्रतिष्ठापनाय च ।[३५]

सप्तविधानुत्तरपूजया यदेव कुशलमुत्पन्नं तदेव संबोधये परिणामयामीति ।[३६] *(इति परिणामना)* ।

१५. त्रीणि कुशलमूलानि । बोधिचित्तोत्पादः, आशयविशुद्धिः, अहंकारममकारपरित्याग-श्चेति ॥

बोधिचित्तोत्पादः पूर्वोक्तएव । हरिभद्रेण उक्तम् यथा "परोपकारप्रवणचित्तमध्याशयः"। *दिव्यवज्राआह* निःस्वार्थभावेन शुद्धचित्तेन परोपकारे चित्तं योजयतुं इति आशयविशुद्धिः ।[३७]

बोधिसत्त्वभूमौ इत्याह —

इह बोधिसत्त्वेन पूर्वमेव प्रमुदितविहारे दशा-कारेण चित्ताशयेनाशयशुद्धिः प्रतिलब्धा भवति । सर्वाचार्य

---

३३. सा.मा.भा.१ पृ. ३
३४. " " २ पृ ३७३
३५. " " १ पृ. २२५
३६. " " १ पृ. ५६
३७. ध.को. पृ. १६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गुरुदक्षिणीयाविसवादनाध्याशयः । सहधार्मिकबोधिसत्त्व-सौरत्यसुखसंवासाशयः । सर्वक्लेशोपक्लेशमारकर्माभिभव-स्वचित्तशवर्तनाशयः । सर्वसंस्कारेषु दोषाशयः निर्वाणेऽनुशंसाशयः । कुशलानां बोधिपक्ष्याणां धर्माणां भावनासातत्याशयः । तेषामेव च भावनानुकूलतया प्राविविक्याशयः । सर्वलोकामिषसमुच्छ्रयलाभसत्कारनि-रपेक्षाशयः । हीनयानमपहाय महायानाधिगमाशयः । सर्वसत्त्वसर्वार्थकरुणाशयश्च । इतीमे दश सम्यगाश-यास्तस्मिंश्चित्ते प्रवृत्ता भवन्ति । यैरस्याशयः शुद्ध इत्युच्यते ।[३८]

अहंकारममकारविकल्पविच्छेद भावना एव अहंकारममकारपरित्यागः ।[३९]

१६. चत्वारो ब्रह्मविहाराः । मैत्री, करुणा, मुदिता, उपेक्षा चेति ॥

स्थविरानुपमरक्षितेन श्रीखसर्पणलोकेश्वरसाधने ब्रह्मविहार-निर्वचनमित्थं अभिधीयते —

तत्रेयं मैत्री सर्वसत्त्वेषु अतिशयितहितैकपुत्र-कस्नेहलक्षणा ।

---

३८. बो.भू. पृ. २२७ – २२८
३९. ध.को. पृ. १५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

करुणा तु कीदृशी? अगाधापारसंसारसागरमध्ये पनितानन्तसत्त्वधातुन् समुद्धरामीत्यध्याशयः ।

मुदितापुनः कि दृशी? धातुत्रयावस्थितानां सत्त्वानां यानिं सुचरितानि तेषु तद्भोगैश्वर्यादिषु हृष्टचित्तता ।

केयमुपेक्षा? प्रतिघानुनयनिवन्धनमपहाय हिताहितेषु सत्त्वेषु परमहिताचरणं चतुः प्रमाणभावनानन्तरं सर्वधर्मप्रकृतिपरिशुद्धतां चिन्तयेत्।[४०]

चत्वारो ब्रह्मविहाराः बोधिसत्त्वश्चत्वार्यप्रमाणानि अपि कथ्यन्ते यथाउक्ताः आचार्यासङ्गपादेन बोधिसत्त्वभूमौ —

कथञ्च बोधिसत्त्वश्चत्वार्यप्रमाणानि भावयति । मैत्रीं करुणां मुदितामुपेक्षाम् । इह बोधिसत्त्वः समासतस्त्रिविधानि चत्वार्यप्रमाणानि भावयति । सत्त्वालम्बनानि धर्मालम्बनान्यनालम्बनानि च । यद्बोधिसत्त्वस्त्रिषु राशिषु सर्वसत्त्वानवस्थाप्य सुखितान् दुःखितान् अदुःखितासुखितान् सत्त्वान् सुखकामानधिकृत्य सुखोपसंहाराध्याशयगतेन मैत्रेणचेतसा दशदिशाः स्फरित्वा सत्त्वाधिमोक्षेण विहरति । इयमस्य सत्त्वालम्बना मैत्री वेदितव्या । यत्पुनः धर्ममात्रसंज्ञी धर्ममात्रे सत्त्वोपचारमाशयतः संपश्यंस्तामेव मैत्रीं भावयति । इयमस्य

---

४०. सा.मा.भा.१ पृ. ५७ - ५८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धर्मालम्बना मैत्री वेदितव्या । यत्पुनर्धर्मानप्यविकल्पयंस्तामेव मैत्रीं भावयति । इयमस्यानालम्बना मैत्री वेदितव्या । यथा सत्त्वालम्बना धर्मालम्बनाऽनालम्बना मैत्री एवं करुणा मुदितोपेक्षा अपि वेदितव्या ।

तत्र बोधिसत्त्वो दुःखितान् सत्त्वानारभ्य दुःखापनयनाध्याशयो दशसु दिक्षु करुणासहगतं चितं भावयति । सास्य करुणा ।

सुखितान्वा पुनः सत्त्वानारभ्य सुखानुमोदनाध्याशयो सशु दिक्षु मुदितासहगतं चित्तं भावयति । सास्य मुदिता ।

स तेषामेव त्रिविधानां सत्त्वानामदुःखासुखिताना दुःखितानां सुखितानाञ्च यथाक्रमं मोहद्वेषरागक्लेशविवेकाध्याशयो दशसु दिक्षूपेक्षासहगतं चित्तं भावयति । इयमस्योपेक्षा ।[४१]

१७. षट् पारमिताः। दानपारमिता, शीलपारमिता, क्षान्तिपारमिता, वीर्यपारमिता, ध्यानपारमिता, प्रज्ञापारमिता चेति ॥

बोधिसत्त्वस्य पारमिता विवृणोति बोधिसत्त्वभूमौ यथा —

---

४१. बो.भू. पृ. १६६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र कतमा बोधिसत्त्वस्य दानपारमिता । नवाकारं दानं बोधिसत्त्वस्य दानपारमितेत्युच्यते । स्वभावदानं सर्वदानं दुष्करदानं सर्वतोमुखं दानं सत्पुरुषदानं सर्वाकारदानं विघातार्थिकदानमिहामुत्रसुखं दानं विशुद्धदानं च ।[४२]

तत्र शीलं बोधिसत्त्वानां कतमत् । तदपि नवविधं वेदितव्यम् । स्वभाव शीलं सर्वशीलं दुष्करशीलं सर्वतोमुखं शीलं सत्पुरुषशीलं सर्वाकारशीलं विघातार्थिकशीलं इहामुत्रसुखं शीलं विशुद्धशीलञ्च ।[४३]

तत्र कतमा बोधिसत्त्वस्य स्वभावक्षान्तिः । या प्रतिसंख्यानबलसन्निश्रयेण वा प्रकृत्या वा परापकारस्य मर्षणा सर्वेषाञ्च मर्षणा सर्वस्य च मर्षणा निरामिषेण च चित्तेन केवलया करुणया [मर्षणा] । अयं समासतो बोधिसत्त्वस्य क्षान्तिस्वभावो वेदितव्यः ।

तत्र कतमा बोधिसत्त्वस्य सर्वा क्षान्तिः । सा द्विविधा द्रष्टव्या । गृहिपक्षाश्रिता प्रव्रजितपक्षाश्रिता च । सा पुनरुभयपक्षाश्रितापि त्रिविधा वेदितव्या । परापकारमर्पणा–क्षान्तिः । दुःखाधिवासना–क्षान्तिः । धर्मनिध्यानाधिमोक्ष क्षान्तिञ्च ।[४४]

---

४२. बो.भू. पृ. ८०
४३. " " पृ. ९५
४४. " " पृ. १३०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र कतमद्बोधिसत्त्वस्य स्वभाववीर्यं । यो बोधिसत्त्वस्य चित्ताभ्युत्साहोऽप्रमेयकुशलधर्मसंग्रहाय सत्त्वार्थक्रियायै । उत्तप्तश्च निश्छिद्रश्चाविपर्यस्तश्च तत्समुत्थितश्च कायवाङ्मनः परिस्पन्दः। अयं बोधिसत्त्वस्य वीर्यस्वभावो वेदितव्यः ।

तत्र कतमद्बोधिसत्त्वस्य सर्ववीर्यं । तत्समासतो द्विविधं वेदितव्यम् । गृहिपक्षाश्रितं प्रव्रजितपक्षाश्रितञ्च । तत्पुनरुभयपक्षाश्रितमपि त्रिविधं वेदितव्यम् । सन्नाहवीर्यं कुशलधर्मसंग्राहकं सत्त्वार्थक्रियायै च ।[४५]

तत्र कतमो बोधिसत्त्वानां ध्यानस्वभावः । बोधिसत्त्वपिटकश्रवणचिन्तापूर्वकं यल्लौकिकं लोकोत्तरं बोधिसत्त्वानां कुशलं चित्तैकाग्र्यञ्चित्तस्थितिः शमथपक्ष्या वा विपश्यनापक्ष्या वा युगनद्धवाहिमार्गं तदुभयापक्ष्या वा । अयं बोधिसत्त्वानां ध्यानस्वभावो वेदितव्यः ।[४६]

तत्र कतमो बोधिसत्त्वस्य प्रज्ञास्वभावः। सर्वज्ञेयप्रवेशाय च सर्वज्ञेयानुप्रविष्टश्च यो धर्माणां प्रविचयः पञ्चविद्यास्थानान्यालम्ब्य प्रवर्तते अध्यात्मविद्यां हेतुविद्यां

---

४५. बो.भू. पृ. १३८
४६. " " पृ. १४३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शव्दविद्याञ्चिकित्साविद्यां शिल्पकर्मस्थानविद्याञ्च । अयं बोधिसत्त्वानां प्रज्ञास्वभावो वेदितव्यः ।

तत्र कतमा बोधिसत्त्वानां सर्वा प्रज्ञा । सा द्विविधा द्रष्टव्या । लौकिकी लोकोत्तरा च । सा पुनः समासतस्त्रिविधा वेदितव्या । ज्ञेयतत्त्वानुबोधप्रतिवेधाय । पञ्चसु च यथानिर्दिष्टेषु विद्यास्थानेषु त्रिषु च राशिषु कौशल्यक्रियायै सत्त्वार्थक्रियायै च । या बोधिसत्त्वानामनभिलाप्यं धर्मनैरात्म्यमारभ्य सत्यावबोधाय वा सत्यावबोधकाले वा सत्याभिसंबोधाद्वा उर्द्ध प्रज्ञा परमप्रशमप्रत्युपस्थाना निर्विकल्पा सर्वप्रपञ्चागता सर्वधर्मेषु समतानुगता महासामान्यलक्षणप्रविष्टा ज्ञेयपर्यन्तगता समारोपापवादान्तद्वय विवर्जितत्वान्मध्यमप्रतिपदनुसारिणी । इयं बोधिसत्त्वानां तत्त्वानुबोधप्रतिवेधाय प्रज्ञा वेदितव्या । [४७]

१८. दश पारमिताः । षट्पारमितासकलम्, उपायम्, प्रणिधिः, बलम्, ज्ञानं चेति ॥

तत्र षट् च पूर्व निर्दिष्टाः पारमिताः ।

अप्रमाणज्ञानत्ता उपायकौशलपारमिता ।[४८]

---

४७. बो.भू. पृ. १४६
४८. " " पृ. २५६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र कतमद्बोधिसत्त्वानामुपायकौशल्यम् । तत्समासतो द्वादशाकारम् । अध्यात्म-बुद्धधर्मसमुदागममारभ्य (षड्विधम्) बहिर्धा-सत्त्वपरिपाकमारभ्य षड्विधमेव ।

अध्यात्म-बुद्धधर्मसमुदागममारभ्य षड्विधमुपायकौशल्यं कतमत् । या बोधिसत्त्वस्य सर्वसत्त्वेषु करुणासहगता अपेक्षा यच्च सर्वसंस्कारेषु यथाभूतसर्वपरिज्ञानं या चानुत्तरसम्यक्संबोधिज्ञाने स्पृहा । यच्च सत्त्वापेक्षां निश्रित्य संसारापरित्यागः या च संस्कारेषु यथाभूतपरिज्ञानं निश्रित्यासंक्लिष्टचित्तस्य संसारसंसृती । या च बुद्धज्ञाने स्पृहा निश्रित्योत्तप्तवीर्यता । इदमध्यात्मबुद्धधर्मसमुदागममारभ्य षड्विधमुपायकौशल्यं वेदितव्यम् ।

तत्र कतमद्बहिर्धासत्त्वपरिपाकमारभ्य षड्विधमुपायकौशल्यम् । येनोपायकौशल्येन बोधिसत्त्वः परात्तानि कुशलमूलानि अप्रमाणफलतायामुपनयति । तथाल्पकृच्छ्रेण विपुलान्यप्रमणानिं कुशलमुलानि समावर्तयत्युपसंहरति । तथा बुद्धशासनप्रतिहतानां सत्त्वानां प्रतिघातमपनयति । मध्यस्थानवतारयति । अवतीर्णान् परिपाचयति । परिपक्वान् विमोचयति ।[४९]

उत्तरोत्तरज्ञानवैशेषिकताप्रार्थना प्रणिधानपारमिता।[५०]

---

४९. वो.भू. पृ. १७८
५०. " " पृ. २५६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र कतमद्बोधिसत्त्वस्य बोधिसत्त्वप्रणिधानम् । तत् समासतः पञ्चविधं द्रष्टव्यम् । चित्तोत्पाद-प्रणिधानं उपपत्तिप्रणिधानं गोचरप्रणिधानं सम्यक्प्रणिधानं महाप्रणिधानञ्च ।

तत्र प्रथमचित्तोत्पादो बोधिसत्त्वस्यानुत्तरायां सम्यक्संबोधौ चित्तोत्पादप्रणिधानमित्युच्यते ।

आयत्यां सत्त्वार्थानुकुलासु सुगत्युपपत्तिषु प्रणि-धानं बोधिसत्त्वस्योपपत्तिप्रणिधानमित्युच्यते ।

सम्यग्धर्मप्रविचयप्रणिधानं अप्रमाणादिकुशलधर्म-भावनाविषयप्रणिधानञ्च बोधिसत्त्वस्य गोचरप्रणिधान-मित्युच्यते ।

आयत्यां सर्वबोधिसत्त्वकुशलसंग्रहाय सर्वगुण-संग्रहाय च समासतो व्यासतो वा प्रणिधानं बोधिसत्त्वस्य सम्यक् प्रणिधानमित्युच्यते ।

महाप्रणिधानं पुनर्बोधिसत्त्वस्यास्मादेव सम्यक्प्रणि-धानाद्वेदितव्यम् । तत् पुनर्दशविधम् । आयत्यां सर्वाकाराप्रमेय-तथागत-पूजोपस्थानतायै प्रथमं प्रणिधान बोधिसत्त्वस्य महाप्रणिधानमित्युच्यते । बुद्धानां च भगवतां सद्धर्म-परिग्रहारक्षणतायै धर्मनेत्रीसन्धारणाय महाप्रणिधानम् । तुषितभवनवासमुपादाय पूर्ववद्यावत्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

परिनिर्वाणाय महाप्रणिधानम् । बोधिसत्त्व-सर्वाकारसम्य-क्चर्याचरणतायै महाप्रणिधानम् । सर्वसत्त्वपरिपाकाय महाप्रणिधानम् । सर्वलोकधातुसन्दर्शनाय महाप्रणिधा-नम् । बुद्धक्षेत्रपरिशोधनाय महाप्रणिधानम् । सर्वबोधिसत्त्वै-काशयप्रयोगतायै महायानावतरणतायै महाप्रणिधानम् । अबन्ध्यसर्व-सम्यक्प्रयोगतायै महाप्रणिधानम् । अनुत्तर-सम्यक्संबोध्यभिसंबोधाय महाप्रणिधानम् ।[५१]

दशबलप्रयोगविशुद्धिर्बलपारमिता । सवमारैर्मार्गा-नाच्छेद्यता बलपारमिता ।[५२]

सर्वधर्मेसु यथावद् व्यवस्थानज्ञानं ज्ञानपारमिता।

संवृतिग्रहणप्रवृता पुनर्ज्ञानपारमिता । इत्ययमन-योर्विशेषः ।

यथावज् ज्ञैयावबोधता ज्ञानपारमिता ।[५३]

१९. चत्वारि संग्रहवस्तूनि । दानम्, प्रियवचनम्, अर्थचर्या, समानार्थता चेति ॥

बोधिसत्त्वाः सत्वानां विनयाय उपायं चतुर्विधं प्रकाशयति बोधिसत्त्वभूमौ यथा —

---

५१. बो.भू. पृ. १८६-१८७
५२. " " पृ. २५६
५३. " " पृ. २५६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समासतश्चतुर्विध उपायः सत्त्वानां विनयाय संग्रहाय । नास्त्यत ऊत्तरि नास्त्यतो भूयः । तद्यथाऽनुग्राहको ग्राहकः अवतारकोऽनुबर्तकश्च । तत्र दानं बोधिसत्त्वस्यानुग्राहकं उपायः । तथा हि विचित्रेणामिषदानेनानुगृह्यमाणाः सत्वाः श्रोतव्यं कर्तव्यं वचनं मन्यन्ते ।

तदनन्तरं बोधिसत्त्वः प्रियवादितया तत्र तत्र सम्मूढानां तत्सम्मोहाशेषापनयाय युक्तिं ग्राहयति सन्दर्शयति । एवमस्य प्रियवादिता ग्राहक उपायो भवति । तथा च युक्त्या ग्राहितान् सन्दर्शितान्सत्त्वान् अकुशलात्स्थानाद् व्युत्थाप्य कुशले स्थाने समादापयति विनयति निवेशयति प्रतिष्ठापयति । सास्यार्थचर्या भवत्यवतारक उपायः ।

एवञ्च बोधिसत्त्वःतान्सर्वानवतार्य तत्सभागवृत्तसमाचारेणानुवर्तते येनास्य न भवन्ति विनेया वक्तारः । त्वं तावदात्मना न श्रद्धासम्पन्नः शीलसम्पन्नस्त्यागसम्पन्नः प्रज्ञासम्पन्नः कस्माद्भवान् परानत्र समादापयति ।

तेन च चोदयति स्मारयतीति तस्मात्समानर्थता बोधिसत्त्वस्य चतुर्थोऽनुवर्तक उपायो वेदितव्यः ।[५४]

---

५४. बो.भू. पृ. ७९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२०. पञ्चाभिज्ञाः । दिव्यचक्षुः, दिव्यश्रोत्रम्, परचित्तज्ञानम्, पूर्वनिवासानुस्मृतिः, ऋद्धिश्चेति ॥

बोधिसत्त्वानाम् पञ्चाभिज्ञा विवृणोति यथा बोधिसत्त्व भूमौ –

इह तथागतो वा बोधिसत्त्वो वा दिव्येन चक्षुषा विशुद्धेनातिक्रान्तमानुष्यकेण सत्त्वान् पश्यति च्युतिकालेऽपि च्युतानपि सुवर्णदुर्वर्णान् हीनप्रणीतानपरान्ते च जातान् ।[५५]

इह तथागतो वा बोधिसत्त्वो वा दिव्येन श्रोत्रेण दिव्यान् मानुष्यकान् शब्दानार्यानप्यनार्यानपि घनानप्यणुकानपि व्यक्तानप्यव्यक्तानपि निर्मितानप्यनिर्मितानपि दूरान्तिकस्थान् श्रृणोति ।[५६]

इह बोधिसत्त्वो वा तथागतो वा परेषां दशसु दिक्ष्वप्रमेयासंख्येयेषु लोकधातुषु सत्त्वानां क्लेशपर्यवस्थितमपि चित्तं जानाति ।विगतक्लेशपर्यवस्थानमपि क्लेशसानुबन्धं सानुशयमपि क्लेशनिरनुबन्धं निरनुशयमपि मिथ्याप्रणिहितमपि चित्तं जानाति। तद्यथा तीर्थिकचित्तं

---

५५. बो.भू. पृ. ४८
५६. " " पृ. ४७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सामिषाभिप्रायस्य क्लिष्टमपि चित्तं सम्यक् प्रणिहितमपि चित्तं जानाति । एतद्विपर्ययेण हीनमपि चित्तं जानाति । तद्यथा कामधातूपपन्नानां सर्वसत्त्वानामन्ततो मृगपक्षिणामपि । मध्यमचित्तं जानाति तद्यथा सर्वेषां रूपधातूपपन्नान्नां सत्त्वानाम् । प्रणीतमपि चित्तं जानाति तद्यथा सर्वेषामारूप्योपपन्नां सत्त्वानाम् । सुखप्रसंयुक्तमपि दुःखप्रसंयुक्तमप्युदःखासुखवेदनासंप्रयुक्तमपि चित्तं जानाति । एकेन परिचित्तज्ञानेनैकस्य सत्त्वस्य यस्य यद्यथा यादृशं यावच्चितं प्रत्युपस्थितं भवति तत्सकृद्यथाभूतं प्रजानाति । एकेनैव परचित्तज्ञानेन प्रभूतानामपि सत्त्वानां येषां यद्यथा यादृशं यावच्चितं प्रत्युपस्थितं भवति तदपि सकृद्यथाभूतं प्रजानाति ।[५७]

इह तथागतो वा बोधिसत्त्वो वा आत्मनैवात्मनस्तावत्पूर्वनिवासं समनुस्मरति अमुका नाम ते सत्त्वा यत्राहमभूवमेवन्नामेति विस्तरेण यथासूत्रं सत्त्वकायदिकं सर्वमनुस्मरति । यथा चात्मनात्मनः समनुस्मरति तथा परेषामपि अनुस्मारयति । स्वयमेव च परेषामनुस्मरति । येऽपि ते सत्त्वाकायाः पूर्वान्ते यन्निवासास्तानप्यात्मना स्मरति परेषां स्मारयति अमुका नाम ते सत्वा यत्राहमभूवमेवंनामेति विस्तरेण । तेषामपि सत्त्वानां तथैव सर्व पुर्वेनिवासमनुस्मरति यथैवात्समनो दृष्टधर्मे । सूक्ष्ममपि समनुस्मरति यत्किञ्चिदल्पं वा प्रभूतं वा

---

५७. बो.भू. पृ. ४९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पूर्वचेष्टितं पूर्वमेव चेतयित्वा अप्रमुषितम् । निरन्तरमपि समनुस्मरति। क्षणं नैरन्तर्ययोगेनाविच्छिन्नां ययैवानुपूर्व्या कृतमितमप्यनुस्मरति । यस्य कल्पगणनायोगेन शक्या संख्यां कर्तुम् अप्रमेयासंख्येयमप्यनुस्मरति । यस्य कल्पगणनायोगेनाशक्या संख्यां कर्तुम् अव्याहतमस्य समासतः पूर्वेनिवासज्ञानं प्रवर्तते यत्रेष्टं यथेष्टं यावदिष्टम् । एवंरूपो बोधिसत्त्वस्य तथागतस्य च पुर्वेनिवाससंगृहीतः प्रभावः ।[५८]

सा पुनरेषा द्विविधापि ऋद्धिर्बुद्धबोधिसत्वानां समासतो द्वे कार्ये निष्पादयति । आवर्जयित्वा वा ऋद्धिप्रातिहार्येण सत्वान् बुद्धशासनेऽवतारयति । अनुग्रहं वा अनेकविधं बहु नानाप्रकारं दुःखितानां सत्त्वानामुपसंहरति ।[५९]

ऋद्धिविज्ञानं तथाष्टगुणान्—

अणिमा लघिमा गणिमा इषित्वं वशित्वं कतृत्व भोज्यत्वं इच्छाप्रकामजा एतानष्टगुणान् ।[६०]

२१. चत्वार्यार्यसत्यानि । तद्यथा–दुःखम्, समुदयः, निरोधः, मार्गश्चेति ॥

५८. बो.भू. पृ.४६-४७
५९. " " पृ. ४६
६०, त.ज्ञा.सं.म.प्र. पृ. २७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कतमानि चत्वारि? दुःखं दुःखसमुदयो दुःखनिरोधो दुःखनिरोधगामिनि प्रतिपत् । तत्र कतमद् दुःखम्? जातिरपि दुःखं जरापि दुःखं व्याधिरपि दुःखं मरणमपि अप्रियसंप्रयोगोऽपि दुःखम् । यदपि इच्छन् पर्येषमाणो न लभते तदपि दुःखम् । संक्षेपात् पञ्चोपादानस्कधा दुःखम् । इदमुच्यते दुःखम् । तत्र कतमो दुःखसमुदयः? येयं तृष्णा पौनर्भविकी नन्दीरागसहगता तत्रतत्राभिनन्दिनी अयमुच्यते दुःखसमुदयः । तत्र कतमो दुःखनिरोधः? योऽस्या एव तृष्णायाः पुनर्भविक्या नन्दीरागसहगताया-स्तत्रतत्राभिनन्दिन्या जनिकाया निर्वर्तिकाया अशेषो विरागो निरोधः अयं दुःखनिरोधः । तत्र कतमा दुःखनिरोधगा-मिनी प्रतिपत्? एष एवार्याष्टाङ्गमार्गः । तद्यथा । सम्य-ग्दृष्टिर्यावत्सम्यक्समाधिरिति । इदमुच्यते दुःखनिरोधगामिनी प्रतिपदार्यसत्यमिति । इमानि भिक्षवश्चत्वार्यार्यसत्यानि ।[६१]

तत्र कृष्णपक्षं शुक्लपक्षं चोपादाय हेतुफल-व्यवस्थानेन चतुःसत्यव्यवस्थानं ।

तत्र दुःखसत्यं फलं । समुदयसत्यं हेतुः । निरोधसत्यं फलं । मार्गसत्यं हेतुः प्राप्तये, स्पर्शनायै । तत्र दुःखसत्यं व्याधिस्थानीयं तत्प्रथमतः परिज्ञेयं । समुदयसत्यं व्याधिनिदानस्थानीयं । तच्चान्तरम्परिवर्ज-यितव्यं । निरोधसत्यमारोग्यस्थानीयं । तच्च स्पर्शयित-व्यं(स्प्रष्टव्यम्), साक्षात्कर्तव्यं । मार्गसत्यं भैषज्यस्थानीयं ।

६१. ल.सू. पृ. ३४६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तच्चासेवितव्यं, भावयितव्यं । बहुलीकर्तव्यं । भूतं चैतत्तथा अवितथा(-थम) विपरीतमविपर्यस्तं दु:खं दु:खार्थेन, यावन्मार्गो मार्गार्थेन तस्मात्सत्यमित्युच्यंते । स्वलक्षणं च(न) विसम्वदति। तद्दर्शनाच्चाविपरीता बुद्धय: प्रवर्त्तन्ते । तेन सत्यमित्युच्यते ।

कस्मात्पुनरेतान्यार्याणामेव सत्यानि भवन्ति । आर्या एतानि पश्यन्त्येव समानानि, सत्यता (तो) जानन्ति पश्यन्ति । यथाभूतं, बालास्तु न जानन्ति, न पश्यन्ति (।) यथाभूतं तस्मादार्यसत्यानीत्युच्यन्ते । बालानामेतद्धर्मतया सत्यं नावबोधेत(बुध्यते) । आर्याणां तूभयथा तत्र जानाति(ज्ञायते)[६२]

केन कारणेनार्याष्टांगो मार्ग इत्युच्यते । आह । आर्यस्य शैक्षस्य दृष्टपदस्यायं मार्ग इयं प्रतिपदष्टाभिरंगैः संगृहीता: ॥ अपरिशेष: । सर्व्वक्लेशप्रहाणाय विमुक्तिसाक्षात्क्रियायै तेनोच्यते आर्याष्टांगो मार्ग: ।

तत्र यश्च बोध्यंगकाले तत्त्वावबोध: ॥ प्रतिलब्ध:, प्रतिलभ्य च यत्तस्यैव प्रज्ञया व्यवस्थानं करोति ॥ यथा विगतस्यावबोधस्य, तदुभयमेकत्यमभिसंक्षिप्य सम्यग्दृष्टिरित्युच्यते । तां सम्यग्दृष्टिमधिपतिं कृत्वा । यन्नैष्क्रम्यसंकल्पं संकल्पयत्यव्यापादसं कल्पमविहिन्सा (हिंसा) संकल्पमयमुच्यते सम्यक्संकल्प: । स चेत्तावद्वित-

---

६२. श्रा.भू.भा.१ पृ. २५३-२५४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

र्केषु चित्तं त्रामति । स एवं रूपाद्वितर्काद्वितर्कयति स चेत्पुनः कथायां चित्तं क्रामति । सम्यग्दृष्टिमधिपतिं कृत्वा तेने(न)कूशलात्संकल्पां(लसंकल्पां) धर्म्यां कथां कथयति । सास्य भवति सम्यग्वाक् ।

स चेच्चीवरपिण्डपातशयनासनग्लानप्रत्ययभैषज्यपरिष्कारैरतीथी(र्थी) भवति । तत्पर्येषणाम्वापद्यते । सोभिक्रमः । प्रतिक्रमे संप्रजानम्वि(द्वि)हारी भवत्यालोकितव्यवलोकिते । तस्मिजित(संमिंजित) प्रसारिते । सांघटीचीवरपात्रधारणे, अशितपीतखादितास्वादिते । विहारगतो वा पुनः पर्येषितेषु चीवरादिषु गते, स्थिते, निषण्णे । यावन्निद्राक्लम(प्रति) विनोदने संप्रजानद्विहारी भवति । अयमस्योच्यते सम्यक्कर्मान्तः । स तच्चीवरं यावद्भैषज्यपरिष्कारं धर्मेण पर्येषते । यावन्मिथ्या धर्मविवर्जितः सोस्य भवति । सम्यगाजीवः ।

ये पुनर्विरतिसंगृहीताः । सम्यक्कर्मान्ताजीवाः । ते अनेन पूर्व्वमेव मनस्कारलाभाद्बोध्यंगैरेव सह लब्धा भवन्ति । योप्य(ा)पकान्तानि शीलान्युच्यन्ते । केन कारणेन दीर्घ कालं ह्येतदार्याणां सतां सम्यग्गतानामिष्टं कान्तं प्रियं मन आपं कच्चिदहं तद्वाग्दुश्चरितस्य, कायदुश्चरितस्य, मिथ्याजीवस्याकरणं। सम्वरं प्रतिलभेयं यदस्य दीर्घरात्रमिष्टं । कान्तं प्रियं मन आपं तदनेन तस्मिन्समये प्रतिलब्धं भवति । तस्मादापकान्तमित्युच्यते । तथा हि स लब्धेष्वापका-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न्तेषु शीलेषु, न संप्रजा(ना)नो मृषां वाचं भाषते । न संविध्य प्राणिनं जीविताद् व्यपरोपयति । नादत्तमादत्ते(।)न (।)कामेषु मिथ्या चरति । न चाधर्मेण चीवरादीनि पर्येषते । इति तान्यापकान्तानि शीलान्यधिपतिं कृत्वा मार्गभावनाकाले यावत्प्रवर्तते । यच्च कायकर्म यश्चाजीवः तेपि सम्यग्वाक्कर्मान्ता जीवा इत्युच्यन्ते ।

तस्य सम्यगदृष्टिसम्यक्संकल्प(:।) वाक्कर्मान्ताजीवसन्निश्रयेण भावनाप्रयुक्तस्य । यच्छन्दो (यश्छन्दो), वीर्य, व्यायामो, निष्क्रमः, पराक्रमस्थाम आरंभः । चेतसः संप्रग्रहः । सातत्यमयमुच्यते । सम्यग्व्यायामशमथः । यच्चत्वारि स्मृत्युपस्थानान्यधिपतिं कृत्वा अविपर्यायसंगृहीता स्मृतिः नवाकारा नवाकारचित्तस्थितिसंग्राहिका इयमुच्यते सम्यक्स्मृतिः । सम्यक्समाधिश्च।

तदेतत्सर्व्वमभिसमस्य आर्याष्टांगो मार्गश्चारकरणीये च विहारकरणीये चावस्थितः ।

तत्र सम्यग्वाक्कर्मान्ताजीवाः चारकरणीये(।)

विहारकरणीयं पुनर्द्विविधं । शमथो विपश्यना च (।) तत्र या सम्यग्दृष्टिः । यश्च सम्यक्संकल्पः। यश्च सम्यग्व्यायाम इयं विपश्यना ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र या च सम्यक्समृतिर्यश्च सम्यक्समाधिस्यं शमथः । एवं परिशुद्धान् सम्यग्वाक्कर्मान्ताजीवान्निश्रित्य शमथविपश्यनां वा भावयति । कालेन कालं निरवशेषसंयोजनप्रहाणं साक्षात्करोत्यग्रफलमर्हत्त्वं, प्राप्नोति। प्राकर्षिकश्च(कञ्च) भावनामार्ग:(र्गं) कालान्तराभ्यासेन क्लेशान् प्रजहाति । ज्ञानमात्रप्रतिबद्धवस्तुदर्शनमार्गः ज्ञानोत्पत्तिमात्रेण क्लेशान् प्रजहात्यनेन कारणेन वाक्कर्मान्ताजीवा भावनामार्गे व्यवस्थापिताः ।[६३]

२२.पञ्च स्कन्धाः । रूपम्, वेदना, संज्ञा, संस्काराः, विज्ञानं चेति ॥

तत्र रूपस्कन्धो यत्किंचिद्रूपं सर्वं तच्चत्वारि महाभूतानि। चत्वारि महाभूतान्युपादाय । तत्पुनरतीतानागतप्रत्युत्पन्नमाध्यात्मिकं वा, बाह्यम्वा, (औदारि) कम्वा, सूक्ष्म्वा, हीनम्वा, प्रणीतम्वा, दूरे वा, अन्तिके वा ।

तत्र वेदनास्कन्धः कतमः । सुखवेदनीयम्वा स्पर्शं प्रतीत्य, दुःखवेदनीयम्वा, अदुःखासुखवेदनीयम्वा । षडवेदनाकायाः । चक्षुः संस्पर्शजा वेदना (। श्रो) त्रघ्राणजिह्वाकायमनःसंस्पर्शजा वेदना ॥

---

६३. श्रा.भू.भा.१ पृ. ३२७ - ३३०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र संज्ञास्कन्धः कतमः । तद्यथा सनिमित्तसंज्ञा, अनिमित्तसंज्ञा, परीत्तसंज्ञा।महद्गतसंज्ञा । अप्रमाणसंज्ञा । नास्ति किञ्चिदित्याकिञ्चन्यायतनसंज्ञा । षट्संज्ञाकाया: ॥ चक्षुःसंस्पर्श(जा) संज्ञा ॥ श्रोत्रघ्राणजिह्वाकायमनःसं - स्पर्शजा संज्ञा ॥

संस्कार(स्कन्धः) कतमः । षट्चेतना कायाः चक्षुः संस्पर्शजा चेतना, श्रोत्रघ्राणजिह्वाकायमनः संस्पर्शजा चेतना । चेनतां च संज्ञा च स्थापयित्वा ॥ ये तदन्ये चैतसिका धर्माः ॥

तत्र विज्ञानस्कन्धः कतमः । यच्चित्तं मनोविज्ञानं । ते पुनः षड्विज्ञानकायाः । चक्षुर्विज्ञानं श्रोत्रघ्राणजिह्वाकायमनोविज्ञानं । सा चैषा वेदना संज्ञा संस्कारस्तच्चैतद्विज्ञानं । अतीतानागतप्रत्युत्पन्नमाध्यात्मिकं वा बाह्यम्वा इति विस्तरेण पूर्व्ववत् ॥ इम उच्यन्ते स्कन्धा ॥[६४]

२३.लोकोत्तरपञ्चस्कन्धाः । शीलसमाधिप्रज्ञाविमुक्तिविमुक्तिज्ञानदर्शनस्कन्धा इति ॥

तत्र ये सम्यक्कर्मान्ताजीवाः । अयं शीलस्कन्धः ।

---

६४. श्रा.भू.भा.१ पृ. २३८-२४३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र या च सम्यक्स्मृतिः, यश्च सम्यक्समाधिरयं समाधिस्कन्धः ।

तत्र या च सम्यग्दृष्टिर्यश्च संम्यक्संकल्पः, यश्च सम्यग्व्यायामः । अयं प्रज्ञास्कन्धः । [६५]

केयं विमुक्तिर्नाम?

सा पुनर्द्विधा ॥

संस्कृता चासंस्कृता च ॥

तत्र-

असंस्कृता क्लेशहानमधिमुक्तिस्तु संस्कृता ।

क्लेशप्रहाणमसंस्कृता विमुक्तिः । अधिमोक्षः संस्कृता विमुक्तिः ।

साङ्गः,

सैवासंस्कृता विमुक्तिरशैक्षाङ्गयुक्ताः, अङ्गानां संस्कृतत्वात् ।

सैव विमुक्ति द्वे,

---

६५. श्रा.भू.भा.१ पृ. ३२७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सैव संस्कृता विमुक्तिर्द्वे विमुक्ति सूत्र उक्ते - चेतोविमुक्तिः, प्रज्ञाविमुक्तिश्च । विमुक्तिस्कन्धोऽपि स एव द्रष्टव्यः ।

यत्तर्हि सूत्रे उक्तम् –

"कतमञ्च व्याघ्रबोध्यायना विमुक्तिपरिशुद्धिप्रधानम्? इह भिक्षवो रागाच्चित्तं विरक्तं भवति विमुक्तम्, द्वेषात्, मोहाच्चित्तं विरक्तं भवति विमुक्तमित्य-परिपूर्णस्य वा विमुक्तिस्कन्धस्य परिपूरये परिपूर्णस्य वानुग्रहाय यश्छन्दो वीर्यम्" इति विस्तरः । तस्मान्ना-धिमोक्ष एव विमुक्तिः । किं तर्हिः तत्त्वज्ञानापनीतेषु रागादिषु चेतसो वैमल्यं विमुक्तिरित्यपरे ।

उक्ता विमुक्तिः ।

अधिमोक्षः संस्कृता विमुक्तिरिति । धात्वर्थैकत्वात् ।

अङ्गानां संस्कृतत्वादिति । यथा सम्यग्दृष्ट्यादीति संस्कृतानि, तथा विमुक्तिरपि संस्कृतैव गृह्यते, नासंस्कृताः, विसभागत्वाद्विसदृशत्वात् ।

द्वे विमुक्ति सूत्र उक्ते इति । रागविरागा-च्चेतोविमुक्तिः, अविद्याविरागात् प्रज्ञाविमुक्तिरिति । चेतोविमुक्तिः, प्रज्ञाविमुक्तिश्चेत्यर्थः । विमुक्तिस्कन्धोऽपि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स एवेति । शीलस्कन्धः, समाधिस्कन्धः, प्रज्ञास्कन्धः, विमुक्तिस्कन्धः। विमुक्तिज्ञानदर्शनश्चेत्यत्र द्रष्टव्यः ।

यत्तर्हि सूत्र उक्तमिति । "चत्वारीमानि व्याघ्रबोध्यायाना परिशुद्धिप्रधानानि । कतमानि चत्वारि? शीलपरिशुद्धिप्रधानम्, समाधिपरिशुद्धिप्रधानम्, दृष्टिपरिशुद्धिप्रधानम्, विमुक्तिपरिशुद्धिप्रधानं च" इति विस्तरेणोक्त्वाह-कतमच्च व्याघ्रबोध्यायना विमुक्तिपरिशुद्धिप्रधानम् । यावद् यश्छन्दो वीर्यमिति विस्तरः । व्याघ्राबोध्यायना इति बहूवचनम्ः, तेषां बहुत्वात् । विमुक्तिपरिशुद्धिप्रधानमिति । विमुक्तेः परिशुद्धिः विमुक्तिपरिशुद्धिः, तस्यै प्रधानं विमुक्तिपरिशुद्धिप्रधानम् । तदेवमत्र विमुक्तिपरिशुद्धिप्रधान इति प्रश्नत्रयम् । तत्र इह भिक्षो रागच्चितं विरक्तं भवति विमुक्तम् । द्वेषात् मोहाद्विरक्तं भवति विमुक्तम् । विमुक्तिरुक्ता । इत्यपरिपुर्णस्य वा विमुक्तिस्कन्धस्य परिपूरये । परिपुर्णास्य वानुग्रहायेति । विमुक्तिपरिशुद्धिः परिपूर्यनुग्रहलक्षणोक्ता । यश्छन्दो विर्यमिति विस्तरेण प्रधानमुक्तम् । यत एवं रागादिभ्यो विमुक्तिः प्रहाणमित्येवंलक्षणा विमुक्तिरुक्ता । सूत्रे नाधिमुक्तिः, तस्मान्नाधिमोक्ष एव विमुक्तिः । कि तर्हिं ? तत्वज्ञानापनीतेषु रागादिषु चेतसो वैमल्यमनास्रवत्वमनर्थान्तरभूतं घृतमण्डस्वच्छतावदिति । अपरे इति । आचार्यः ॥ ६६

---

६६. अ.ध.को.भा.२ पृ. १०२७-१०२९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२४.द्वादशायतनानि । चक्षुःश्रोत्रघ्राणजिह्वाकायमनआयतनानि रूपशब्दगन्धरसर्स्पशधर्मायतनानि चेति ॥

तद्यथा- चक्षुराध्यात्मिकमायतनम्, रूपंबाह्ममायतनम्, श्रोत्रमाध्यात्मिकमायतनम्, शब्दो बाह्यमायतनम्, घ्राणमाध्यात्मिकमायतनम्, गन्धो बाह्यमायतनम्, जिह्वा आध्यात्मिकमायतनम्, रसो बाह्यमायतनम्, काय आध्यात्मिकमायतनम्, स्पर्शो बाह्यमायतनम्, मन आध्यात्मिकमायतनम्, धर्मो बाह्यमायतनम् ।

तदनन्तरमायतनानीत्याह-कतमानि द्वादशायतनानीति प्रश्नः । चक्षुराध्यात्मिकमायतनमिति विसर्जनम् । नन्वात्मा नास्ति । तदभावात् कथमाध्यात्मिकं चक्षुरित्युच्यते? नहि शीलाभावेऽधिशीलं शिक्षा व्यवस्थाप्येत । अस्त्येतत् । किन्त्वहङ्कारसनिश्रय आत्मेत्यात्मवादिनः कल्पयन्ति । तत्त्वतस्तु चित्तमहङ्कारस्य सन्निश्रय इत्यात्मेत्युपचर्यते । तस्मिन्नात्मन्यध्यध्यात्मम् । अध्यात्ममेवाध्यात्मिकम् । आत्मत्वेनोपचरिते चित्ते उत्पाद्ये चक्षुराद्यायतनं हेतुराध्यात्मिकशब्देनोच्यते । विज्ञानस्याश्रय इति यावदुक्तं भवति । व्याख्यातानि चक्षुरादीनि ।

विषया उच्यन्ते । रूपं द्विघा । वर्णात्मकं संस्थानात्मकं चेति । शब्दो द्विविधः । उपात्तमहाभूतहेतुको यथा हस्तवाक्छब्दः, अनुपात्तमहाभूतहेतुकश्च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यथा वायुवनस्पतिनदीशब्दः । गन्धस्त्रिविधः । सुगन्धो दुर्गन्धः समगन्धश्चेति । रसः षट्प्रकारः । मधुराम्ल-लवणकटुतिक्तकषायभेदात् । स्प्रष्टव्यमेकादशद्रव्यात्मकम् । पृथिव्यप्तेजोवायुधातवश्चत्वारः, श्लक्ष्णत्वं कर्कशत्वं गुरुत्वं लघुत्वं शीतं जिघत्सा पिपासा चेति । धर्मायतनं वेदनासंज्ञासंस्कारस्कन्धाः, आकाशं प्रतिसंख्यानिरोधोऽ - प्रतिसंख्यानिरोधोऽविज्ञप्तिश्चेति सप्त द्रव्याणि ।

क आयतनार्थः? चित्तचैत्तायद्वारार्थः । तथाहि चित्तचैत्तानामायमुत्पत्तिं तन्वन्तीति आयतनानीति निरुक्तिः । तन्वन्ति विस्तृण्वन्तीत्यर्थः । व्याख्यातान्यायतनानि ।[६७]

२५. अष्टादश धातवः ॥ चक्षुःश्रोत्रघ्राण जिह्वाकायमनोरूपशब्दगन्धरसस्पर्शधर्मधातवः चक्षुर्विज्ञानश्रोत्रविज्ञानघ्राणविज्ञानजिह्वाविज्ञान कायविज्ञानमनोविज्ञानधातवश्चेति ॥

तद्यथा- चक्षुर्धातुः, रूपधातुः, चक्षुर्विज्ञानधातुः, श्रोतधातुः, शब्दधातुः, श्रोतविज्ञानधातुः, घ्राणधातुः, गन्धधातुः, घ्राणविज्ञानधातुः, जिह्वाधातुः, रसधातुः, ज़िह्वाविज्ञानधातुः, कायधातुः, स्प्रष्छव्यधातुः, कायविज्ञानधातुः, मनोधातुः, धर्मधातुः, मनोविज्ञानधातुः ।

---

६७. अ.वि.सू. पृ. ९५-९७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इमे अष्टादश धातवः ।[६८]

पञ्चोपादानस्कन्धानन्तरं धातून् निर्दिशन्नाह-

तत्र कतमेऽष्टादश धातव इति । अत्र च भगवता आश्रयाश्रितालम्बनषट्कभेदादष्टादश धातवो निर्दिष्टाः । तत्राश्रयषट्कं चक्षुर्धातुर्यावन्मनोधातुः । आश्रितषट्कं चक्षुर्विज्ञानधातुर्यावन्मनोविज्ञानधातुः । आलम्बनषट्कं रूपधातुर्यावद्धर्मधातुरिति ।

चक्षुरादिधातूनामनुक्रमो वक्तव्यः । तदनुक्रमेणैव तद्विषयविज्ञानधातूनामनुक्रमः सिद्ध इत्युच्यते- मनोधातोश्चक्षुरादीनां पञ्चानां पूर्वनिर्देशो वर्तमानविषयत्वात् । मनसस्त्वनियतो विषयः । किञ्चिद् वर्तमानविषयं किञ्चित् त्र्यध्वानध्वविषयम् । कायधातोः पुनश्चक्षुरादीनां चतुर्णां पूर्वनिर्देशो भौतिकविषयत्वात् । कायस्य त्वनियतो विषयः । कदाचिद् भूतानि, कदाचिद् भौतिकं, कदाचिदुभयम् । घ्राणजिह्वाद्वयाच्चक्षुःश्रोत्रद्वयं पूर्वमुक्तं दूरविषयत्वात् । घ्राणस्य जिह्वायाश्च प्राप्तविषयग्रहणाद्दूरे वृत्तिर्नास्ति । श्रोत्रादपि चक्षुषो दूरतरा वृत्तिः । तथाहि पश्यतोऽपि नदीं तच्छब्दाश्रवणात् । अतस्तत् पूर्वमुक्तम् । जिह्वातो घ्राणं पूर्वतरमुक्तम्, आशुतरवृत्तित्वात्, तथाहि जिह्वामप्राप्तस्यैव भोज्यस्य गन्धग्रहणात् ।

---

६८. अ.वि.सू. पृ. ४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अथवाऽस्मिन् शरीरे चक्षुषः स्थानमुपरिष्टाद् व्यवस्थितम् । तस्मादधः श्रोत्रस्य, तस्मादधो घ्राणस्य, तस्मादधो जिह्वायाः, तस्मादधः कायस्य बाहुल्येन । मनः पुनस्तान्येव निश्रितमदेशस्थं चेति ।

चक्षुरादीनां लक्षणमुच्यते । चक्षुश्चक्षुर्विज्ञानाश्रयो रूपालोचनक्रियो रूपप्रसादः । एतेन श्रोत्रादीनि प्रत्युक्तानि । एतावान् विशेषः । स्वविज्ञानाश्रयस्वविषयालोचनक्रियो रूपप्रसाद इति बोधव्यम् ?

कः पुनर्धात्वथः? गोत्रार्थः । यथैकस्मिन् पर्वते बहूनि रूप्यसुवर्णादिगोत्राणि "धातव" उच्यन्ते, एवमेकस्मिन् सन्ताने आश्रयेवाऽष्टादश गोत्राण्यष्टादश धातव उच्यन्ते ।

ननु चाकरास्तत्र गोत्राण्युच्यन्ते । तदिमे चक्षुरादयः कस्याकराः? चित्तचैत्तानाम् । तथा हि चित्तचैत्तोत्पत्तिहेतवश्चक्षुरादयो भवन्ति ति धातव उच्यन्ते । उक्ता धातवः ।[६९]

२६. तत्रैकादश रूपस्कन्धाः ॥ चक्षुः, श्रोत्रम्, घ्राणम्, जिह्वा, कायः, रूपम्, शब्दः, गन्धः, रसः, स्पर्शः विज्ञप्तिश्चेति ॥

६९. अ.वि.सू. पृ. ९२ - ९४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रूपं पञ्चेन्द्रियाण्यर्थाः पञ्चाविज्ञप्तिरेव च ।

पञ्चेन्द्रियाणि चक्षुः - श्रोत-घ्राण - जिह्वा-कायेन्द्रियाणि, पञ्चार्थास्तेषामेव चक्षुरादीनामिन्द्रियाणां यथास्वं ये पञ्च विषयाः रूपशब्दगन्धरसस्प्रष्ट-व्याख्याः, अविज्ञप्तिश्च-इति एतावान् रुपस्कन्ध ।[७०]

रूपस्कन्धव्यवस्थानं कतमत् । यत्किंचिद्रूपं सर्वं तच्चत्वारि महाभूतानि चत्वारि च महाभूतान्युपादाय ॥ कतमानि चत्वारि महाभूतानि । पृथिवीधातुः अब्धातुः तेजोधातुः वायुधातुश्च ॥ पृथिवीधातुः कतमः । कठिनता ॥ अब्धातुः कतमः । निष्यन्दता ॥ तेजोधातुः कतमः । उष्णता ॥ वायुधातुः कतमः । कम्पनता ॥ उपादाय रूपं कतमत् । चक्षुरिन्द्रियं श्रोत्रेन्द्रियं घ्राणेन्द्रियं जिह्वेन्द्रियं कायेन्द्रियं रूपशब्दग-न्धरसस्प्रष्टव्यानामेकदेशो धर्मायतनसंगृहीतं च रूपम् ॥ चक्षुरिन्द्रियं कतमत् । चत्वारि महाभूतान्युपादाय चक्षुविज्ञाना श्रयो रूपप्रसादः ॥ श्रोत्रेन्द्रियं कतमत् । चत्वारि महाभूतान्युपादाय श्रोत्रविज्ञानाश्रयो रूपप्रसादः ॥ घ्राणेन्द्रियं कतमत् । चत्वारि महाभूतान्युपादाय घ्राण-विज्ञानाश्रयो रूपप्रसादः । जिह्वेन्द्रियं कतमत् । चत्वारि महाभूतान्युपादाय जिह्वाविज्ञानाश्रयो रूप-प्रसादः । कायेन्द्रियं कतमत् । चत्वारि महाभूतान्यु-पादाय कायविज्ञानाश्रयो रूपप्रसादः । रूपं कतमत् ।

---

७०. अ.ध.को.भा.१ पृ. ३०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चत्वारि महाभूतान्युपादाय चक्षुरिन्द्रियगोचऽरोर्थः। यथा नीलं पीतं लोहितमवदातं दीर्घं ह्रस्वं वृत्तं परिमण्डलं स्थूलं सूक्ष्ममुन्नतमवनतं सातं विसातमातपः छाया आलोकोऽन्धकारमभ्रं धूमो रजो महिका च । अभ्यवकाशरूपं विज्ञप्तिरूपं नभ एकवर्णं रूपम् ॥ तत् पुनस्त्रिधा । शोभनमशोभनमुभयविपरीतं च ॥ शब्दः कतमः । चत्वारि महाभूतान्युपादाय श्रोत्रेन्द्रिय-ग्राह्योऽर्थः । मनोज्ञो वा अमनोज्ञो वा उभयविपरीतो वा । उपात्तमहाभूतहेतुको वा अनुपात्तमहाभूतहेतुको वा तदुभयो वालोकप्रसिद्धो वा सिद्धोपनीतो वा परकल्पितो वा आर्यैर्देपशतो वा तीर्थ्यैदशितो वा ॥ गन्धः कतमः । चत्वारि महाभूतान्युपादाय घ्राणेन्द्रिय-ग्राह्योऽर्थः। यथा सुरभिरसुरभिः समगन्धः सहजगन्धः सांयोगिकगन्धः पारिणामिकगन्धश्च ॥ रसः कतमः । चत्वारि महाभूतान्युपादाय जिह्वेन्द्रियग्राह्योऽर्थः । ति-क्तोऽम्लो मधुरः कटुको लवणः कषायश्च । मनोज्ञो वा अमनोज्ञो वा उभयविपरीतो वा सहजो वा सांयोगिको वा पारिणामिको वा ॥ स्प्रष्टव्यैकदेशः कतमः । चत्वारि महाभूतान्युपादाय कायेन्द्रियग्रा-ह्योऽर्थः । श्लक्ष्णत्वं कर्कशत्वं लघुत्वं गुरूत्वं पिच्छिलत्वं मन्दत्वममन्दत्वं शीतत्वमुष्णत्वं जिघत्सा पिपासा तृप्तिर्बलं दौर्बल्यं मूर्च्छा कण्डूतिः पूतिर्व्याधिर्जरामरणं क्लान्तिर्विश्राम ऊर्ज्जा च ॥ धर्मायतनसंगृहीतं रूपं कतमत् । पञ्चविधम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आभिसंक्षेपिकमाभ्यवकाशिकं सामादानिकं परिकल्पितं वैभुत्विकं च ।[७१]

२७. वेदना त्रिविधा । सुखा, दु:खा, अदु:खासुखा चेति ॥

वेदनास्कन्धव्यवस्थानं कतमत् । षड्वेदनाकायाः । चक्षुःसंस्पर्शजा वेदना श्रोत्रघ्राणजिह्वाकायमनः संस्पर्शजा वेदना ॥ एवं षड्वेदना कायाः सुखा वा दु:खा अदु:खासुखा वा ॥ पुनः सुखा कायिकी वेदना दु:खा कायिकी वेदना अदु:खासुखा कायिकीवेदना सुखा चैतसिकी वेदना दु:खा चैतसिकी वेदना अदु:खासुखा चैतसिकी वेदना सुखा सामिषवेदना दु:खा सामिषवेदना अदु:खासुखा सामिषवेदना सुखा निरामिषवेदना दु:खा निरामिषवेदना अदु:खासुखा निरामिषवेदना पुनः सुखा ग्रेधाश्रितवेदना दु:खा ग्रेधाश्रितवेदना अदु:खासुखा ग्रेधाश्रितवेदना सुखा नैष्क्रम्याश्रितवेदना दु:खा नैष्क्रमयाश्रितवेदना अदु:खासुखा नैष्क्रमयान्नितवेदना च ॥ कायिकी वेदना कतमा । पंचविज्ञानसंप्रयुक्ता वेदना ॥ चैतसिकी वेदना कतमा । मनोविज्ञानसंप्रयुक्ता वेदना ॥ सामिषवेदना कतमा । आत्मभावतृष्णासंप्रयुक्ता वेदना ॥ निरामिषवेदना कतमा । तत्तृष्णाविप्रयुक्ता वेदना ॥ ग्रेधाश्रितवेदना कतमा । पंचकामगुणतृष्णासंप्रयुक्ता

---

७१. अ.ध.स. पृ. ३-४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वेदना ॥ नैष्क्रम्याश्रितवेदना कतमा ॥ तत्तृष्णाविप्रयुक्ता वेदना ॥[७२]

२८. संज्ञास्कन्धः ॥ निमित्तोद्ग्रहणात्मिका ॥

संज्ञास्कन्धव्यवस्थानं कतमत् । षट् संज्ञाकायाः । चक्षुःसंस्पर्शजा संज्ञा । श्रोत्रघ्राणजिह्वाकायमनःसंस्पर्शजा संज्ञा तथा सनिमित्तमपि संजानाति अनिमित्तमपि परीत्तमपि महद्गतमप्यप्रमाणमपि नास्ति किंचिदित्याकिंचन्यायतनमपि संजानाति ॥ सनिमित्तसंज्ञा कतमा । अव्यवहारकुशलस्यानिमित्तधातुसमापन्नस्य भवाग्रसमापन्नस्य च संज्ञां स्थापयित्वा यावदन्या संज्ञा ॥ अनिमित्तसंज्ञा कतमा । या स्थापिता संज्ञा ॥ परीत्ता संज्ञा कतमा । यथा कामधातुं संजानाति ॥ महद्गता संज्ञा कतमा । यथा रूपधातुं संजानाति ॥ अप्रमाणसंज्ञा कतमा । यथा आकाशानन्त्यायतनं विज्ञानानन्त्यायतनं संजानाति ॥ अकिञ्चनसंज्ञा कतमा । यया आकिञ्चन्यायतनं संजानाति ।[७३]

२९. संस्कारा द्विविधाः । तत्र चित्तसंप्रयुक्तसंस्काराः, चित्तविप्रयुक्तसंस्काराश्चेति ॥

---

७२. अ.ध.स. पृ. ४-५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वेदनासंज्ञे वर्जयित्वा येऽन्ये चैताः श्रद्धादयस्तस्मिन् संप्रयुक्ता विप्रयुक्ताश्च जात्यादयः संस्काराः संस्कारस्कन्धः ।[७४]

चतुर्भ्योऽन्ये तु संस्कारस्कन्धः । रूप-वेदना-संज्ञा-विज्ञानेभ्यश्चतुर्भ्योऽन्ये तु संस्काराः संस्कारस्कन्धः।[७५]

संप्रयुक्तविप्रयुक्तभ्यां संस्कारौद्विविधौ । तद्यथा - चित्तसंप्रयुक्तसंस्कारः, चित्तविप्रयुक्तसंस्कारश्चेति ।

३०. चित्तसंप्रयुक्तसंस्काराःश्चत्वारिंशत् । तद्यथा– वेदना, संज्ञा, चेतना, छन्दः, स्पर्शः, मतिः, स्मृतिः, मनस्कारः, अधिमोक्षः, समाधिः, श्रद्धा, अप्रमादः, प्रश्रब्धिः, उपेक्षा, ह्रीः, अपत्रपा, अलोभः, अद्वेषः, अहिंसा, वीर्यम्, मोहः, प्रमादः, कौसीद्यम्, अश्राद्धयम्, स्त्यानम्, औद्धत्यम्, अह्रीकता, अनपत्रपा, क्रोधः, उपनाहः, शाठ्यम्, ईर्ष्या, प्रदानः, म्रक्षः, मात्सर्यम्, माया, मदः, विहिंसा, वितर्कः, विचारश्चेति ॥

---

७३. अ.ध.स. पृ. ५
७४. अ.वि.सू. पृ. ८५-८६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आचार्यः असंगः चित्तसंप्रयुक्तसंस्काराणां संख्यां व्याख्यां च प्रकाशयति अभिधर्मसमुच्चये यथा —

संस्कारस्कन्धव्यवस्थानं कतमत् । षट् चेतनाकायाः । चक्षुःसंस्पर्शजा चेतना श्रोत्रघ्राणिह्वाकायमनःसंस्पर्शजा चेतना यया कुशलत्वाय चेतयते संक्लेशाय चेतयते अवस्थाभेदाय चेतयते इतीयं चेतना वेदनां संज्ञाञ्च स्थापयित्वा तदन्ये चैतसिका धर्माश्चित्तविप्रयुक्ताश्च संस्काराः संस्कारस्कन्ध इत्युच्यते । ते पुनः कतमे । मनस्कारः स्पर्शःच्छन्दोऽधिमोक्षः स्मृतिः समाधिः प्रज्ञा श्रद्धा ह्रीरपत्राप्यमलोभोऽद्वेषोऽमोहोःवीर्यं प्रश्रब्धिरप्रमाद उपेक्षा अविहिन्सा रागः प्रतिघो मानोऽविद्या विचिकित्सा सत्कायदृष्टिरन्तग्राहदृष्टिर्दृष्टिपरामर्शः शीलव्रतपरामर्शः मिथ्यादृष्टिः क्रोध उपनाहः म्रक्षः प्रदाशः ईर्ष्या मात्सर्य म( ) शाठ्यं मदो विहिन्सा आह्रीक्यमनपत्राप्यं स्त्यानमौद्धत्यं आश्रद्ध्यं कौसीद्यं प्रमादो मुषितस्मृतिताऽसंप्रजन्यं विक्षेपो मिद्धं कौकृत्यं वितर्को विचारश्च ॥ चेतना कतमा । चित्ताभिसंस्कारो मनस्कर्म । कुशलाकुशलाव्याकृतेषु चित्तप्रेरणकर्मिका ॥ मनस्कारः कतमः । चेतस आभोगः । आलम्बनचित्त धारणकर्मकः । स्पर्शः कतमः । त्रिकसन्निपाते इन्द्रियविकारपरिच्छेदः । वेदनासन्निश्रयदान कर्मकः । च्छन्द कतमः। ईप्सिते वस्तुनि तत्तदुपसंहता कर्त्तृकामता । वीर्यादान सन्निश्रयदानकर्मकः ॥ अधिमोक्षः कतमः ।

७५. अ.ध.को.भा.१ पृ. ४८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

निश्चिते वस्तुनि यथानिश्चयं धारणा । असंहार्यता-कर्मकः ॥ स्मृतिः कतमा । संस्मृते वस्तुनि चेतसः असंप्रमोषोऽविक्षेपकर्मिका ॥ समाधिः कतमः । उपपरीक्ष्ये वस्तुनि वित्तस्यैकाग्रता । ज्ञानसन्निश्रयदानकर्मकः ॥ प्रज्ञा कतमा । उपपरीक्ष्य एव वस्तुनि धर्माणां प्रविचयः । संशयव्यावर्त्तनकर्मिका॥ श्रद्धा कतमाः । अस्तित्वगुणवत्व-शक्तत्त्वेष्वभिसंप्रत्ययः प्रसादोऽभिलाषः । च्छन्दसन्निश्रय-दानकर्मिका ॥ ह्रीः कतमा । स्वयमवद्येन लज्जना । दुश्चरितसंयमसन्निश्रयदानकर्मिका ॥ अपत्राप्यं कतमत् । परतोऽवद्येन लज्जना । तत्कर्मकमेव ॥ अलोभः कतमः । भवे भवोपकरणेष वा अनासक्तिः दुश्चरिताप्रवृत्ति-सन्निश्रयदानकर्मकः ॥ अद्वेषुः कतमः । सत्त्वेषु दुःखे दुःख स्थानीयेषु च धर्मे ष्वनाघातः । दुश्चरिताप्रवृत्ति-सन्निश्रयदानकर्मकः ॥ अमोहः कतमः । विपाकतो वा आगतो वाऽधिगमतो वा ज्ञानं प्रतिसंख्या । दुश्चरिताप्रवृत्तिसन्निश्रयदानकर्मकः ॥ वीर्यं कतमत् । कुशले चेतसोऽभ्युत्साहः सन्नाहे वा प्रयोगे व अलीनत्वे वा अव्यावृत्तौ वा असन्तुष्टौ वा । कुशलपक्ष-परिपूरणपरिनिष्पादनकर्मकम् ॥ प्रश्रब्धिः कतमा । कायचित्तदौष्ठुल्यानां प्रतिप्रश्रब्धेः काय चित्तकर्मण्यता । सर्वावरणनिष्कर्षणकर्मिका ॥ अप्रमादः कतमः । सवीर्य-कानलोभाद्वेषामोहन्निश्रित्य या कुशलानां धर्माणाम्भा-वना सास्रवेभ्यश्च धर्मेभ्यश्चित्तारक्षा । स च लौकिक-लोकोत्तरसम्पित्ति परिपूरणपरिनिष्पादनकर्मकः । उपेक्षा कतमा। सवीर्यकानलोभाद्वेषामोहान्निश्रित्य या संक्लिष्ट-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विहारवैरोधिको चित्तसमता चित्तप्रशष्ठता चित्तस्यानाभोगावस्थितता । संक्लेशानवकाशसन्निश्रयदानकर्मिका ॥ अविहिन्सा कतमा । अद्वेषां शिका करुणता । अविहेठनकर्मिका ॥ रागः कतमः । त्रैधातुकोऽनुनयः । दुःखसंजननकर्मकः ॥ प्रतिघः कतमः । सत्त्वेषु दुःखे दुःखस्थानीयेषु च धर्मेष्वाघातः । अस्पर्शविहारदुश्चरितसन्निश्रयदानकर्मकः ॥ मानः कतमः । सत्कायदृष्टिसन्निश्रयेण चित्तस्योन्नतिः । अगौरवदुःखोत्पति सन्निश्रयदानकर्मकः । अविद्या कतमा । त्रैधातुकमज्ञानम् । धर्मेषु मिथ्यानिश्चयविचिकित्सासंक्लेशोत्पत्तिसन्निश्रयदानकर्मिका । विचिकित्सा कतमा । सत्येषु विमतिः । कुशलपक्षाप्रवृत्ति सन्निश्रयदानकर्मिका ॥ सत्कायदृष्टिः कतमा । पञ्चोपादानस्कन्धानात्मतः आत्मीयतो वा समनुपश्यतो या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः । सर्वदृष्टिगतसन्निश्रयदानकर्मिका ॥ अन्तग्राहदृष्टिः कतमा। पञ्चोपादानस्कन्धान् शाश्वतो वा उच्छेदतो वा समनुपश्यतः या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः । मध्यमा प्रतिपन्निर्याणपरिपन्थकर्मिका ॥ दृष्टिपरामर्शः कतमः । दृष्टिं दृष्टाश्रयांश्च पञ्चोपादानस्कन्धानग्रतः श्रेष्ठतो विशिष्टतः परमतश्च समनुपश्यतो या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः । असद्दृष्ट्यमिनिवेशसन्निश्रयदानकर्मकः । शीलव्रतपरामर्शः कतमः । शीलं व्रतं शीलव्रता (श्रयां)श्च पञ्चोपादानस्कन्धान् शुद्धितो मुक्तितो नैर्याणिकतश्च समनुपश्यतो या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः । श्रमवैफल्यसन्निश्रयदानकर्मकः ॥ मिथ्यादृष्टिः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कतमा । हेतुं वाऽपवदतः फलं वा क्रियां वा सद्वा वस्तु नाशयतः मिथ्या च विकल्पयतो या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः । कुशलमूलसमुच्छेदकर्मिका । अकुशलमूलदृढतासन्निश्रयदानकर्मिका। अकुशले प्रवृत्ति-कर्मिका कुशलेचाप्रवृत्तिकर्मिका वा ॥

या एताः पञ्च दृष्टयः आसां कति समारोपदृष्टयः कत्यपवाददृष्टयः। चतस्रः समारोपदृष्टय ज्ञेये स्वभावविशेषसमारोपतामुपादाय दृष्टौ चाग्रशुद्धिसमारोपतामुपादाय । एका यद्भूयसा अपवाददृष्टि । याश्च पूर्वान्तकल्पिका दृष्टयः याश्चापरान्तकल्पिका दृष्टयः ताः कतिभ्यो दृष्टिभ्यो वेदितव्याः । द्वाभ्यां सर्वाभ्यो वा। या अव्याकृतवस्तुषु दृष्टयस्ताः कतिभ्यो दृष्टिभ्यो वेदितव्याः । द्वाभ्यां सर्वाभ्यो वा । कं दोषं पश्यता भगवता स्कन्धधात्वायतनेषु पञ्चभिः कारणैरात्मा प्रतिक्षिप्तः । सत्कायदृष्टिपरिगृहीतान् पञ्च दोषान् पश्यता विलक्षणतादोषं अनित्यतादोषं अस्वास्थ्यदोषं निर्देहतादोषं अयत्नतो मोक्षदोषं च ॥ या पञ्चसूपादानस्कधेषु विंशतिकोटिका सत्कायदृष्टिः रूप(मा)त्मेति समनुपश्यति रूपवन्तमात्मानमात्मीयं (रूपं) रूपे आत्मानं वेदनां संज्ञां संस्कारान् विज्ञानमात्मेति समनुपश्यति विज्ञानवन्तमात्मानमात्मीयं विज्ञानं विज्ञाने आत्मानं तत्र कत्यात्मदृष्टयः कत्यात्मीयदृष्टयः । पञ्चात्मदृष्टयः पञ्चदशात्मीयदृष्टयः ॥ केन कारणेन पञ्च(दशा)त्मीयदृष्टयः । सम्बन्धात्मीयतामुपादाय वशवर्त्तनात्मी-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यतामुपादाय अविनिर्भोगवृत्यात्मीयतां चोपादाय । सत्काय-दृष्टिर्निरूपितवस्तुका वक्तव्या अनिरूपितवस्तुका वक्तव्या। अनिरूपितवस्तु(का) वक्तव्या रज्ज्वां सर्पबुद्धिवत् ।

क्रोधः कतमः । प्रत्युपशिथते अपकारनिमित्ते प्रति (घां)-शिकश्चेतस आघातः । शस्त्रादान दण्डादाना-दिसंरम्भसन्निश्रयदानकर्मकः । उपनाहः कतमः । तत ऊर्ध्वं प्रतिघांशिक एव वैराशयस्यानुत्सर्गः । अक्षान्ति-सन्निश्रयदानकर्मकः । प्रक्षः कतमः । सम्यक् चोदितस्य मोहांशिका अवद्यप्रच्छादना । कौकृत्यास्पर्श विहारसन्नि-श्रयदानकर्मकः । प्रदाशः कतमः । प्रतिघांशिकः क्रोधोपनाहपूर्वङ्ग-मश्चेतस आघातः । उच्चप्रगाढपारुष्य-वचनसन्निश्रयदानकर्मकः अपुण्यप्रसवकर्मकः अस्पर्शवि-हारकर्मकश्च ॥ ईर्ष्या कतमा । लाभसत्काराध्य-वसितस्य परसंपत्तिविशेषे द्वेषांशिकः अ(मर्ष) कृतश्चेतसो व्यारोषः। दौर्मनस्यास्पर्शविहारकर्मकः। मात्सर्य कतमत्। लाभसत्काराध्यवसितस्य परिष्कारेषु रागांशिश्चेतस आग्रहः । असंलेखसन्निश्रयदानकर्मकम् ॥ माया कतमा । लाभसत्काराध्यवसितस्य रागमोहांशिका अभूतगुणसंद-र्शना । मिथ्याजीवसन्निश्रयदानकर्मिका ॥ शाठ्यं क (तमत्) । लाभसत्काराध्यवसितस्य रागमोहांशिका भूत-दोषविमालना । सम्यगववादलाभपरिपन्थकरम् ॥ मदः कतमः । आरोग्यं वा आगम्य यौवनं वा दीर्घायुष्क-लक्षणं घोषलभ्यान्यतमान्यतमां वा सास्रवां संपत्तिं रागांशिकन्नन्दीसौमनस्यम् । सर्व्वक्लेशोपक्लेशसन्नि-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्रयदानकर्मकः ॥ विहिन्सा कतमा । प्रति(घांशि)का निर्घृणता निष्करुणता निर्दयता । विहेठनकर्मिका ॥ आह्रीक्यं कतमत् । रागद्वेषमोहांशिका स्वयमवद्येनालज्जना । सर्व्वक्लेशसाहाय्यकर्मकम् ॥ अनपत्राप्यं कतमत् । रागद्वेषमोहांशिका परतोऽवद्येनालज्जना । सर्व्वक्लेशोपक्लेशसाहाय्यकर्मकम् ॥

स्त्यानं कतमत् । मोहांशिका चित्ताकर्मण्यता । सर्व्वक्लेशोपक्लेशसाहाय्यकर्मकम् ॥ औद्धत्यं कतमत् । शुभनिमित्तमनुसरतो रागांशिकश्चेतसोऽव्युपशमः । शमथपरिपन्थकर्मकम् ॥ आश्रद्ध्यं कतमत् । मोहांशिकः कुशलेषु धर्मेषु चेतसोऽनभिसंप्रत्ययोऽप्रसादोऽनभिलाषः । कौसीद्यसन्निश्रयदानकर्मकम् ॥ कौसीद्यं कतमत् । निद्रापार्श्वशयन सुखल्लिकामागम्य मोहांशिकश्चेतसोऽनभ्युत्साहः । कुशलपक्षप्रयोगपरिपन्थकर्मकम् ॥ प्रमादः कतमः । सकौसीद्यान् रागद्वेषमोहान्निश्रित्य कुशलानां धर्माणामभावना सास्रवेभ्यश्च धर्मेभ्यश्चेतसोऽनारक्षा । अकुशलवृद्धिकुशलपरिहाणिसन्निश्रयदानकर्मकः । मुषितस्मृतिता कतमा । क्लेशसंप्रयुक्ता स्मृतिः । विक्षेपसन्निश्रयदानकर्मिका । असंप्रजन्यं कतमत् । क्लेशसंप्रयुक्ता प्रज्ञा यया असंविदिता कायवाक्चित्तचर्या प्रवर्तते । आपत्तिसन्निश्रयदानकर्मकम् । विक्षेपः कतमः । रागद्वेषमोहांशिकश्चेतसो विसारः । स पुनः स्वभावविक्षेपः बहिर्धाविक्षेपः अध्यात्मविक्षेप निमि(त्त) विक्षेपः दौष्ठुल्यविक्षेपः मनसिकारविक्षेपश्च । स्वभावविक्षेपः कतमः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पञ्च विज्ञान कायाः ॥ बहिर्धा विक्षेपः कतमः । कुशलप्रयुक्तस्य प्रंचसु कामगुणेषु चेतसो विसारः ॥ आध्यात्मविक्षेपः कतमः कुशलप्रयुक्तस्य लयौद्धत्या-स्वादना ॥ निमित्तविक्षेपः कतमः । परसंभावनां पुरस्कृत्य कुशलप्रयोगः ॥ दौष्ठुल्यविक्षेपः कतमः । अहंकारममकारास्मिमानपक्ष्यं दौष्ठुल्यमागम्य कुशल-प्रयुक्तस्योत्पन्नोत्पन्नेषु वेदितेष्वहमिति वा ममेति वा अस्मीति वा उद्ग्रहो व्यवकिरणा निमित्तीकारः । मनसिकारविक्षेपः कतमः । समापत्त्यन्तरं वा यानान्तरं वा समापद्यमानस्य संश्रयतो वा यो विसारः । वैराग्यपरि पन्थकर्मकः ॥ मिद्धं कतमत् । मिद्धनिमित्तमागम्य मोहांशिकश्चेतसोऽभिसंक्षेपः कुशलः अकुशलः अव्याकृतः काले वा अकाले वा युक्तो वा अयुक्तो वा । कृत्याविपत्तिसन्निश्रयदान कर्मकम् ॥ कौकृत्यं कतमत् । यदभिप्रेतानभिप्रेतं कारणाकारण-मागम्य मोहांशिकश्चेतसो विप्रतिसारः । कुशलम-कुशलमव्याकृतं काले अकाले युक्तमयुक्तञ्च । चित्तस्थितिपरिपन्थकर्मकः ॥ वितर्कः कतमः । चेतनां वा निश्रित्य प्रज्ञां वा पर्येषको मनोजल्पः । सा च चित्तस्यौदारिकता ॥ विचारः कतमः । चेतनां वा निश्रित्य प्रज्ञां वा प्रत्यवेक्षको मनोजल्प । सा च चित्तस्य सूक्ष्मता । स्पर्शास्पर्शविहारसंनिश्रयदाकर्मकौ । अपि खलु कुशलानां धर्माणां स्वविपक्षप्रहाणं कर्म । क्लेशोपक्लेशानां स्वप्रतिपक्षपरिपन्थनं कर्म ॥[७६]

---

७६. अ.ध.स. पृ. ५-१०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२१. तत्र चित्तविप्रयुक्तसंस्कारास्त्रयोदश । प्राप्तिः, अप्राप्तिः, सभागता, असंज्ञिकम्, समाप्तिः, जीवितम्, जातिः, जरा, स्थितिः, अनित्यता, नामकायः, पदकायः, व्यञ्जनकायश्चेति ॥

प्राप्तिः, अप्राप्तिः, सभागता, असंज्ञिकम्, समाप्तिः, जीवितम्, जातिः, जरा, स्थितिः, अनित्यता, नामकायः, पदकायः, व्यञ्जनकायश्चेति ।

आचार्य असंगः चित्तविप्रयुक्तसंस्काराणां संख्यां व्याख्यां च प्रकाशयति अभिधर्मसमुच्चये यथा —

चित्त विप्रयुक्ताः संस्काराः कतमे । प्राप्तिरसंज्ञिसमापत्तिनिरोधसमापत्तिरासंज्ञिकं जीवितेन्द्रियं निकायसभागता जातिर्जरा स्थितिरनित्यता नामकायाः पदकायाः व्यञ्जनकायाः पृथग्जनत्वं प्रवृत्तिः प्रतिनियमो योगः जवोऽनुक्रमः कालो देशः संख्या सामग्री च । प्राप्तिः कतमा । कुशलाकुशलानां धर्माणामाचयापचये प्राप्तिः प्रतिलम्भः समन्वागम इति प्रज्ञप्तिः ॥ असंज्ञिसमापत्तिः कतमा । शुभकृत्स्नवीतरागस्योपर्यवीतरागस्य निःसरणसंज्ञापूर्वकेण मनसिकारेणास्थावराणां चित्तचैतसिकानां धर्माणां निरोधे असंज्ञिसमापत्तिरिति प्रज्ञप्तिः॥ निरोधसमापत्तिः कतमा । आकिंचन्यायतनवीतरागस्य भवाग्रादुच्चलितस्य शान्तविहारसंज्ञापूर्वकेण मनसिकारेणास्थावराणां चित्तचैतसिकानां धर्माणां निरोधे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

निरोधसमापत्तिरिति प्रज्ञप्तिः ॥ आसंज्ञिकं कतमत् । असंज्ञिसत्वेषुदेवेषूपपन्नस्यास्थावराणां चित्तचैतसिकानां धर्माणां निरोधे आसंज्ञिकमिति प्रज्ञप्तिः ॥ जीवितेन्द्रियं कतमत् । निकायसभागे पूर्वकर्माविद्धे स्थितिकालनियमे आयुरिति प्रज्ञप्तिः ॥ निकायसभागः कतमः । तेषां तेषां सत्त्वानां तस्मिं स्तस्मिन् सत्त्वनिकाये आत्मभावसदृशतायां निकायसभाग इति प्रज्ञप्तिः । जातिः कतमा । निकायस-भागे संस्काराणामभूत्वाभावे जातिरिति प्रज्ञप्तिः ॥ जरा कतमा । निकायसभागे संस्काराणां प्रबन्धान्यथात्वे जरेति प्रज्ञप्तिः ॥ स्थितिः कतमा । निकायसभागे प्रबन्धाविप्रणाशे स्थितिरिति प्रज्ञप्तिः ॥ अनित्यता कतमा । निकायसभागे संस्काराणां प्रबन्धविनाशे अनित्यतेति प्रज्ञप्तिः ॥ नामकायाः कतमे । धर्माणां स्वभावाधिवचने नामकाया इति प्रज्ञप्तिः ॥ पदकायाः कतमे । धर्माणां विशेषाधिवचने पदकाया इति प्रज्ञप्तिः ॥ व्यञ्जनकायाः कतमेः तदुभयाश्रयेष्वक्षरेषु व्यञ्जनकाया इति प्रज्ञप्तिः । तदुभयाभिव्यञ्जनतामुपादाय । वर्णोऽपि सः । अर्थसंवर्णनतामुपादाय । अक्षरे पुनः पर्यायाक्षरणतामुपादाय ॥ पृथग्जनत्वं कतमत् । आर्यधर्माणामप्रतिलाभे पृथग्जनत्वमिति प्रज्ञप्तिः । प्रवृत्तिः कतमा । हेतुफल प्रबन्धानुपच्छेदे प्रवृत्तिरिति प्रज्ञप्तिः ॥ प्रतिनियमः कतमः । हेतुफलनानात्वे प्रतिनियम इति प्रज्ञप्तिः । योगः कतमः । हेतुफलानुरूप्ये योग इति प्रज्ञप्तिः ॥ जवः कतमः । हेतुफलाशुप्रवृत्तौ जव इति प्रज्ञप्तिः ॥ अनुक्रमः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कतमः । हेतुफलैकत्ये प्रवृत्तौ अनुक्रम इति प्रज्ञप्तिः । कालः कतमः । हेतुफलप्रबन्धप्रवृत्तौ काल इति प्रज्ञप्तिः। देशः कतमः । पूर्वदक्षिणपश्चिमोत्तरा धरोर्ध्वासु सर्वतो दशसु दिक्षु हेतुफल एव देश इति प्रज्ञप्तिः । संख्या कतमा । संस्काराणां प्रत्येकशो भेदे संख्येति प्रज्ञप्तिः ॥ सामग्री कतमा । हेतुफलप्रत्ययसमवधाने सामग्रीति प्रज्ञप्तिः ।[७७]

३२. त्रीण्यसंस्कृतानि । तद्यथा–आकाशः, प्रतिसंख्यानिरोधः, अप्रतिसंख्यानिरोधश्चेति ॥

कतमत् त्रिविधमसंस्कृतम्?
आकाशं द्वौ निरोधौ च,

कतमौ द्वौ? प्रतिसंख्यानिरोधः, अप्रतिसंख्यानिरोधश्चेति । एतदाकाशादि त्रिविधमसंस्कृतं मार्गसत्यं चानास्रवा धर्माः ।

किं कारणम्? न हि तेष्वास्रवा अनुशेरत इति ।

यदेतत् त्रिविधमसंस्कृतमुद्दिष्टम्,

तत्राकाशमनावृतिः

---

७७. अ.ध.स. पृ १०-११

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अनावरणास्वभावमाकाशम्, यत्र रूपस्य गतिः। प्रतिसंख्यानिरोधो यो विसंयोगः यः सास्रवैर्धर्मैर्विसंयोगः स प्रतिसंख्यानिरोधः । दुःखादीनामार्यसत्यानां प्रति प्रतिसंख्यानं प्रतिसंख्या-प्रज्ञाविशेषस्तेन प्राप्यो निरोधः प्रतिसंख्यानिरोधः ।[७८]

उत्पादात्यन्तविघ्नोऽन्यो निरोधोऽप्रतिसंख्यया ।

अनागतानां धर्माणामुत्पादस्यात्यन्तं विघ्नभूतो विसंयोगाद् योऽन्यो निरोधः सोऽप्रतिसंख्यानिरोधः । न ह्यसौ प्रतिसंख्या लभ्यते, किं तर्हि? प्रत्ययवैकल्यात् ।

यथैकरूपव्यासक्तचक्षुर्मनसो यानि रूपान्तराणि शब्दगन्धरसस्प्रष्टव्यानि चात्ययन्ते तदालम्बनैः पञ्चभिर्विज्ञानकायैर्न शक्यमुत्पत्तुम्, न हि ते समर्था अतीतं विषयमालम्बयितुमिति । अतः स तेषामप्रतिसंख्यानिरोधः प्रत्ययवैकल्यात् प्राप्यते ।[७९]

आचार्य असंगः असंस्कृतधर्मविषये यथाह अभिधर्म समुच्चये —

धर्मधातावसंस्कृता धर्माः । तेऽसंस्कृताधर्माः पुनरष्टधा । कुशलधर्मतथता अकुशलधर्मतथता अव्याकृत-

---

७८. अ.ध.को.भा. १ पृ. १९ - २०
७९ " " " " पृ. २२ - २३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धर्मतथता आकाशम् अप्रतिसंख्यानिरोधः प्रतिसंख्यानिरोधः आनिंज्यं संज्ञावेदयितनिरोधश्च ॥ कुशलधर्मतथता कतमा। नैरात्म्यम् । सा पुनरुच्यते शून्यता अनिमित्तं भूतकोटिः परमार्थो धर्मधातुश्च ॥ किमुपादाय तथता तथतोच्यते । अनन्यथाभावतामुपादाय । किमुपादाय तथता नैरात्म्यमुच्यते । द्विविधात्मविप्रयुक्ततामुपादाय । किमुपादाय तथता शून्यतोच्यते । सर्वसंक्लेशा-प्रचारतामुपादाय । किमुपादाय तथता अनिमित्तमुच्यते । सर्वनिमित्तोपशमतामुपादाय । किमुपादाय तथता भूत-कोटिरुच्यते । अविपर्यासालम्बनतामुपादाय । किमुपादाय तथता परमार्थ उच्यते । परमार्थज्ञानगोचरस्थानतामुपा-दाय । किमुपादाय तथता धर्मधातुरुच्यते । सर्वेषां श्रावकाणां प्रत्येकबुद्धानां च बुद्ध धर्मनिमित्ताश्रय-तामुपादाय ॥ यथा कुशलधर्मतथता तथा अकुशलधर्म-तथता अव्याकृत धर्मतथता च ज्ञेया ॥ आकाशं कतमत् । रूपाभावः सर्वकृत्यावकाशतामुपादाय ॥ अप्रतिसंख्यानिरोधः कतमः । यो निरोधो न विसंयोगः । प्रतिसंख्यानिरोधः कतमः । यो निरोधो विसंयोगः ॥ आनिंज्यं कतमत् । शुभकृत्स्नवीतरागस्योपर्यवीतरागस्य सुखनिरोधः ॥ संज्ञावेदयितनिरोधः कतमः । आकिंचन्या-यतनवीतरागस्य भावाग्रादुच्चलितस्य शान्तविहारसंज्ञा-मनसिकारपूर्वकेण अस्थावराणां चित्त चैतसिकानां धर्माणां तदैकत्यानां च स्थावराणां निरोधः । पंचरूपाणि वेदना-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संज्ञासंस्कारस्कन्धाः तेऽष्टौ असंस्कृता धर्माश्चैवं ते षोडश धर्मधातव उच्यन्ते ।[८०]

३३. षड् विषयाः । तद्यथा–रूपम्, शब्दः, गन्धः, रसः, स्पर्शः, धर्मश्चेति ॥

चक्षुरादिषड्इन्द्रियाणां षड्विषयाः तद्यथा चक्षुष रूपम् श्रोत्रस्य शब्दः घ्राणस्य गन्धः जिह्वायाः रसः, कायस्य स्पर्शः मनसो धर्मश्चेति ।

३४. तत्र(विंशतिः) रूपं विषयस्वभावम् । नीलम्, पीतम्, लोहितम्, अवदातम्, हरितम्, दीर्घम्, ह्रस्वम्, परिमण्डलम्, उन्नतम्, अवनतम्, सातम्, विसातम्, अच्छम्, धूमः, रजः, महिका, छाया, आतपः, आलोकः, अन्धकारश्चेति ।

रूपविषये अभिधर्मसमुच्चये इत्याह —

रूपं कतमत् । चत्वारि महाभूतान्युपादाय चक्षुरिन्द्रियगोचरोऽर्थः । यथाः नीलं पीतं लोहितमवदातं दीर्घं ह्रस्वं वृत्तं परिमण्डलं स्थूलं सूक्ष्ममुन्नतमवनतं सातं विसातमातपः छाया आलोकोऽन्धकारमभ्रं धूमो रजो महिमा च । अभ्यवकाशरूपं विज्ञप्तिरूपं नभ एकवर्णं

---

८०. अ.ध.स. पृ. १२ - १३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रूपम् ॥ तत् पुनस्त्रिधा । शोभनमशोभनमुभय-
विपरीतं च ॥[८१]

३५. अष्टाविंशतिविधः शब्दः । सप्त पुरुषवाक्शब्दाः, सप्त पुरुषहस्तादिशब्दाः । एत एव मनोज्ञामनोज्ञभेदेनाष्टाविंशतिः ॥

शब्दः कतमः । चत्वारि महाभूतान्युपादाय श्रोत्रेन्द्रियग्राह्योऽर्थः । मनोज्ञो वा अमनोज्ञो वा उभयविपरीतो वा । उपात्तमहाभूतहेतुको वा अनुपात्तमहाभूतहेतुको वा तदुभयो वालोकप्रसिद्धो वा सिद्धोपनीतो वा परिकल्पितो वा आर्यैर्देशितो वा तीर्थ्यैर्दशितो वा ॥[८२]

चतुर्विधः शब्द-मनोज्ञ-अमनोज्ञ-भेद पुनः अष्टविधः ।

प्रथम प्रकारः यथा हस्त शब्द, वाक्शब्द

द्वितीय प्रकारः यथा–वायु, वनस्पति, नदी शब्द

तृतीय प्रकारः यथा वाग्विज्ञप्ति शब्द ।

चतुर्थ प्रकारः अन्य शब्द

८१. अ.ध.स. पृ. ३ - ४
८२. " " पृ. ४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विध शब्दः उपात्तमहाभूतहेतुकः । अनुपात्तमहाभूत हेतुकः । सत्त्वाख्य, । असत्त्वाख्य ।[८३]

३६. रस षड्विधः । तद्यथा - मधुरः, अम्लः, लवणः, कटुः, तिक्तः, कषायश्चेति ॥

रसः कतमः । चत्वारि महाभूताम्युपादाय जिह्वेन्द्रियग्राह्योऽर्थः । तिक्तोऽम्लो मधुरः कटुको लवणः कषायश्च । मनोज्ञो वा अमनोज्ञो वा उभयविपरीतो वा सहजो वा सांयोगिको वा पारिणामिको वा ॥[८४]

३७. चत्वारो गन्धाः । तद्यथा–सुगन्धः, दुर्गन्धः, समगन्धः, विषमगन्धश्चेति ॥

गन्धः कतमः । चत्वारि महाभूतान्युपादाय घ्राणेन्द्रियग्राह्योऽर्थः । यथा सुरभिरसुरभिः समगन्धः सहजगन्धः सांयोगिकगन्धः पारिणामिकगन्धश्च ।[८५]

३८. एकादश स्प्रष्टव्यानि । पृथ्वी, आपः, तेजः, वायुः, श्लक्ष्णत्वम्, कर्कशत्वम्, लघुत्वम्, गुरुत्वम्, शीतम्, जिघत्सा, पिपासा चेति ॥

---

८३. अ.ध.को.भा.१ पृ. ३४
८४. अ.ध.स. पृ. ४
८५. " " " "

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्प्रष्टव्यैकदेश: कतम: । चत्वारि महाभूतान्युपादाय कायेन्द्रिय ग्राह्योऽर्थ: । श्लक्ष्णत्वं कर्कशत्वं लघुत्वं गुरूत्वं पिच्छिलत्वं मन्दत्वममन्दत्वं शीतत्वमुष्णत्वं जिघत्सा पिपासा तृप्तिर्बलं दौर्बल्यं मूर्च्छा कण्डूति: पूतिर्व्याधिर्जरामरणं क्लान्तिर्विश्राम ऊर्ज्जा च ॥[८६]

३९. पञ्च महाभूतानि । पृथ्वी, आप:, तेज:, वायु:, आकाशश्चेति ॥

पृथ्वीधातु: कतम: । कठिनता ॥
अब्धातु: कतम: । निष्यन्दता ॥
तेजोधातु: कतम: । उष्णता ॥
वायुधातु: कतम: । कम्पनता ॥ [८७]
आकाशधातु: कतम: । तत्राआकाशमनावृति: ॥
अनावरणस्वभावमाकाशम्, यत्र रूपस्य गति: ।[८८]

४०. पञ्च भौतिकानि । रूपम्, शब्द:, गन्ध:, रस:, स्पर्शश्चेति ॥

भूतै: निर्मितानि भौतिकानि इति ।

---

८६. अ.ध.स. पृ. ४
८७. " " पृ. ३
८८. अ.ध.को.भा.१ पृ. १९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४१. विंशतिः शून्यताः । तद्यथा–अध्यात्मशून्यता, बहिर्धाशून्यता, अध्यात्मबहिर्धाशून्यता, शून्यताशून्यता, महाशून्यता, परमार्थशून्यता, संस्कृतशून्यता, असंस्कृतशून्यता, अत्यन्तशून्यता, अनवराग्रशून्यता, अनवकारशून्यता, प्रकृतिशून्यता, सर्वधर्मशून्यता, लक्षणशून्यता, अलक्षणशून्यता, भावशून्यता, अभावशून्यता, स्वभावशून्यता, अभावस्वभावशून्यता, परभावशून्यता चेति ॥

अध्यात्मशून्यता -

आध्यात्मिकानां चक्षुरादीनामकुटस्थाविनाशितां प्रकृतिमुपादाय अध्यात्म शून्यता ।

बहिर्धाशून्यता -

बाह्यानां रूपादीनां तथाकूटस्थाविनाशितां प्रकृतिमुपादाय बहिर्धाशून्यता ।

अध्यात्मबहिर्धाशून्यता -

अध्यात्मिकबाह्यानामायतनानां तथाऽकुटस्थाविनाशितां प्रकृतिमुपादाय अध्यात्मबहिर्धाशून्यता ।

शून्यताशुन्यता -

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मशून्यतया शून्यताया अध्यात्मादिशून्यतालम्बनज्ञानस्वभावायापि शून्यत्वेन शून्यताशून्यता ।

महाशून्यता -
दशानां दिशां दिग्भिः शून्यत्वेन महाशून्यता ।

परमार्थशून्यता -
परमस्य निर्वाणस्य निर्वाणर्थरूपशून्यत्वेन परमार्थशून्यता ।

संस्कृतशून्यता -
संस्कृतस्य त्रैधातुकस्य कामादिधातुशून्यत्वेन संस्कृत शून्यता ।

असंस्कृतशून्यता -
असंस्कृतस्यानुत्पादनिरोधनन्यथात्वस्य तेन शून्यत्वादंसंस्कृतशून्यता ।

अत्यन्तशून्यता -
अन्तस्यान्तेन शून्यत्वाद् अतीतान्तत्वेन अत्यन्तशून्यता ।

अनवराग्रशून्यता -
आदिमध्यावसानेषु तैः शून्यत्वेन अनवराग्रशून्यता ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अनवकारशून्यता -

अवकिरणच्छोरणोत्सर्गलक्षणस्य, अवकारस्य विपर्ययेण अनवकारः तस्यतेन शून्यत्वादनवकारशून्यता ।

प्रकृतिशून्यता -

सर्वार्यैरकृता प्रकृतिस्तस्यास्तया शुन्यत्वात् प्रकृति शुन्यता ।

सर्वधर्मशुन्यता -

धर्मस्य धर्मेण शून्यत्वात् सर्वधर्मशून्यता ।

लक्षणशून्यता -

रूपणादिलक्षणस्य
रूपादेस्तल्लक्षणशून्यत्वाल्लक्षणशून्यता ।

अनुपलम्भशून्यता -

अतीतादिनां धर्मानामतीतादिष्वध्वसु इतरेतर विपर्यया नुपलभ्यत्वेन अनुपलम्भशून्यता ।

अभावस्वभावशून्यता -

नास्ति सांयोगिकस्य धर्मस्य स्वभावः प्रतीत्यसमुत्पन्नत्वाद् इति संयोगस्य तेन शून्यत्वाद् अभावस्वभावशून्यता ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भावशून्यता -

भावस्योपादानस्कन्ध लक्षणस्य तेन शुन्यत्वाद् भावशून्यता ।

अभावशून्यता -

अभावस्या संस्कृतस्य, आकाशदेस्तेन शुन्यत्वाद् अभावशून्यता ।

स्वभावशून्यता -

स्वभावस्य शून्यताख्यस्य आर्याणां ज्ञानेन दर्शनेन च अकृतकत्वात् स्वभावशून्यता ।

परभावशून्यता -

उत्पादाद्वा तथागतानामनूत्पादाद्वा स्थितैव धर्माणां धर्मता इति परेण कर्त्रा शुन्यत्वात् परभावशून्यता ।[८९]

४२. द्वादशाङ्गप्रतीत्यसमुत्पादः । अविद्या, संस्काराः, विज्ञानम्, नामरूपम्, षडायतनम्, स्पर्शः, वेदना, तृष्णा, उपादानम्, भवः, जातिः, जरामरणम् शोकपरिदेवदुःखदौर्मनस्योपायासाश्चेति ।

---

८९. ध.सं.को. पृ. ८१-८७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र भिक्षवः कतमो द्वादशाङ्गः प्रतीत्यसमुत्पादः ?

यदुत–अस्मिन् सतीदं भवति, अस्योत्पादादिदमुत्पद्यते ।

यदुत–अविद्याप्रत्ययाः संस्काराः, संस्कारप्रत्ययं विज्ञानं, विज्ञानप्रत्ययं नामरूपं, नामरूपप्रत्ययं षडायतनं, षडायतनप्रत्ययः स्पर्शः, स्पर्शप्रत्यया वेदना, वेदनाप्रत्यया तृष्णा, तृष्णाप्रत्ययमुपादानं, उपादानप्रत्ययो भवः, भवप्रत्यया जातिः, जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति । एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति ।

अविद्यानिरोधात्संस्कारनिरोधः, संस्कारनिरोधाद्विज्ञाननिरोधः, विज्ञाननिरोधान्नामरूपनिरोधः, नामरूपनिरोधात्षडायतननिरोधः, षडायतननिरोधात्स्पर्शनिरोधः, स्पर्शनिरोधाद् वेदनानिरोधः, वेदनानिरोधात्तृष्णानिरोधः, तृष्णानिरोधादुपादाननिरोधः, उपादाननिरोधाद् भवनिरोधः, भवनिरोधाज्जातिनिरोधः, जातिनिरोधाज्जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासा निरुध्यन्ते । एवमस्य केवलस्य महतो दुःखस्कन्धस्य निरोधो भवति ।

तत्र कतमा अविद्या ?

यदुत–पुर्वान्तेऽज्ञानम्, अपरान्तेऽज्ञानम्, प्रत्युपन्नेऽज्ञानम्, अध्यात्मेऽज्ञानम्, बहिर्धाऽज्ञानम्, अध्यात्मबहिर्धाऽ-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानम्, कर्मण्यज्ञानम्, विपाकेऽज्ञानम्, कर्मविपाकेऽज्ञानम्, सुकृतेऽज्ञानम्, दुष्कृतेऽज्ञानम्, सुकृतदुष्कृतेऽज्ञानम्, हेतावज्ञानम्, फलेऽज्ञानम्, हेतुफलेऽज्ञानम्, हेतुसमुत्पन्नेषु धर्मेष्वज्ञानम्, प्रतीत्यसमुत्पादेष्वज्ञानम्, प्रतीत्यसमुत्पन्नेषु धर्मेषु अज्ञानम्, बुद्धेऽज्ञानम्, धर्मेऽज्ञानम्, सङ्घेऽज्ञानम्, दुःखेऽज्ञानम्, समुदयेऽज्ञानम्, निरोधेऽज्ञानम्, मार्गेऽज्ञानम्, कुशलाकुशलेषु धर्मेषु अज्ञानम्, सावद्यानवद्येषु धर्मेषु अज्ञानम्, सेवितव्यासेवितव्येषु धर्मेषु अज्ञानम्, हीनप्रणीतेषु कृष्णशुक्लेषु धर्मेषु अज्ञानम्, षट्सु वा स्पर्शायतनेषु यथाभूतमज्ञानमदर्शनमनभिसयस्तमः संमोहोऽ - विद्यान्धकारम् ।

इयमुच्यतेऽविद्येति ।

अविद्याप्रत्ययाः संस्कारा इति । संस्काराः कतमे? त्रयः संस्काराः–कायसंस्कारः, वाक्संस्कारः, मनः-संस्कारः, ।

कायसंस्कारः कतमः? आश्वासः प्रश्वासः । कायिको ह्येष धर्मः, कायनिश्रितः, कायप्रतिबद्धः, कायं निश्रित्य वर्तते । तस्मादाश्वासः प्रश्वासः कायसंस्कार इत्युच्यते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वाक्संस्कार: कतम:? वितर्क्य विचार्य वाचं भाषते, नावितर्क्य, नाविचार्य । तस्माद्वितर्कविचारो वाक्संस्कार इत्युच्यते ।

मन:संस्कार: कतम:? रक्तस्य या चेतना, द्विष्टस्य या चेतना, मूढस्य या चेतना । चैतसिको ह्येष धर्म:, चित्तनिश्रित:, चित्तप्रतिबद्ध:, । चित्तं निश्रित्य प्रवर्तते । तस्माच्चेतना मन:संस्कार इत्युच्यते ।

इमे भिक्षव: त्रय: संस्कारा उच्यन्ते ।

संस्कारप्रत्ययं विज्ञानमिति । विज्ञानं कतमत्? षड विज्ञानकाया: । कतमे षट्? तद्यथा–चक्षुर्विज्ञानं, श्रोत्रविज्ञानं, घ्राणविज्ञानं, जिह्वाविज्ञानं, कायविज्ञानं, मनोविज्ञानम् ।

इमे षड् विज्ञानकाया विज्ञानमित्युच्यन्ते ।

विज्ञानप्रत्ययं नामरूपमिति । तत्र कतमन्नाम? चत्वारोऽरूपिण: स्कन्धा: । कतमे चत्वार:? वेदनास्कन्ध:, संज्ञास्कन्ध:, संस्कारस्कन्ध:, विज्ञानस्कन्ध: । इदं नाम ।

रूपं कतमत्? यत्किंचिद्रूपं सर्वं तत्–चत्वारि महाभूतानि, चत्वारि च महाभूतान्युपादाय । कतमानि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चत्वारि? तद्यथा–पृथिवीधातुः अब्धातु, तेजोधातुः, वायुधातुश्चः । पृथिवीधातुः कतमः? यद् गुरुत्वं कक्खटत्वं च । अब्धातुः कतमः? यद्द्रवत्वमभिष्यन्दनत्वं च । तेजोधातुः कतमः? यदुष्णत्वं च परिपाचनत्वं च । वायुधातुः कतमः? यदाकुञ्चन-प्रसारणलघुसमुदीरणत्वं च । यदिदं रूपं पूर्वकं च नाम तदुभयमेकत्राभिसंक्षिप्य नामरूपमित्युच्यते ।

नामरूपप्रत्ययं षडायतनमिति । षडायतनं कतमत्? षडाध्यात्मिकान्यायतनानि । तद्यथा–चक्षुरायतनं श्रोत्रायतनं, घ्राणायतनं, जिह्वायतनं, कायायतनं, मन आयतनम् ।

इदमुच्यते षडायतनम् ।

षडायतनप्रत्ययः स्पर्श इति । स्पर्शः कतमः? षट् स्पर्शकायाः । कतमे षट्? चक्षुःसंस्पर्शः, श्रोत्रसं-स्पर्शः, घ्राणसंस्पर्शः, जिह्वासंस्पर्शः, कायसंस्पर्शः, मनःसंस्पर्श इति ।

अयमुच्यते स्पर्शः ।

स्पर्शप्रत्यया वेदनेति । वेदना कतमा? षड् वेदनाकायाः । चक्षुः–संस्पर्शजा वेदना–सुखा, दुःखा,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अदु:खासुखा च । एवं श्रोत्रघ्राणजिह्वाकायमनः-संस्पर्शजा वेदना–सुखा, दु:खा, अदु:खासुखा च ।

इयमुच्यते वेदना ।

वेदनाप्रत्यया तृष्णेति । तृष्णा कतमा? षट् तृष्णाकायाः । कतमे षट्? रूपतृष्णा शब्दतृष्णा, गन्धतृष्णा, रसतृष्णा, स्पर्शतृष्णा, धर्मतृष्णेति ।

तृष्णाप्रत्ययमुपादानमिति । उपादानं कतमत्? चत्वार्युपादानानि । कतमानि चत्वारि? कामोपादानं, दृष्ट्युपादानं, शीलव्रतोपादानं आत्मवादोपादानं चेति ।

उपादानप्रत्ययो भव इति । भवः कतमः? त्रयो भवाः । कतमे त्रयः? तद्यथा–कामभवः, रूपभवः, आरूप्यभवः ।

तत्र कामभवः कतमः? तद्यथा-उष्णनरका अष्टौ । कतमेऽष्टौ? तद्यथा–संजीवः, कालसूत्रः, सङ्घातः, रौरवः, महारौरवः, तपनः, प्रतापनः, अवीचिश्च ।

शीतनरका अष्टौ । कतमेऽष्टौ? तद्यथा–अर्बुदः, निरर्बुदः, अटटः, हहवः हुहुवः, उत्पलः, पद्मः, महापद्म ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रेताः, तिर्यञ्चः, मनुष्याः, षट् कामावचराश्च देवाः,।कतमे षट्? चातुर्महाराजिकाः, त्रायस्त्रिंशाः, यामाः, तुषिताः, निर्माणरतयः, परनिर्मितवशवर्तिनो देवाः ।

तत्र रूपभवः कतमः ? तद्यथा–ब्रह्मकायिकाः, ब्रह्मपुरोहिताः, महाब्रह्माणः, परीत्ताभाः, अप्रमाणाभाः, आभास्वराः, परीत्तशुभाः, शुभकृत्स्नाः, अनभ्रकाः, पुण्यप्रसवाः, बृहत्फलाः, अवृहाः, अतपाः, सुदृशाः, सुदर्शनाः, अकनिष्ठाश्चेति ।

आरूप्यभवः कतमः । तद्यथा– आकाशानन्त्यायतनं, विज्ञानानन्त्यायतनं, आकिंचन्यायतनं, । नैवसंज्ञानासंज्ञायतनम् । अरूपिणां देवानां चित्तमात्रध्यायिनां चतुर्विधोपपत्तिः । अयमुच्यते आरूप्यधातुः ।

इमे त्रयो भवाः ।

भवप्रत्यया जातिरिति । जातिः कतमा? या तेषां तेषां सत्त्वानां तस्मिंस्तस्मिन् सत्त्वनिकाये जातिः, संजातिः, उपपत्तिः, अवक्रान्तिः, अभिनिर्वृत्तिः, प्रादुर्भावः, स्कन्धप्रतिलम्भः, आयतनानां प्रतिलम्भः, स्कन्धानामभिनिर्वृत्तिः, जीवितेन्द्रियस्योद्भवः निकायसभागतायाः समवधानम् ।

इयमुच्यते जातिः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जातिप्रत्ययं जरामरणमिति। जरा कतमा ? यत् खालित्यं, पालित्यं, वलीप्रचुरता, जीर्णता, भुग्नता, कुब्जगोपानसीवक्रता, खुरुखुरुनिश्वासप्रश्वास - कण्ठता, तिलकालोपहतगात्रता दण्डावष्टम्भनता, पुरतः प्राग्भार-कायता इन्द्रियाणां परिपाकः परिभेदः, संस्काराणां पुराणीभावो जर्जरीभावश्चः धन्धत्वं, मन्दत्वं, हानिः, परिहाणिः ।

इयमुच्यते जरा ।

मरणं कतमत्? यत्तेषां तेषां सत्त्वानां तस्मात्त-स्मात्सत्त्वनिकायाच्च्युतिः, च्यवनता, भेदः, अन्तर्हाणिः, मरणं, कालक्रिया, आयुषो हानिः, ऊष्मणो हानिः, जीवितेन्द्रिस्य निरोधः, स्कन्धानां निक्षेपः ।

इदमुच्यते मरणम् ।

यदेतन्मरणं पूर्वका च जरा तदुभयमेकत्राभि-संक्षिप्य जरामरणमित्युच्यते ।

अयं भिक्षवो द्वादशाङ्गः प्रतीत्यसमुत्पादः ।[१०]

४३. सप्तत्रिंशद्बोधिपाक्षिका धर्माः । चत्वारि स्मृत्युपस्थानानि, चत्वारि सम्यक्प्रहाणानि, चत्वार ऋद्धिपादाः, पञ्चेन्द्रियाणि, पञ्च

---

१०. अ.वि.सू. पृ. ५-१४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बलानि, सप्त बोध्यङ्गानि, आर्याष्टाङ्गिक-मार्गाश्चेति ।

४४. तत्र कतमानि स्मृत्युपस्थानानि? तद्यथा–काये कायानुदर्शस्मृत्युपस्थानम्, वेदनायां वेदनानुदर्शस्मृत्युपस्थानम्, चित्ते चित्तानुदर्शस्मृत्युपस्थानम्, धर्मे धर्मानुदर्श-स्मृत्युपस्थानम् ॥

तत्र भिक्षवः कतमानि चत्वारि स्मृत्युपस्थानानि?

इह भिक्षवो भिक्षुरध्यात्मं काये कायानुदर्शी विहरति, आतापी संप्रजानन् स्मृतिमान् विनीय लोके अभिध्यादौर्मनस्ये । बहिर्धा काये कायानुदर्शी विहरति । अध्यात्मबहिर्धाकाये कायानुदर्शी विहरति आतापी संप्रजानन् स्मृतिमान् विनीय लोकेऽभिध्यादौर्मनस्ये ।

अध्यात्मवेदनासु, बहिर्धावेदनासु, अध्यात्मबहिर्धावेदनासु वेदनानुदर्शी विहरति आतापी संप्रजानन् स्मृतिमान् विनीय लोके अभिध्यादौर्मनस्ये ।

अध्यात्मचित्ते, बहिर्धाचित्ते, अध्यात्मबहिर्धाचित्ते चित्तानुदर्शी विहरति आतापी संप्रजानन् स्मृतिमान् विनीय लोके अभिध्यादौर्मनस्ये ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अध्यात्मधर्मेषु बहिर्धाधर्मेषु, अध्यात्मबहिर्धाधर्मेषु धर्मानुदर्शी विहरति आतापी संप्रजानन् स्मृतिमान् विनीय लोके अभिध्यादौर्मनस्ये ।[९१]

इमानि भिक्षवश्चत्वारि स्मृत्युपस्थानानि ।

४५. कतमानि चत्वारि सम्यक्प्रहाणानि ? तद्यथा– उत्पन्नानां कुशलमूलानां संरक्षणम् । अनुत्पन्नानां समुत्पादः । उत्पन्नानामकुशलानां धर्माणां प्रहाणम् । अनुत्पन्नानां पुनरनुत्पादश्चेति ॥

तत्र भिक्षवः कतमानि चत्वारि सम्यक्प्रहाणानि?

इह भिक्षवो भिक्षुरुत्पन्नान्नां पापकानामकुशलानां धर्माणां प्रहाणाय छन्दं जनयति व्यायच्छते वीर्यमारभते चित्तं प्रगृह्णाति सम्यक् प्रणिदधाति ।

अनुत्पन्नानां च पापकानामकुशलानां धर्माणामनुत्पादाय छन्दं जनयति, व्यायच्छते वीर्यमारभते, चित्तं प्रगृह्णाति सम्यक् प्रणिदधाति ।

अनुत्पन्नानां कुशलानां धर्माणामुत्पादाय छन्दं जनयति व्यायच्छते वीर्यमारभते चित्तं प्रगृह्णाति सम्यक् प्रणिदधाति ।

---

९१. अ.वि.सू. पृ. २८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उत्पन्नानां च कुशलानां धर्माणां स्थितये असम्मोषाय अप्रहाणाय भूयोभावाय वैपुल्यतायै परिपूर्यै छन्दं जनयति व्यायच्छते वीर्यमारभते चित्तं प्रगृह्णाति सम्यक् प्रणिदधाति ।

इमानि भिक्षवश्चत्वारि सम्यक्प्रहाणानि ।[९२]

४६. चत्वारः ऋद्धिपादाः । तद्यथा– छन्दसमाधि-प्रहाणाय संस्कारसमन्वागत ऋद्धिपादः । एवं चित्तऋद्धिपादः । वीर्य–ऋद्धिपादः । मीमांसासमाधिप्रहाणाय संस्कार समन्वागत-ऋद्धिपादश्चेति ॥

तत्र भिक्षवः कतमे चत्वार ऋद्धिपादाः?

इह भिक्षवो भिक्षुश्छन्दसमाधिप्रहाणसंस्कारसम-न्वागतमृद्धिपादं भावयति विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतम्; आत्मछन्दो नातिलीनो भविष्यति नातिप्रगृहीतः ।

वीर्यसमाधिप्रहाणसंस्कारसमन्वागतमृद्धिपादं भाव-यति विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्ग-परिणतम्; आत्मवीर्यं नातिलीनं भविष्यति नातिप्रगृहीतम् ।

---

९२. अ.वि.सू. पृ.२९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चित्तसमाधिप्रहाणसंस्कारसमन्वागतमृद्धिपादं भावयति विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतम्;आत्मचित्तं नातिलीनं भविष्यति नातिप्रगृहीतम्।

मीमांसासमाधिप्रहाणसंस्कारसमन्वागतमृद्धिपादं भावयति विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतम्; आत्ममीमांसा नातिलीना भविष्यति नातिप्रगृहीता ।

इमे भिक्षवश्चत्वार ऋद्धिपादाः ।[९३]

४७. पञ्चेन्द्रियाणि । तद्यथा–श्रद्धासमाधिवीर्यस्मृतिप्रज्ञेन्द्रियं चेति ॥

तत्र भिक्षवः कतमानि पञ्चेन्द्रियाणि ?

यदुत श्रद्धेन्द्रियम्, वीर्येन्द्रियम्, स्मृतीन्द्रियम्, समाधीन्द्रियम्, प्रज्ञेन्द्रियम् ।

तत्र कतमत् श्रद्धेन्द्रियम् ?

यथा श्रद्धया चतुरो धर्मान् श्रद्दधाति । कतमांश्चतुरः? संसारावचरां लौकिकीं सम्यग्दृष्टिं श्रद्दधाति ।

---

९३. अ.वि.सू. पृ.३०–३१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स कर्मविपाकप्रतिशरणो भवति । यद्यदेव कर्म करिष्यामि कल्याणं वा पापकं वा, तस्यैव कर्मणो विपाकं प्रतिसंवेदयिष्यामि । स जीवितहेतोरपि पापकं कर्म नाभिसंस्करोति ।

इदमुच्यते श्रद्धेन्द्रियम् ।

तत्र कतमद् वीर्येन्द्रियम् ?

यान् धर्मान् श्रद्धेन्द्रियेण श्रद्दधाति तान् धर्मान् वीर्येन्द्रियेण समुदानयति ।

इदमुच्यते वीर्येन्द्रियम् ।

तत्र कतमत् स्मृतीन्द्रियम् ?

यान् धर्मान् वीर्येन्द्रियेण समुदानयति तान् धर्मान् स्मृतीन्द्रियेण न विप्रणाशयति ।

इदमुच्यते स्मृतीन्द्रियम् ।[९४]

तत्र कतमत् समाधीन्द्रियम् ।

यान् धर्मान् स्मृतीन्द्रियेण न विप्रणाशयति तान् धर्मान् समाधीन्द्रियेण एकाग्रीकरोति ।

---

९४. अ.वि.सू. पृ. ३१-३२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इदमुच्यते समाधीन्द्रियम् ।

तत्र कतमत् प्रज्ञेन्द्रियम् ?

यान् धर्मान् समाधीन्द्रियेण एकाग्रीकरोति तान् धर्मान् प्रज्ञेन्द्रियेण प्रतिविध्यते । स तेषु धर्मेषु प्रत्यवेक्षण-जातीयो भवति ।

इदमुच्यते प्रज्ञेन्द्रियम् ।

इमानि भिक्षवः पञ्चेन्द्रियाणि ।[९५]

४८. पञ्च बलानि । श्रद्धावीर्यस्मृतिसमाधिप्रज्ञा-बलं चेति ॥

तत्र भिक्षवः कतमानि पञ्च बलानि ? यदूत श्रद्धाबलम्, वीर्यबलम्, स्मृतिबलम्, समाधिबलम्, प्रज्ञाबलम् । इमानि भिक्षवः पञ्चबलानि ।

कथं चैषां बलं बलम्? यस्मात्तद्विपक्षैरश्रद्धाकौसीद्यमुषितस्मृतिविक्षेपासम्प्रजन्यैरन्तरासमुदाचाराभावात् तानि नावमृद्यन्ते, तस्माद् बलान्युच्यन्ते । इन्द्रियाणि पुनस्तद्वि-

---

९५. अ.वि.सू. पृ.३२-३३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पक्षैः पञ्चभिरन्तरान्तरा समुदाचारादवमृद्यन्ते । तस्माद-निर्जितविपक्षत्वादिन्द्रियाण्युच्यन्ते।व्याख्यातानिबलानि ॥[१६]

४९. सप्त बोध्यङ्गानि । तद्यथा–स्मृतिसंबोध्यङ्गम्, धर्मप्रविचयसंबोध्यङ्गम्, वीर्यसंबोध्यङ्गम्, प्रीतिसंबोध्यङ्गम्, प्रस्रब्धि–संबोध्यङ्गम्, समाधिसंबोध्यङ्गम्, उपेक्षा– संबोध्यङ्गमिति ॥

तत्र भिक्षवः कतमानि सप्त बोध्यङ्गानि ? तद्यथा स्मृतिसंबोध्यङ्गम्, धर्मप्रविचयसंबोध्यङ्गम्, वीर्यसंबोधयङ्गम्, प्रीतिसंबोध्यङ्गम्, प्रश्रब्धिसंबोध्यङ्गम्, समाधिसंबोध्यङ्गम्, उपेक्षासंबोध्यङ्गम् ।

इह भिक्षवो भिक्षुः स्मृतिसंबोध्यङ्गं भावयति विवेकनिश्रितं विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम् ।

एवं धर्मप्रविचयं संबोध्यङ्गं भावयति विवेकनिश्रितं, विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम् ।

वीर्यसंबोध्यङ्गं भावयति विवेकनिश्रितं, विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम् ।

---

१६. अ.वि.सू. पृ.२२६–२२७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रीतिसंबोध्यङ्गं भावयति विवेकनिश्रितं, विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम् ।

प्रश्रब्धिसंबोध्यङ्गं भावयति विवेकनिश्रितं, विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम् ।

समाधिसंबोध्यङ्गं भावयति विवेकनिश्रितं, विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम् ।

उपेक्षासंबोध्यङ्गं भावयति विवेकनिश्रितं, विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम् ।

इमानि भिक्षवः सप्त बोध्यङ्गानि ।[९७]

५०. आर्याष्टाङ्गिकमार्गः ॥ सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यग्वाक्, सम्यक्कर्मान्तः, सम्यक्जीविकाः, सम्यग्व्यायामः, सम्यक्स्मृतिः, सम्यक्समाधिश्चेति । एते सप्तत्रिंशद्बोधिपाक्षिका धर्माः ॥

तत्र भिक्षवः कतम आर्याष्टाङ्गो मार्गः?

तद्यथा-सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यग्वाक्, सम्यक्कर्मान्तः,सम्यगाजीवः,सम्यग्व्यायामः, सम्यक्स्मृतिः, सम्यक्समाधिश्च ।

---

९७. अ.वि.सू. पृ. ३३-३४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र भिक्षवः सम्यग्दृष्टिः कतमा ?

अस्त्ययं लोकः । अस्ति परलोकः । अस्ति माता । अस्ति पिता । अस्ति दत्तम् । अस्ति हुतम् । अस्ति इष्टानिष्टसुकृतदुष्कृतानां कर्मणां फलविपाकः । सन्ति लोके सम्यग्गताः, सम्यक्प्रतिपन्ना इति ।

इयं भिक्षवः सम्यग्दृष्टिः। तद्विपरीता मिथ्यादृष्टिः।

सम्यक्संकल्पः कतमः ?

बुद्धत्वादिपरिणामितं शीलं दानं च, न चक्रवर्त्यादिपरिणामितम् ।

अयं भिक्षवः सम्यक्संकल्पः ।

सम्यग्वाक् कतमा ?

इह भिक्षवः पारुष्यानृतपैशुन्यसम्भिन्नप्रलापवर्जिता वाक् ।

इयमुच्यते भिक्षवः सम्यग्वाक् ।

सम्यक्कर्मान्तः कतमः?

कायवाङ्मनसां दशकुशलेषु कर्मपथेषु व्यापारः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र कायिकं त्रिविधम्-प्राणातिपातादत्तादानकाममिथ्याचाराद्विरतिः ।

वाचिकं चतुर्विधम् - अनृतपैशुन्यपारुष्यसम्भिन्नप्रलापाद् विरतिः ।

मानसं त्रिविधम् - अभिध्याव्यापादमिथ्यादृष्टिभ्यो विरतिः ।

तत्र प्राणातिपातः कतमः ?

प्राणी च भवति, प्राणिसंज्ञी च भवति, बधकचित्तं चोत्पादयति । उपक्रमं च करोति । जीविताद् व्यपरोपयति ।

अयमुच्यते भिक्षवः प्राणातिपातः । अन्यत्र प्रमादाददृष्टाद्वा अप्राणिवधः ।

तत्रादत्तादानं कतमत् ?

स्तेयचित्तस्य परद्रव्यस्वीकरणमदत्तादानम् । अन्यत्र मातृपितृभ्रातृस्वजनमित्रद्रव्यस्य स्वल्पस्यानुपरोधिनो ग्रहणं नादत्तादानम् ।

तत्र काममिथ्याचारः कतमः ?

परस्त्रीणामुपभोगः भर्त्तृराजमातृपितृरक्षितानामथवा अस्थानागम्यादेशाकालेषु विप्रतिपत्तिः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अयमुच्यते काममिथ्याचारः । कायिकमेतत् त्रिविधम् ।

अनृतं कतमत् ?

साक्षिप्रश्ने यथाभूताद् वितथवचनमनृतम् । अनर्हतो वा अर्हन्नस्मीति परिहासवर्जम् ।इदमुच्यते अनृतम् ।

पैशुन्यं कतमत् ?

अभूतेन सत्येन वा भेदकरं वचनं पैशुन्यं तत् ।

इदमुच्यते पैशुन्यम् ।

तत्र पारुष्यं कतमत् ?

परदुःखचिकीर्षोरनिष्टवचनश्रावणं पारुष्यम्। दुःखमस्य भवत्वित्यनया बुद्ध्या यदनिष्टवचनश्रावणं क्रियते तत्पारुष्यम् ।

इदमुच्यते पारुष्यम् ।

सम्भिन्नप्रलापः कतमः ?

तद्यथा-राजकथा, चोरकथा, युद्धकथा, मद्यकथा, द्यूतकथा, स्त्रीकथा, आख्यायिककथा कथनं वा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अयमुच्यते सम्भिन्नप्रलापः । वाचिकमेतच्चतुर्विधम् ।

तत्राभिध्या कतमा ?

परद्रव्यस्वीकरणेच्छा अभिध्या । "यान्यस्य द्रव्याणि तानि मम स्यु'रिति ।

इदमुच्यतेऽभिध्या ।

तत्र व्यापादः कतमः ?

परजीवितव्यपरोपणावच्छेदनपीडादिचिन्तनम् ।

अयमुच्यते व्यापादः ।

तत्र मिथ्यादृष्टिः कतमा ?

नास्त्ययं लोकः, नास्ति परलोक इति पूर्ववत् । एतन्मानसं त्रिविधम् ।

तत्र सम्यगाजीवः कतमः ?

भिक्षोस्तावत् कुहना लपना नैमितिकत्वं नैष्पेषिकत्वं लाभेन लाभप्रतिकांक्षा च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र कुहना कतमा ?

भिक्षुर्दानपतिं दृष्ट्वा पर्यङ्कं बद्ध्वा पथि शून्यागरे वा निषीदति - "ध्यायी भिक्षुरयमर्हन्नि" ति लाभसत्कारो मे भविष्यति। एवमादिका कुहनेत्युच्यते।

तत्र लपना कतमा ?

इह भिक्षुर्लाभसत्कारनिमित्तमेव "त्वं मे माता, त्वं मे पिता, त्वं मे भगिनी, त्वं मे दुहितेति एवमन्यान्यपि प्रियवचनानि ब्रवीति। एवमादिका लपनेत्युच्यते।

तत्र नैमित्तिकत्वं कतमत् ?

भिक्षुस्तावत् पिण्डपातं परिभुज्य असकृद् ब्रूते- "यादृशोऽयं पिण्डपातस्तादृशोऽन्येषूपासकगृहेषु न लभ्यते"। अलाभसत्कारचित्तस्य तु वदतोऽदोषः।

इदमुच्यते नैमित्तिकत्वम्।

तत्र नैष्पेषिकत्वं कतमत् ?

भिक्षुस्तावत् यत्र गृहे पिण्डयातं न लभते, दापयितुकामश्च भवति, तत्र ब्रूते - "अदानपतयो हि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
निरयं गच्छन्ति । यूयमप्यदानपतयो व्यक्तं निरयगामिन" इति । नरकभयभीताः पिण्डपातमनुप्रयच्छन्ति । तं च लब्ध्वा परिभुङ्क्ते ।

इदमुच्यते नैष्पेषिकत्वम् ।

तत्र लाभेन लाभप्रतिकाङ्क्षा कतमा ?

भिक्षुस्तावदात्मीयेन धनेन शोभनानि चीवराणि चोपक्रीय उपासकेभ्यो दर्शयति-"इंदृशानि वयं वस्त्राणि लभामहे" इति ।ते लज्जिता यानि वस्त्राणि प्रयच्छन्ति तानि परिभुङ्क्ते । इयमुच्यते भिक्षवो लाभेन लाभप्रतिकांक्षा ।

अयं भिक्षवो मिथ्याजीवः । अस्माद्विरतिरिति सम्यगाजीवः ।

इह खलु भिक्षवः उपासकस्य मिथ्याजीवः । विषविक्रयः, शस्त्रविक्रयः। सत्वविक्रयः, मद्यविक्रयः, मांसविक्रयः, अप्रत्यवेक्षिततिलसर्षपपीडनं मिथ्याजीवः । अस्माद्विरतिः।

अयमुच्यते भिक्षवः सम्यगाजीवः ।

तत्र सम्यग्व्यायामः कतमः? इह भिक्षवोऽभिवादनवन्दनप्रत्युंत्थानाञ्जलिसामीचीकर्म करणीयम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अयमुच्यते भिक्षवः सम्यग्व्यायामः ।

तत्र भिक्षवः सम्यक्स्मृतिः कतमा ?

इह खलु भिक्षवो भिक्षुः स्त्रियं दृष्ट्वा उत्पन्ने रागे बाह्याध्यात्मिकयोः शरीरयोरशुभाकारेण यथाभूतदर्शी भवति-सन्त्यस्मिन् काये केशा, रोमाणि, नखा, दन्ता, रजो, मलं, त्वङ्, मांसम्, अस्थि, स्नायुः, शिरा, वृक्का, हृदयं, प्लीहा, क्लोमकः, आमाशयः, पक्वाशयः, अन्त्राणि, अन्त्रगुणाः, औदरीयकं, यकृत्, पुरीषम्, अश्रुः, स्वेदः खेटः, सिंहाणको, वसा, लसिका, मज्जा, मेदः, पित्तं श्लेष्मा, पूयं, शोणितं, मस्तकं, मस्तकलुङ्गः, उञ्चारप्रस्रावैः पूर्णं नानाप्रकारस्याशुचेरिति ।

इयमुच्यते भिक्षवः सम्यक्स्मृतिः ।

सम्यक्समाधिः कतमः?

चत्वारि ध्यानानि । इह भिक्षवो भिक्षुर्विविक्तं कामैर्विविक्तं पापकैरकुशलधर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य विहरति । स वितर्कविचाराणां व्युपशमादध्यात्मसंप्रसादाच्चेतस एकोतीभावादवितर्कमविचारं समाधिजं प्रीतिसुखं द्वितीयं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ध्यानमुपसंपद्य विहरति । स प्रीतेर्विरागादुपेक्षको विहरति स्मृतः संप्रजानन् सुखं च कायेन प्रतिसंवेदयति । यत्तदार्या आचक्षते "उपेक्षकः स्मृतिमान् सुखविहारीति" तृतीयं ध्यानमुपसंपद्य विहरति । स सुखस्य च प्राहाणाद् दुखस्य च प्रहाणात् पूर्वमेव च सौमनस्यदौर्मनस्ययोरस्तङ्गमाददुःखासुखमुपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसंपद्य विहरति । इमानि खलु भिक्षवश्चत्वारि ध्यानानि ।

अयमुच्यते सम्यक्समाधिः ।

अयं भिक्षव आर्याष्टाङ्गो मार्गः ।[९८]

तत्र कतमा सम्यग्दृष्टिः? या लोकोत्तरा नात्मदृष्टिसमुत्थिता न स... नजीवन् सोषण पुरुषनपुद्गलनमनुजनमानवदृष्टिसमुत्थिता नोच्छेदशाश्वतदृष्टिसमुत्थिता न भवविभवदृष्टिसमुत्थिता न कुशलाव्याकृतदृष्टिसमुत्थिता, या च न संसारनिर्वाणदृष्टिसमुत्थिता । इयमुच्यते सम्यग्दृष्टिः ॥

तत्र कतमः सम्यक्संकल्पः? यैः संकल्पै रागद्वेषमोहक्लेशाः समुत्तिष्ठन्ति, तान् संकल्पान् न संकल्पयति । यैः संकल्पैः शीलसमाधिप्रज्ञाविमुक्तिदर्शनस्कन्धाः समु-

---

९८. अ.वि.सू. पृ. ३४–४२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

त्तिष्ठन्ति, तान् सकल्पान् संकल्पयति । अयमुच्यते सम्यक्संकल्पः ॥

तत्र कतमा सम्यग्वाक् ? यया रागे नात्मानं न परांश्च तापयति, नात्मानं न परांश्च क्लेशयति, नात्मानं परान्नानुपहन्ति, तया समाहितयुक्तया वाचा समन्वागतो भवति, यया सम्यग्वाक् समववदति, इयमुच्यते सम्यग्वाक् ॥

तत्र कतमः सम्यक्कर्मान्तः ? यत्कर्म कृष्णं कृष्णविपाकम्, तत्कर्मणा नाभिसंस्करोति, यत्कर्म कृष्ण-शुक्लं कृष्णशुक्लविपाकम्, तत्कर्म नाभिसंस्करोति, यत्कर्म कृष्णशुक्लविपाकं कृष्ण कर्म क्षयाय संवर्तते, तत्कर्माभिसंस्करोति । सत्कर्माभिसंस्करोति, सत्कर्म-प्रतिशरणकर्मान्तः, अयमुच्यते सम्यक्कर्मान्तः ॥

तत्र कतमः सम्यगाजीवः ? यदार्थवशेन गुण-संलेखादुत्सर्जनता न कुहनता न लपनता न नैष्पेषिकता सृवतारवाचाशीलता(?) परलोकेषूशकुता(?) आत्मलोकसंतुष्टिः अनवयता आर्यान्तज्ञाताजीविता, अयमु-च्यते सम्यगाजीवः ॥

तत्र कतमः सम्यग्व्यायामः ? यो व्यायामो मिथ्या ? यो अज्ञानरागद्वेषमोहक्लेशानुशायितः, तं व्यायामं नेच्छति। यो व्यायामः सम्यगार्यमार्गसत्यावतारो निर्वा-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

णगामी प्रतिपदर्पयति, तं व्यायामं समनुगच्छति । अयमुच्यते सम्यग्व्यायामः ॥

तत्र कतमा सम्यक्स्मृतिः ? या सूपस्थिता अप्रकम्प्या ऋजुका अकुटिला संसारद्वेषादीनवदर्शिका निर्वाणपथप्रणेत्री स्मृतिः स्फरणं आर्यमार्गासंमोषः । इयमुच्यते सम्यक्स्मृतिः ॥

तत्र कतमः सम्यक्समाधिः ? यः सम्यक्त्वेन समाधिः । यस्मिन् समाधौ स्थितः सर्वसत्त्वप्रमोक्षाय सम्यक्स्थिततत्वं नियाममवक्रामति, अयमुच्यते सम्यक्स - माधिः ॥ अयमुच्यते आर्याष्टाङ्गो मार्गः ।[९९]

५१. चतस्रः प्रतिसंविदः । तद्यथा–धर्मप्रति–संवित्, अर्थप्रतिसंवित्, निरुक्तिप्रतिसंवित् प्रतिभान-प्रतिसंविच्चेति ॥

धर्मप्रतिसंवित् पर्यायेषू, तद्यथाऽविद्यादीनारभ्याज्ञानमदर्शनमनभिसमय इत्येवमादिष्व व्याघातसमृद्धौ यः समाधिरिति विस्तरः।

अर्थप्रतिसंवित्स्वसामान्यलक्षणे धर्माणाम्, अर्थान्तराद्यभिप्राये चाव्याघातसमृद्धाविति विस्तरः ।

---

९९. म.सू.सं.भा.१. पृ. ३२२–३२३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

निरुक्तिप्रतिसंविज्जनपदभाषायामिति प्रतिविषयं यथास्वमन्योन्यसंज्ञान्तरानुव्यवहारे, धर्मनिर्वचने चेति तद्यथा लुज्यते प्रलुज्यते तस्माल्लोकः, रुप्यते तस्माद्रूप इत्येवमादिके ।

प्रतिभानप्रतिसंविद्धर्मप्रभेदेष्विति द्रव्यसन्तः प्रज्ञप्तिसन्तः संवृतिसन्तः परमार्थसन्त इत्येवमादिषु ॥[१००]

५२. चतस्रो धारण्यः । तद्यथा–आत्मधारणी, ग्रन्थधारणी, धर्मधारणी, मन्त्रधारणी चेति ।

चतस्रो धारणीविषयेषु बोधिसत्त्वभूमौ विवृणोति यथा —

तत्र धर्मधारणी कतमा । इह बोधिसत्त्वस्तद्रूपां स्मृतिप्रज्ञाबलाधानतां प्रतिलभते यथा श्रुतमात्रकेणैवानाम्नातान् वचसाऽपरिचितान् नामपदव्यञ्जनकायसंगृहीता-ननुपूर्वचरिताननुपूर्वसमायुक्तान् प्रमाणान् ग्रन्थानप्रमाणं कालं धारयति ।

तत्रार्थ धारणी कतमा । पूर्ववत् । तत्रायं विशेषः । तेषामेव धर्माणामप्रमाणमर्थमनाम्नातमपरिचितं मनसाऽप्रमाणं कालं धारयति ।

---

१००. अ.स.भा. पृ. १२८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र मन्त्रधारणी कतमा इह बोधिसत्त्वस्तद्रूपं समाधिवशितां प्रतिलभते यथा यानि मन्त्रपदानीति संशमनाय सत्त्वानामधितिष्ठन्ति। तानि सिद्धानि भवन्ति। परमसिद्धान्यमोघान्येनेक विधानामीतीनां संशमनाय । इयमुच्यते बोधिसत्त्वस्य मन्त्रधारणी ।

तत्र कतमा । बोधिसत्त्वस्य बोधिसत्त्वक्षान्तिलाभाय धारणी । इह बोधिसत्त्वः स्वयं प्रगाढहेतुचरितः प्रज्ञावान् प्रविविक्तविहारी वाचमप्यनुदीरयन् दर्शनपथमप्यनागच्छन् केनचित् सह तथा मात्राभोजी असंकीर्णभोजी एकप्रकारा-शनभोजी प्रध्यानपरतः अल्पं रात्रौ स्वपन् बहु जाग्रन् यानीमानि तथागतभाषितानि बोधिसत्त्वक्षान्तिलाभाय मन्त्र-पदानि तद्यथा इटि मिटि किटिभिः क्षान्तिपदानि स्वाहा। इत्येतेषां मन्त्रपदानामर्थं चिन्तयति तुलयत्युपपरीक्षते । स एषां मन्त्रपदानामेवं सम्यक् प्रतिपन्न एवमर्थ स्वयमेवाश्रुत्वा कुतश्चित् प्रतिविध्यति । तद् यथा नास्त्येषां मन्त्रपदानां काचिदर्थपरिनिष्पत्तिः निरर्था एवैते । अयमेव चैषामर्थो यदुत निरर्थता । तस्माच्च परं पुनरपरमर्थं न समन्वेषते । इयता तेन तेषां मन्त्रपदानामर्थः सुप्रतिविद्धो भवति । स तेषां मन्त्रपदानामर्थं सम्यक् प्रतिविध्य तेनैवार्थानुसारेण सर्वधर्माणामत्यर्थं सम्यक् प्रतिविध्यति स्वयमेवाश्रुत्वा परतः । एवञ्च पुनरर्थं प्रतिविध्यति । सर्वाभिलापैः सर्वधर्माणां स्वभावार्थापरिनिष्पत्तिः । या पुनरेषां निर-भिलाप्यस्वभावता अयमेवैषां स्वभावार्थः । स एवं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्माणां स्वभावार्थ सम्यक् प्रतिविध्य तस्मात्परमर्थ न समन्वेषते । उदारञ्च तस्यार्थस्य प्रतिवेधात् प्रीतिप्रामोद्यं प्रतिलभते । तेन बोधिसत्त्वेन प्रतिलब्धा तानि धारणीपदान्यधिष्ठाय बोधिसत्त्वक्षान्तिर्वक्तव्या । तस्याश्च लाभात् स बोधिसत्त्वो न चिरस्येदानीमध्याशय-विशुद्धिं प्रतिलभते । अधिमात्रायामधिमुक्तिचर्याभूमिक्षान्तौ वर्तते । इयं बोधिसत्त्वस्य बोधिसत्त्वक्षान्तिलाभाय धारणी वेदितव्या ।

तत्र धर्मधारणीमर्थधारणीञ्च बोधिसत्त्वः प्रथमस्य कल्पासंख्येयस्यात्ययाच्छुद्धाध्याशयभूमिप्रविष्टो लभते नि-यतां स्थिरामुदाराञ्च । ततः पुनरर्वाग् लभते प्रणिधानवशेन वा ध्यानसन्निश्रयेण वा नतु नियतां न स्थिरां नोदाराम् । यथाधर्मार्थधारणी एवं मन्त्रधा-रणी वेदितव्या । बोधिसत्त्वक्षान्तिलाभाय तु धारणी यथैव व्याख्याता तथैव लभ्यते ।[१०१]

५३. चत्वारि प्रतिशरणानि । तद्यथा–अर्थ–प्रतिशरणता न व्यञ्जनप्रतिशरणता । ज्ञानप्रतिशरणता न विज्ञानप्रतिशरणता । नीतार्थप्रतिशरणता न नेयार्थप्रतिशरणता ।

---

१०१. बो.भू. पृ. १८५-१८६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धर्मप्रतिशरणता न पुद्गलप्रतिशरणता चेति ॥

तत्र कथं बोधिसत्त्वश्चतुर्षु.प्रतिसरणेषु प्रयुज्यते । इह बोधिसत्त्वः अर्थार्थी परतो धर्मं श्रृणोति न व्यञ्जनाभिसंस्कारार्थी । सोऽर्थार्थी धर्मं श्रण्वन् न व्यञ्जनार्थी प्राकृतयापि वाचा धर्मं देशयमानमर्थप्रतिसरणो बोधिसत्त्वः सत्कृत्य श्रृणोति । पुनर्बोधिसत्त्वः कालापदेशञ्च (महापदेशञ्च) यथाभूतं प्रजानाति । प्रजानन् युक्तिप्रतिशरणो भवति न स्थविरेणाभिज्ञातेन वा पुद्गलेन तथागतेन वा (संघेन वा) इमे धर्मा भाषिता इति पुद्गलप्रतिसरणो भवति। स एवं युक्तिप्रतिशरणो न पूद्गलप्रतिशरण स्तत्वार्थात् न विचलति । अपरप्रत्ययश्च भवति धर्मेषु पुनर्बोधिसत्त्वस्तथागते विविष्टश्रद्धो निविष्टप्रसाद एकान्तिको वचस्यभिप्रसन्नस्तथागतनीतार्थं सूत्रं प्रतिसरति न नेयार्थम् । नीतार्थं सूत्रं प्रतिसरन् असंहार्यो भवत्यस्माद्धर्मविनयात् । तथाहि नेयार्थस्य सूत्रस्य नानामुखप्रकृतार्थविभागोऽनिश्चितः संदेहकरो भवति । सचेत्पुनर्बोधिसत्त्वो नीतार्थेऽपि सूत्रेऽनैकान्तिकः स्यादेवमसौ संहार्यः स्यादस्माद्धर्मविनयात् । पुनर्बोधिसत्त्वोऽधिगमज्ञाने सारदर्शी भवति न श्रुतचिन्ताधर्मार्थविज्ञानमात्रके । स यद्भावनामयेन ज्ञानेन ज्ञातव्यं न तच्छक्यं श्रुतचिन्ताविज्ञानमात्रकेण विज्ञातुमिति विदित्वा परमगम्भीरानपि तथागतभाषितान्धर्मान् श्रुत्वा न प्रति-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क्षिपति नापवदति । एवं हि बोधिसत्त्वश्चतुर्षु प्रतिसरणेषु प्रयुज्यते । एवञ्च पुनः सुप्रयुक्तो भवति । तत्रैषु चतुर्षु प्रतिसरणेषु समासतश्चतुर्णां प्रामाण्यं संप्रकाशितम् । भाषितस्यार्थस्य युक्तेः शास्तुः भावनामयस्य चाधिगमज्ञानस्य । सर्वैश्च(पुनश्च)तुर्भिः प्रतिसरणैः सम्यक्प्रयोगसमारम्भगतस्य बोधिसत्त्वस्याविभ्रान्तनिर्याणमभिद्योतितं भवति ।[१०२]

५४. षडनुस्मृतयः । बुद्धानुस्मृतिः, धर्मानुस्मृतिः, संघानुस्मृतिः, त्यागानुस्मृतिः, शीलानुस्मृतिः, देवानुस्मृतिश्चेति ॥

बुद्धानुस्मृतिधर्मालोकमुखं बुद्धदर्शनविशुद्धयै संवर्तते । धर्मानुस्मृति धर्मालोकमुखं धर्मदेशनाविदशुद्धयै संवर्तते । संघानुस्मृति धर्मालोकमुखं न्यायाक्रमणतायै संवर्तते । त्यागानुस्मृति धर्मालोकमुखं सर्वोपधिप्रतिनिःसर्गायै संवर्तते । शीलानुस्मृति धर्मालोकमुखं प्रणिधानपरिपूर्त्यै संवर्तते । देवतानुस्मृति धर्मालोकमुखमुदारचित्ततायै संवर्तते ।

५५. चत्वारि धर्मपदानि । तद्यथा–अनित्याः सर्वसंस्काराः । दुःखाः सर्वसंस्काराः । निरात्मानः सर्वसंस्काराः । शान्तं निर्वाणं चेति ॥

---

१०२. बो.भू. पृ. १७५ - १७६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चत्वारीमानि धर्मोद्दानानि यानि बुद्धाश्च बोधिसत्त्वाश्च सत्त्वानां विशुद्धये देशयन्ति । कतमानि चत्वारि । अनित्याः सर्वसंस्कारा इति धर्मोद्दानम् । दुःखाः सर्वसंस्कारा इति धर्मोद्दानम् । अनात्मानः सर्वधर्मा इति धर्मोद्दानम् । शान्तं निर्वाणमिति धर्मोद्दानम् । एतत् प्रतिसंयुक्तार्थं यद्भूयसा धर्ममुदीरयन्ति बुद्धबोधिसत्त्वाः सत्त्वानाम् । तस्मादेतानि धर्मोद्दानानीत्युच्यन्ते । पौराणेश्च शान्तमानसैर्मूनिभिरुदितो - दितत्वानिन्नत्यकालमुद्दानानीत्युच्यन्ते महोदयगामिनी भवग्रोर्ध्वगामिनी चैषा प्रतिपत् तस्मादुद्दानानीत्युच्यन्ते ।

कथं च बोधिसत्त्वः सर्वसंस्काराननित्यतः समनुपश्यति । इह बोधिसत्त्वः सर्वसंस्काराणामभिलाप्यस्वभावं नित्यकालमेव नास्तीत्युपलभ्यानित्यतः सर्वसंस्कारान् पश्यति । पुनरविज्ञातस्य भूततस्तस्यैव निरभिलाप्यस्य वस्तुनः अपरिज्ञानहेतुकमुदयव्ययमुपलभ्यतान् निरभिलाप्यस्वभावान् सर्वसंस्काराननित्यतः समनुपश्यति । सोऽतीतान् संस्कारानुत्पन्ननिरुद्धान्समनुपश्यति । तेषां नैव हेतुमुपलभते नापि स्वभावम् । तस्मात्तेषां नैव हेतुतो नैव स्वभावतो विद्यमानतां समनुपश्यति । प्रत्युत्पन्नानिरुद्धान्समनुपश्यति । तेषां हेतुं नोपलभते दत्तफलत्वात् । स्वभावं पुनरुपलभते अनिरुद्धत्वात् । तस्मात्तेषां स्वाभावतो विद्यमानतां समनुपश्यति नो तु हेतुतः । अनागतान् संस्काराननुत्पन्ननिरुद्धान् पश्यति । तेषां हेतुमुपलभते अदत्तफलत्वात् । नो तु स्वभाव-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मनुत्पन्नत्वात् । तस्मातेषं बोधिसत्त्वो हेतुतो विद्यमानतां पश्यति नो तु स्वभावतः । स एव त्रिष्वध्वस्वव्यवच्छिन्नां संस्कार - सन्ततिं प्रवर्तमानां दृष्ट्वा एकैकस्मिन् संस्कारक्षणे त्रीणि संस्कृतस्य संस्कृतलक्षणानि पश्यति । क्षणादुर्ध्वं चतुर्थं संस्कृतलक्षणं समनुपश्यति । तत्र पूर्वसंस्कारक्षणे स्वभाव विनाशानन्तर योऽपूर्वसंस्कारक्षणस्वभावप्रादुर्भावः सा जातिरिति पश्यति । उत्पन्नस्य यस्तत्कालाविप्रणाशः सा स्थितिरिति पश्यति । तं पूर्वनिरुद्धं संस्कारज्ञणस्वभावमपेक्ष्य तस्योत्पन्नस्य यदन्यत्वमन्यथात्वं वा सा जरेति पश्यति । तस्माज्जातिक्षणादूर्ध्वं तस्यैवोत्पन्नस्य संस्कारक्षणस्य यः स्वभावविनाशः स व्यय इति पश्यति । स यत्स्वभावमेव तमुत्पन्नं संस्कारक्षणं समनुपश्यति । तत्स्वभावानेव तस्य जातिं स्थितिं जरां च । (न) पश्यति तदन्यस्वभावान् । तस्माच्च क्षणादूर्ध्वं य एव तस्य संस्कारक्षण (स्वभाव) स्यापगमः स एव तेषां जात्यादीनामिति यथाभूतं पश्यति । तान्येतानि चत्वार्यपि संस्कृतलक्षणान्यभिसमस्य संस्काराणां समासतो द्वयावस्था-प्रभावितानि । भावप्रभावितान्यभावप्रभावितानि च । तत्र भगवता यो भावस्तदेकं संस्कृतलक्षणं व्यवस्थापितम् । यस्त्वभावस्तत् द्वितीयं संस्कृतलक्षणं व्यवस्थापितम् । स च भावस्तेषां संस्काराणां स्थित्यन्यथात्वप्रभावित इति कृत्वा तृतीयं संस्कृतलक्षणं व्यवस्थापितम् । तत्र बोधिसत्त्वः संस्कारमात्रं स्थापयित्वा न तस्य जातिं न स्थितिं न जरां नानित्यतां सर्वकालं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

द्रव्यस्वभावपरिनिष्पत्तितः पश्यति । तत्कस्य हेतोः । संस्कारमात्रं स उत्पद्यमानमुपलभते । नास्यान्यां जातिं न स्थितिं न जरां नानित्यताम् । संस्कारमात्रमेव च जायमानं तिष्ठान्तं जीर्यमाणं विनश्यमानमुपलभते । न तस्यान्यां जातिं स्थितिं जरामनित्यताञ्च । युक्तयापि बोधिसत्त्वो विमृशन्नेतान् जात्यादीन् द्रव्यतो नोपलभते । एवञ्च पुनर्विमृशन्नोपलभते । स चेद्रूपादिसंस्कारविनिर्मुक्तः अन्यो जातिधर्मः स्यात् स यथैव रूपादिकः संस्कारः स्वात्मनोत्पद्यते । तथैव सोऽप्युत्पद्येत । एवं सति द्वे जन्मनी स्याताम् यच्च संस्कार-जन्म यच्च जाति-जन्म तत्र तत्संस्कारजन्म तस्माज्जातिजन्मनः अनन्यदेव वा स्यात् । (अन्यदेव वा।) यदि तावदनन्यदेवं सत्यपार्थिका जातिद्रव्यकल्पना । अन्या जातिर्द्रव्यतोऽस्तीति न पुज्यते । अथ च पुनरन्यदेवं सति संस्कार-जन्म जातिर्न भवति । संस्कार-जन्म जातिरिति न युज्यते । यथा जातिरेवं स्थितिर्जरा विनाशश्च विस्तरेण वेदितव्यः । स चेद्विनाशो नाम स्वभावतो धर्मः परिनिष्पन्नः स्यात् सोऽप्युत्पद्येत निरुध्येत वा । यदा च विनाश उत्पन्नः स्यात्तदा सर्वसंस्कारैर्निरुद्धै र्भवितव्यं स्यात् । एवं सत्यल्पकृच्छ्रेण निरोधसमापन्नस्येव चित्तचैतसिकानां धर्माणामप्रवृत्तिः स्यात् । तस्य च पुनर्विनाशस्य निरोधात् निरुद्धैरपि तैः संस्कारैः पुनरेव भवितव्यं स्यात् विनाश एषां नास्तीति कृत्वा । अतो विनाश उत्पद्यते निरुध्यते चेति न युज्यते । न च पुनः कुलपुत्रस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वा कुलदुहितुर्वा सर्वकालास्तितान्च द्रव्यसतां स्वभावपरिनिष्पत्तिन्च प्रज्ञप्ति सतां पश्यतो निर्विद्विरागो विमुक्तिश्च युज्यते । अतो विपर्ययेण तु युज्यते । इत्येभिराकारैर्बोधिसत्त्वः सर्वसंस्कारा अनित्या इति यथाभूतं प्रजानाति ।

तान् पुनरेव अनित्यान् संस्कारान् प्रबन्धेन वर्तमानाद्बोधिसत्त्वः त्रिःप्रकाराया दुःखतायाः सन्निश्रयभावेन पश्यति संस्कारदुःखतायाः विपरिणामदुःखतायाः दुःखदुःखतायाश्च । एवं हि बोधिसत्त्वः सर्वसंस्कारा दुःखा इति यथाभूतं प्रजानाति ।

पुनः सर्वधर्माणां बोधिसत्त्वः संस्कृतासंस्कृतानां द्विविधं नैरात्म्यं यथाभूतं प्रजानाति । पुद्गलनैरात्म्यं धर्मनैरात्म्यं च । तत्रेदं पुद्गलनैरात्म्यम् । यन्नैवते विद्यमाना धर्माः पुद्गलाः । नापि विद्यमानधर्मविनिर्मुक्तोऽन्यः पुद्गलोविद्यते । तत्रेदं धर्मनैरात्म्यम् । यत्सर्वेष्वभिलाप्येषु वस्तुषुसर्वाभिलापस्वभावो धर्मो न संविद्यते । एवं हि बोधिसत्त्वः सर्वधर्मा अनात्मान इति यथाभूतं प्रजानाति ।

यः पुनरेषामेव संस्काराणां पूर्वं हेतुसमुच्छिन्नानां पश्चादशेषोपरमस्तदन्येषाञ्चात्यन्तमनभिनिर्वृत्तिरप्रादुर्भावः । इदमुच्यते निर्वाणम् । तच्च शान्तं क्लेशोपशमात् दुःखोपशमाच्च वेदितव्यम् । एवं च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तावदनध्याशयशुद्धो बोधिसत्त्वः अदृष्टसत्यो वा श्रावकायानीयो निर्वाणमधिमुक्तो भवति । एवञ्चाभिवदति - शान्तं निर्माणमिति ।[१०३]

५६. दशाकुशलानि । तद्यथा–प्राणातिपातः, अदत्तादानम्, काममिथ्याचारः, मृषावादः, पैशुन्यम्, पारुष्यम्, संभिन्नप्रलापः, अभिध्या, व्यापादः, मिथ्यादृष्टिश्चेति ॥

केनचित् सुगतिप्राप्तुकामेन हेया दशाकुशलकर्मपथाः प्रकृतिसावद्याः, तद्यथा–

त्रिविधं कायिकं कर्म वाचिकं तु चतुर्विधम् ।
मानसं त्रिप्रकारं च दशैतेऽकुशला मताः ॥१॥

एते प्रविभागशः व्याख्यायन्ते–तत्र तावत् कायिकम्-प्राणातिपातः, अदत्तादानम्, काममिथ्याचारश्चेति ।

वाचिकम्–मृषावादः, पैशुन्यम्, पारुष्यम्, संभिन्नप्रलापश्च । मानसञ्च–अभिध्या, व्यापादो, मिथ्यादृष्टिश्च । तत्र प्राणातिपातस्तु प्राणिभावः, प्राणिसंज्ञाभावः, वधकचित्तोपस्थितिः, एतदुपायकरणम्, प्राणावरोधभावश्चेति एतत्पञ्चाङ्गैः संयुक्तो भवति प्राणातिपातः ।

१०३. बो.भू. पृ. १८८ - १९०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र कतमत् अदत्तादानम् ? परभावः, परपरिग्रहसंज्ञत्वम् च, स्तेयचित्तोपस्थितिः, तदुपायकरणम्, स्थानच्युतिश्च एतत्पञ्चाङ्गसंयुक्तं भवत्यदत्तादानम् ।

काममिथ्याचारस्तु चतुर्विधः । अस्थानम्, अकालः, अदेशः, अगम्यश्चेति । तत्र अस्थानं तु सद्धर्म-प्रतिमादि-बोधिसत्त्वस्थानाचार्योपाध्यायदक्षिणीय-माता-पितृ-गुर्वादि-संनिधिः । अकाल इति दिवसे ऋतुमती-गर्भिणी-शिशुपोषिणीभिः अनिच्छादुःखदौर्मनस्यपीडिताभिः, अष्टाङ्गोपोसथावस्थितौ च । अदेश इति मुखवर्चोमार्गत्वं, कुमारकन्ययोः पुरःपृष्ठरन्ध्रत्वं स्वहस्तत्वं च । अगम्यास्तु सर्वाः परस्त्रियः धर्म-ध्वज -कुल-रक्षिताः, राजरक्षिताः, परपरिगृहीता वेश्याः, सम्बन्धिन्यः, तिरश्च्यश्च । एवं स्वभार्यासेवनेऽपि भवति काममिथ्याचारः ।

तत्र मृषावादस्तु अवास्तविकत्वम्, वस्तुस्थितिच्युतिः, मिथ्यासंज्ञाभावः, मिथ्योपायोपस्थितिश्च, तदुपायकरणञ्चेति मिथ्यावचनोक्तिश्च इत्येतत् पञ्चाङ्गसंयोगे मृषावादः।

पैशुन्यं तु क्लिष्टचित्तेन परभेदकथनम् ।

पारुष्यमिति परमर्मवेधि द्वेषवचनम् ।

सम्भिन्नप्रलाप इति- रागोपयुक्तत्वाद् आसक्तियोगाद् वा अवाच्यवचनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अभिध्येति परधन-द्रव्यैश्वर्येषु तीव्रासक्तचित्तता ।

व्यापादस्तु सत्त्वेषु विद्वेषभावः, एतान् सत्त्वान् हनिष्यामि रोत्स्यामि, ताडयिष्यामि, बन्धयिष्यामि इति चिन्तनम् ।

मिथ्यादृष्टिरिति नास्ति दानम्, न यज्ञं, नेहलोकः, न परलोकः, न श्रमणः, न ब्राम्हणः, न देवः, न बुद्धो भगवान्, न अर्हन्, न प्रत्येकबुद्धः, न सुचरितम् न च दुश्चरितम्, न सुकृत-दुष्कृत-कर्माणां फल-विपाकश्चेति ।

भगवता उक्ते 'आर्यसद्धर्मस्मृत्युपस्थाने' महा-यानसूत्रे च निर्दिष्टो दशाकुशलकर्मपथोऽयं तु महानरकहेतुः । दशाकुशलकर्मपथसेवनेन पतन्ति सत्त्वा नरकेषु ।[१०४]

दशाकुशलप्रतिविरतस्य बोधिसत्त्वस्य गुणान् प्रकाशयति दशभूमिकसूत्रे यथा—

तत्र भवन्तो जिनपुत्रा विमलायां बोधिसत्त्वभूमौ स्थितो बोधिसत्त्वः प्रकृत्यैव दशभिः कुशलैः कर्मपथैः समन्वागतो भवति । कतमैर्दशभिः ? यदुत प्राणातिपा-तात्प्रतिविरतो भवति निहतदण्डो निहतशस्त्रो निहतवैरो

---

१०४. अ.ए. पृ.९६-९७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लज्जावान् दयापन्नः सर्वप्राणिभूतेषु हितसुखानुकम्पी मैत्रचित्तः । स संकल्पैरपि प्राणिविहिंसां न करोति, कः पुनर्वादः परसत्त्वेषु सत्त्वसंज्ञिनः संचिन्त्यौदारिककायविहेठनया ॥

अदत्तादानात्प्रतिविरतः खलु पुनर्भवति स्वभोगसंतुष्टः परभोगानभिलाषी अनुकम्पकः । स परपरिगृहीतेभ्यो वस्तुभ्यः परपरिगृहीतसंज्ञी स्तेयचित्तमुपस्थाप्य अन्तशस्तृणपर्णमपि नादत्तमादाता भवति, कः पुनर्वादोऽन्येभ्यो जीवितोपकरणेभ्यः ॥

काममिथ्याचारात्प्रतिविरतः खलु पुनर्भवति स्वदारसंतुष्टः परदारानभिलाषी । स परपरिगृहीतासु स्त्रीषु परभार्यासु गोत्रध्वजधर्मरक्षितासु अभिध्यामपि नोत्पादयति, कः पुनर्वादो द्वीन्द्रियसमापत्या वा अनङ्गविज्ञप्त्या वा ॥

अनृतवचनात्प्रतिविरतः खलु पुनर्भवति सत्यवादी भूतवादी, कालवादी, यथावादी तथाकारी । सोऽन्तशः स्वप्नान्तरगतोऽपि विनिधाय दृष्टिं क्षान्तिं रुचिं मतिं प्रेक्षां विसंवादनाभिप्रायो नानृतां वाचं निश्चारयति, कः पुनर्वादः समन्वाहृत्य ॥

पिशुनवचनात्प्रतिविरतः खलु पुनर्भवति अभेदाविहेठाप्रतिपन्नः सत्त्वानाम् । स नेतः श्रुत्वा अमुत्राख्याता भवत्यमीषां भेदाय । न अमुतः श्रुत्वा इहाख्याता

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भवत्येषां भेदाय । न संहितान् भिनत्ति, न भिन्नानामनुप्रदानं करोति । न व्यग्रारामो भवति न व्यग्ररतो न व्यग्रकरणीं वाचं भाषते सद्भूतामसद्भूतां वा ॥

परुषवचनात्प्रतिविरतः खलु पुनर्भवति । स येयं वागदेशा कर्कशा परकटुका पराभिसंजननी अन्वक्षान्वक्षप्राग्भारा ग्राम्या पार्थग्जनकी अनेला अकर्णसुखा क्रोधरोषनिश्चारिता हृदयपरिदहनी मनःसंतापकरी अप्रिया अमनआपा अमनोज्ञा स्वसंतानपरसंतानविनाशिनी । तथारूपां वाचं प्रहाय येयं वाक् स्निग्धा मृद्वी मनोज्ञा मधुरा प्रियकरणी मनआपकरणी हितकरणी नेला कर्णसुखा हृदयंगमा प्रेमणीया पौरी वर्णविस्पष्टा विज्ञेया श्रवणीया निश्रिता बहुजनेष्टा बहुजनकान्ता बहुजनप्रिया बहुजनमनआपा बिज्ञापन्ना सर्वसत्त्वहितसुखावहा समाहिता मनउत्प्लावनकरी मनःप्रल्हादनकरी स्वसंतानपरसंतानप्रसादनकरी तथारुपां वाचं निश्चारयति ॥

संभिन्नप्रलापात्प्रतिविरतः खलु पुनर्भवति सुपरिहार्यवचनः कालवादी भूतवादी अर्थवादी धर्मवादी न्यायवादी विनयवादी । स निदानवतीं वाचं भाषते कालेन सावदानाम् । स चान्तश इतिहासपूर्वकमपि वचनं परिहार्यं परिहरति, कः पुनर्वादो वाग्विक्षेपेण॥

अनभिध्यालुः खलु पुनर्भवति परस्वेषु परकामेषु परभोगेषु परवित्तोपकरणेषु । परपरिगृहीतेषु स्पृहामपि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नोत्पादयति, किमिति यत्परेषां तन्नाम स्यादिति नाभिध्यामुत्पादयति, न प्रार्थयते न प्रणिदधाति, न लोभचित्तमुत्पादयति ॥

अव्यापन्नचित्तः खलु पुनर्भवति । सर्वसत्त्वेषु मैत्रचित्तो हितचित्तो दयाचित्तः सुखचित्तः स्निग्धचित्तः सर्वजगदनुग्रहचित्तः सर्वभूतहितानुकम्पाचित्तः । स यानीमानि क्रोधोपनाहखिलमलव्यापाद परिदाहसंधुक्षितप्रतिघाद्यानि तानि प्रहाय यानीमानि हितोपसंहितानि मैत्र्युपसंहितानि सर्वसत्त्वहितसुखाय वितर्कितविचारितानि, तान्यनुवितर्कयिता भवति ॥

सम्यग्दृष्टिः खलु पुनर्भवति सम्यक्पथगतः कौतुकमङ्गलनानाप्रकारकुशीलदृष्टिविगतऋजुदृष्टिरशठोऽमायावी बुद्धधर्मसंघनियताशयः ।[१०५]

आचार्य शान्तिदेवः दशाकुशलकर्मफलानि विवृणोति शिक्षासमुच्चये यथा —

प्राणातिपातविपाकलवस्तावत् । यथाह–तद्यथा अग्निशिखाचरा नाम पक्षिणो येऽग्निशिखामध्यगता न दह्यन्ते संहृष्टराश्च नारकेयाणां कपालं भित्वा रुधिरं पिबन्ति । कपालान्तरचरा नाम पक्षिणो ये मस्तकं भित्वा ज्वलितमस्तकलुङ्गान् पिबन्ति ।

---

१०५. द.भू.सू. पृ.१५-१६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जिह्वामिषभुजो नाम पक्षिणो ये जिह्वां विदार्य अभितोऽमितः प्रभक्षयन्ति । सापि जिह्वा भुक्ता पुनरपि संजायते पद्मदलकोमलतरा । एवमर्थानुरुपसंज्ञा दन्तोत्पाटका नाम, कण्ठनाड्यपकर्षका नाम । क्लोमकाशिनः । आमाशयादाः । प्लीहसंवर्तकाः । अन्त्रविवरखादिनः । पृष्ठवंशचरा नाम । मर्मगुह्यका नाम पक्षिणः, ये सर्वाणि मर्मविवराणि भित्वा मर्माणि कृन्तयित्वा विवराणि प्रविश्य मज्जामण्डं पिबन्ति क्रन्दमानानाम् । सुचीछिद्रा नाम पक्षिणो ये सूचीसदृशतुण्डा रक्तं पिबन्ति । एवमस्थिविवराशिनः, षट् त्वग्भक्षिणः । नखनिकृन्तका मेदोदाः स्नायुविशेषकाः, केशोण्डुका नाम पक्षिणो ये केशमूलान्युत्पाटयन्ति । स एवमवीचीप्रदेशस्त्रीणि योजनशतसहस्राणि । पक्षि-भैरवपक्षो नाम । तत्र तैरन्यैर्नारकेयैः सहानेकानि वर्षशतसहस्राणि भक्ष्यते संभवति च । स कथंचिदपि तस्मान्मुक्तः सर्वस्माद्दुःखजालपरिवृतः श्वभ्रप्रपातो नाम द्वितीयः प्रदेशस्तत्र गच्छति त्राणान्वेषी शरणान्वेषी परित्राणान्वेषी । समन्तत एकादशभिरर्चिस्कन्धैरावृतो निःसहायः कर्मपाशबन्धनबद्धः समन्ततः शत्रुभिरावृतः कान्तारमनुप्रपन्नः सर्वस्मान्नरकपुञ्जादधिकतरं व्यसनम-भिप्रपन्नस्तं श्वभ्रप्रपातं नाम प्रदेशमनुधावति । पतिते अतीव पादः प्रविलीयते । उत्क्षिप्तः पुनरपि संभवति सुकुमारतरः श्लक्ष्णतरः खराभिस्तीव्राभिर्वेदनाभिरभिभूतः । तस्यैवं भयविक्लववदनस्य करचरणसर्वाङ्गप्रत्यङ्गप्रविलीय-मानस्य स प्रदेशः श्वभ्रप्रपातो नाम प्रादुर्भवति । स

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन् देशे निपतति । पतितः श्वभ्रे प्रपतति त्रीणि योजनसहस्राणि । पुनरपि कर्मकृतेन वायुनोत्क्षिप्यते । स प्रपतमानः कङ्कवायसगृध्रोलूकैर्भक्ष्यते । यावत्तस्यैवमुत्क्षिप्यमानस्य च प्रपततश्चानेकानि वर्षशतसहस्राणि गच्छन्ति । कथंचिदपि तस्मान्मुक्तः परिभ्रामितश्चक्राङ्कविवरं नाम प्रदेशमनुधावति । तस्मिंश्च प्रदेशे सहस्राराणि चक्राणि प्रादुर्भवन्ति वज्रनाभीनि तीक्ष्णज्वालानि शीघ्रभ्रमाणि । तस्य सहगमनादेव तानि चक्राणि शरीरं प्राप्य भ्रमन्ति । पेयालं । प्रत्येकं सर्वाङ्गानि प्रमथ्नन्तो दहन्ति, पादतले चास्य शङ्कुभिर्भिद्यते ।एवं मक्कोटकपर्वते । माक्कोटकैः प्राणिजातिभिः सान्तर्ब्रहिः परमाणुशः प्रभक्ष्यते । भुक्तो भुक्तः पुनरपि संजायते सुकुमारतरः । सुकुमारतया भूयोऽप्यधिकतरां वेदनामनुभवति । भुक्तभुक्तस्य प्रभूततरमेवास्य त्वङ्मांसं प्रादुर्भवति । तस्य प्राणातिपातकृतोपचितस्य तत्फलं भवति ॥

अदत्तादानविपाकमाह-स एष दुष्कृतकर्मान्तचारी अलातचक्रनिर्माणगन्धर्वनगर मृगतृष्णिकासदृशं महदर्थजातं पश्यति रत्नवस्त्रधनधान्यनिकरभूतम् । तस्यैवं लोभाभिभूतस्य कर्मणा मोहितस्य एवं भवति ममेदमिति । स एवं मोहितः पापकारी प्रज्वलिताङ्गारकर्षूर्लङ्घयित्वा तद् द्रविणमनुधावति । स कर्मकृतैर्यमपुरुषैर्गृह्यते शस्त्रजालमध्यगतः सर्वाङ्गप्रत्यङ्गशः पाट्यते विशस्यते दह्यते अस्थ्यवशेषः क्रियते । न चास्यानादि-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कालप्रवृत्तः स लोभस्तामप्यवस्थां गतस्य परिहीयत इति ॥

कामिमिथ्याचारमधिकृत्याह-एष स पापकर्ता तस्माच्छस्त्रसंकटान्मुक्तः कथमप्यङ्गारकर्षूलङ्घयित्वा कर्मणा भ्रामितः प्रदेशमन्यं प्रपद्यते वितथदशेनं नाम । तत्र कर्मकृतां स्त्रियं पश्यति, या तेन पूर्वं नष्टस्मृतिना दृष्टा । दृष्ट्वा च अनादिकालाभ्यस्तो रागाग्निरुत्पद्यते । स तेन धावति येन ताः स्त्रियः । ताश्च अयोमय्यो नार्यः कर्मकृताः । ताभिरसौ गृह्यते । गृहीत्वा च ओष्ठात्प्रभृति तथा भुज्यते यथास्य सर्षपफलमात्रप्रमाणमपि नावशिष्टम् । तस्मिन् शरीरे भवति । पुनरपि संभवति, पुनरपि भुज्यते । स कटुकां खरां वेदनामनुभवंस्तस्माद्रागाग्नेर्न निवर्तते । येन ताः स्त्रियस्तेन भूयः स संधावति । न चास्य तत्पीडा तथा बाधते यथा रागाग्निः । अथ ताः स्त्रियो भूयो वज्रमयायोमयप्रज्वलितगात्रास्तं मनुष्यमादाय ज्वालामालाकुलसर्वशरीरास्तं नारकेयं सिकतामुष्टिवद्भिन्दन्ति । पुनरपि संभवतीति पूर्ववत् । पेयालं ॥

स्त्रियो मूलमपायस्य धननाशस्य सर्वथा ।
स्त्रीविधेया नरा ये तु कुतस्तेषां भवेत्सुखम् ॥ यावत् ॥
स्त्री विनाशो विनाशानामिह लोके परत्र च ।
तस्मात्स्त्रियो विवर्ज्याः स्युर्यदीच्छेत्सुखमात्मनः ॥ इति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मृषावादमधिकृत्याह-स तैर्यमपुरुषैर्गृह्यते, गृहीत्वा च तन्मुखं विदारयन्ति । तस्माज्जिह्वामपकर्षयन्ति । सा च जिह्वा कर्मवशात्पञ्चयोजनशतप्रमाणा भवति । तस्य मृषावादस्य फलेन तस्याश्च सहनिर्गमनकाले ते यमपुरुषा भूमावैनमाह्वयन्ति प्रदीप्तायोमय्याम् । कर्मकृतं च हलसहस्रं प्रादुर्भवति प्रदीप्ताग्रसंयुक्तम् । बलवद्भिर्बलीवर्दैस्तदस्यान्तर्गतं जिह्वायां वहति । तत्र पूयरुधिरकृमिस्राविण्यो नद्यः प्रवहन्ति ॥पेयालं॥ सा च जिह्वा तथा सुकुमारा यथा देवानामक्षि । यावत्स वेदनातः स्तनति क्रन्दति विक्रोशति । न चास्य तद्दुःखं कश्चिदपनयतीति विस्तरः । तस्यैवं प्रचण्डां वेदनामनुभवतोऽनेकानि वर्षशतसहस्राणि सा च जिह्वा कृष्यते । सा कथंचित्तस्य नारकस्य मुखे प्रविशति । स भयविह्वलवदनो येन वा तेन वा निःपलायतेऽङ्गा-रकर्षूषु दह्यमानो निमज्जन् । तस्यैवं दुःखार्तस्याशरण-स्यापरायणस्य पुनरपि यमपुरुषाः प्रादुर्भवन्ति मुन्दरा-सिपाणयः । ते तं पुरुषं मस्तकात्प्रभृति यावत्पादौ चूर्णयन्तीत्यादि ॥

पैशुन्यविपाकस्तु यथैव मृषावादस्य, विशेषस्तु त्रीणि योजनशतानि जिह्वेति । तां यमपुरुषा निस्त्रिं-शानादाय प्रदीप्तधारान् जिह्वां निकृन्तन्ति । जम्बुकैश्चान्यस्मिन् प्रदेशे भक्ष्यते । परमकटुकां वेदनां प्रतिवेदयते । स क्रन्दति विक्रोशत्यव्यक्ताक्षरं जिह्वा-विरहित इत्यादि ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पारुष्यविपाकमाह-ते तां जिह्वामास्यं विदार्य गृण्हन्ति । गृहीत्वा निशितधारैः शस्त्रैश्छित्त्वा तस्य भूय एव खादनीयार्थेन मुखे प्रक्षिपन्ति । स च जिघत्सार्दितः क्षुत्क्षामवदनः स्वरुधिरलालापरिस्रुतां तामेव स्वजिह्वां भक्षयति । सा च जिह्वा छिन्ना पुनरपि संजायते कर्मवशात् । अथ स भूमौ वेदनार्तः परिवर्तते विचेष्टते क्रन्दते । तस्यैवं वेदनार्तस्य परिवृत्तनयनतारकस्य दुःखार्तस्य दीनस्यासहायस्यैकाकिनः स्वकृतमुपभुञ्जानस्य यमपुरुषा अनुशासनीगाथां भाषन्ते-

जिह्वाधनोर्विनिर्मुक्तस्तीक्ष्णो वाग्विशिखस्त्वया ।
पारुष्यमिति यद्दृष्टं तस्यैतत्फलमागतम् ।
इति विस्तरः ॥

संभिन्नप्रलापविपाकमाह-तस्य तत्प्रज्वलितं ताम्रद्रवलेहितं जिह्वां दहति । जिह्वां दग्ध्वा कण्ठं दहति । कण्ठं दग्ध्वा हृदयं दहति । हृदयं दग्ध्वा अन्त्राणि दहति । तान्यपि दग्ध्वा पक्वाशयं दहति । पक्वाशयमपि दग्ध्वा अधोभागेन निर्गच्छति ॥ यमपुरुषा गाथामाहुः-

पूर्वोत्तराबद्धपदं निरर्थकमसंगतम् ॥
अबद्धं यत्त्वया प्रोक्तं तस्यैतत्फलमागतम् ॥
या न सत्यवती नित्यं न चाध्ययनतत्परा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
न सा जिह्वा बुधैर्दृष्टा केवलं मांसखण्डिका ।
इति विस्तर: ॥

अभिध्याविपाकमाह-अथ पश्यति रिक्तं तुच्छमसारकं कर्मकृतं बहु द्रविणं परपरिगृहीतम् । तस्य कर्मचोदितव्यामोहितस्यैवं भवति-ममेदं स्यादिति । तत: स नारकस्तेनैव धावति येन तद् द्रव्यम् । तस्याभिध्याख्यमानसस्याकुशलस्यासेवितभावितबहुलीकृतस्य तत्फलं यदसौ नरके विपरीतं पश्यति । तस्यैवं पश्यतोऽभिध्याबहुलस्य हस्ते शस्त्रं प्रादुर्भवति । स तेन धावति । तेषामप्यन्येषां नारकाणां हस्ते शस्त्राणि प्रादुर्भवन्ति । स तै: सह शस्त्रेण युध्यते यावत्तथा कर्त्यते यथा सर्षपफलमात्रमपि न भवति मांसमस्य शरीरे । तथा अस्थिकङ्कालावशेष: क्रियते ॥ पेयालं ॥ परेषां सर्वं....मम स्यादिति चिन्तितम् । तस्याभिध्यासमुत्थस्य विषस्य फलमागतमिति ॥

व्यापादफलमाह-कर्ममया: सिंहव्याघ्रसर्पा: क्रोधाभिभूता: पुरतस्तिष्ठन्ते । एतेभ्यो भयभीतो येन वा तेन वा नि:पलायते । स कथं शन्कोति पलायितुमशुभस्य कर्मण: ? स तैर्गृह्यते । गृहीत्वा च पूर्वं तावन्मस्तकाद्भुज्यते यावत्पार्श्वत: सर्पैर्विषदंष्ट्रै: संदश्य संदश्य भक्ष्यते । व्याघ्रैरपि पृष्ठतो भक्ष्यते । पादावपि वन्हिना दा (ह्येते) । स यमपुरुषैर्दूरादिषुभिर्विध्यते ॥ इति विस्तर: ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मिथ्यादृष्टिफलं पुनरपरिमितम् । पाठस्तु संक्षिप्यते-शस्त्रवर्षतोमरवज्रवर्षाशनिपाषाणवर्षैर्हन्यते । एकादशभिरर्चिस्कन्धैः क्षुत्पिपासाग्निना च मुखनिर्गतेन निरन्तरं दह्यत इति ॥[१०६]

५७. गतयः षट् । तद्यथा–नरकः, तिर्यक्, प्रेतः, असुरः, मनुष्यः, देवश्चेति ॥

नरकादिस्वनामोक्ता गतयःपञ्च तेषु नरकाः, तिर्यञ्च प्रेताः, देवाः, मनुष्याः, इति स्वैरेव नामभिस्तेषु पञ्चगतय प्रोक्ताः । कामधातौ चतस्रो गतयः, पञ्चम्याश्च प्रदेशः । रूपारूप्यधात्वोरेकस्या देवगतेः प्रदेशः ।[१०७]

तत्र नारका उत्पाटानुपाटनच्छेदनभेदनादीनि दुःखानि प्रत्यनुभवन्ति । तिर्यञ्चश्चान्योन्यभक्षणादीनि । प्रेताःक्षुत्तृषादीनि । देवा दिव्यस्त्रीललितोद्यानविमानसुखानि, च्यवनपतनविकिरणविध्वंसनादीनि[१०८] प्रत्यनुभवन्ति । मनुष्या हस्त्यश्वरथान्नपानशयनासनस्त्रीललितोद्यानानि[१०९] पर्येष्टिव्यसनादीनि दुःखानि[११०] प्रत्यनुभवन्ति ।

---

१०६. शि.स. पृ. ४२-४५
१०७. अ.ध.को.भा.१. पृ.३८९
१०८. दि.अ. पृ. १८७
१०९. " " पृ. १८५
११०. " " पृ. १८५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५८. षड् धातवः । तद्यथा-पृथिवी, आपः,. तेजः, बायुः, आकाशः, विज्ञानं चेति ॥

तत्र पृथ्वीधातुर्द्विविधः । आध्यात्मिको बाह्यश्च । तत्राध्यात्मिको यदस्मिन्काये अध्यात्मं प्रत्यात्मं खक्खटं खरतरमुपादत्तं । बाह्यः पुनः पृथ्वीधातुर्यद्बाह्यं खक्खटं खरगतमनुपगतमनुपादत्तं ।

स पुनरध्यात्मिकपृथिवीधातुः कतमः, । तद्यथा केशा, रोमाणि, नखा, दन्ता, रजो, मलं, त्वङ् मान्समस्थि, स्नायुः, सिरा, वृक्का(क्कं) हृदयं, प्लीहकं, क्लोममन्त्राण्यन्त्रगुणाः । आमाशयः । पक्वाशयः यकृत्पुरीषमयमुच्यते आध्यात्मिकः पृथिवीधातुः ।

स पुनर्बाह्यः पृथिवीधातुः कतमः । काष्ठानि वा, लोष्ठानि वा, शर्करा वा, कठिल्ला वा, वृक्षा वा, पर्वताग्रा वा, इति वा पुनरन्योप्येवंभागीयः अयमुच्यते बाह्यः पृथिवीधातुः ॥

अब्धातुः कतमः । अब्धातुर्द्विविधः । आध्यात्मिको बाह्यश्च ।

तत्राध्यात्मिक कोप्धातुः(ब्धातु) कतमः । यदध्यात्मं प्रत्यात्मं स्नेहः स्नेहगतं । आपः अब्धातुगतमुपगतमुपादात्तं (अब्धातूगतमूपगतमूपादत्तं) । तद्यथा अश्रु, स्वेदः । खेटः शिंघाणकः । बसा, लसीका,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मज्जा, मेद:, पित्तं श्लेष्मा, पूय:, शोणितं, मस्तकं मस्तकलुंगं, प्रश्रावोय (स्रावोऽय) मुच्यते आध्यात्मिकोब्धातु: ।

बाह्योब्धातु: कतम: । यद्बाह्यमाप: अप्गतं, स्नेह:(अब्गतं) स्नेहगतमनु(तमु) पगतमनु(तमुं) पादत्तं । तत्पुनरुत्सो वा, सरांसि वा, तडागा वा, नद्यो वा, प्रस्रवणानि वा, इति यो वा पुनरन्योप्येवंभागीयोयमुच्यते बाह्योब्धातु: ॥

तेजोधातु: कतम: । तेजोधातुर्द्विविध: आध्यात्मिको बाह्यश्च ॥

तत्राध्यात्मिकस्तेजोधातु: कतम: । यदध्यात्मं प्रत्यात्मं तेजस्तेजोगतमूष्मा ऊष्मगतमुपगतमुपादत्तं । तद्यथा यदस्मिन्काये तेजो येनायं काय आतप्यते । संतप्यते, परितप्यते । येन चाशितपीतखादितास्वादितं सम्यक्सुखेन परिपाकं गच्छति । यस्य चोत्सदत्वात् जारितो जारित इति संख्यां गच्छति ॥

बाह्यस्तेजोधातु: कतम: । यद्बाह्यं तेजस्तेजो - गतमूष्मागतमनुपगतमनुपादत्तं । तत्पुनर्यन्मनुष्या अरणीसहगतकेभ्यो गोमयचूर्णेभ्य:समन्वेषते । यत्तूत्पन्नं ग्राममपि दहति । ग्रामप्रदेशमपि । नगरम्वा, नगरप्रदेशम्वा, जनपदम्वा, जनपदप्रदेशम्वा, द्वीपम्वा,· कक्षम्वा,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दावम्वा, काष्ठम्वा, तृणम्वा, गोमयम्वादहन् परैति । इति यो वा पुनरन्योप्ये वंभागीयः ॥

तत्र वायुधातुः कतमः । वायुधातुर्द्विविधः । आध्यात्मिको बाह्यश्च ।

तत्राध्यात्मिको वायुधातुः । यदप्यध्यात्मं प्रत्यात्मं वायुर्व्वायुगतं । लघुत्वं समुदीरणत्वमुपगतमुपादत्तं । स पुनः सन्त्यस्मिन् काये ऊर्ध्वंगमा वायवः, अधोगमा वायवः, पार्श्वशया वायवः । कुक्षिशया वायवः । पृष्ति(ष्ठि)शया(वाताष्ठीला) वायवः। वाय्वष्ठीला वायवः । क्षुरकपिप्पलकशस्त्रका वायवः । आश्वासप्रश्वासा वायवः । अंगप्रत्यंगानुसारिणोवायवः ।

बाह्यो वायुधातुः कतमः । यद्बाह्यं वायुर्वायु-गतं लघुत्वं, समदीरणत्वं । अनुपगतमनुपादत्तं। सन्ति बहिर्धा पूर्वा वायवो, दक्षिणा वायवः । उत्तरा वायवः पश्चिमा वायवः । सरजसो वायवः, अरजसो वायवः, (परीत्ता) महद्गता वायवः, विश्वा वायवो, वैरम्भा वायवः वायु मण्डलकवायवः । भवति च समयः यन्महान् वायुस्कन्धः समुदागतः वृक्षाग्रानपि पातयति । कुड्याग्रानपि पातयति । पर्वताग्रानपि पातयति । पातयित्वा निरुपादानो निगच्छति । ये सत्त्वाश्चीव-रकर्णिकेन वा पर्येषन्ते, तालवृन्तेन वा, विधमनकेन वा । इति वायुरन्योप्येवंभागीयः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आकाश:धातु कतम: । यच्चक्षु: सौषिर्यम्वा, श्रोत्रसौषिर्यम्वा, घ्राणसौषिर्यम्वा, मुखसौषिर्यम्वा, कण्ठ-सौषिर्यम्वा । इति येन चाभ्यवहरति । यत्र वाभ्यवहरति । येन वाभ्यवह्रियते । यदधोभागेन प्रघरति । इति यो वा पुरनरप्योप्येवंभागीय: अयं उच्यते आकाशधातु: ॥

विज्ञानधातु: कतम: । यच्चक्षुर्विज्ञानं श्रोत्रघ्राण-जिह्वाकायमनोविज्ञानं । तत् पुनश्चित्तं मनोविज्ञानं च । अयमुच्यते विज्ञानधातु: ॥[१११]

५९. अष्टौ विमोक्षा:।तद्यथा-रूपी रूपाणि पश्यति शून्यम् । अध्यात्मरूपसंज्ञी बहिर्धारूपाणि पश्यति शून्यम् । आकाशानन्त्यायतनं पश्यति शून्यम्। विज्ञानानन्त्यायतनं पश्यति शून्यम् । आकिंचन्यायतनं पश्यति शून्यम् । नैवसंज्ञानासंज्ञायतनं पश्यति शून्यम् । संज्ञावेदयितनिरोधं पश्यति शून्यम् चेति ॥

विमोक्षा: कतमे । अष्टौ विमोक्षा: । कथं रूपी रूपाणि पश्यतीति । ध्यानं निश्रित्य अध्यात्मं द्रष्टरि रूपसंज्ञाया अविभावनाद् द्रष्टरि रूपसंज्ञाया:

---

१११. श्रा.भू. पृ. २११-२१८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संनिवेशनाद् वा दृश्य रूपाणि पश्यतीति विहारसमृद्धो समाधिः प्रज्ञा तत्संप्रयुक्ताश्च चित्तचैतसिका धर्माः यावद् निर्माणावरणाद् विमुक्तिः । कथमध्यात्मम-रूपसंज्ञी बहिर्द्धा रूपाणि पश्यति । ध्यानं निश्रित्य द्रष्टरि रूपसंज्ञाया विभावनाद् अरूपसंज्ञायाः संनि-वेशनाद्वा दृश्य रूपाणि पश्यतीति विहारसमृद्धौ समाधि प्रज्ञा शेषं पूर्ववत् ॥ कथं शुभं विमोक्षं कायेन साक्षात्कृत्योपसंपद्य विहरतीति । ध्यानं निश्रित्य अध्यात्मं शुभाशुभेषु रूपेषु अन्योन्या-पेक्षासंज्ञाया अन्योन्यानुगमसंज्ञाया अन्योन्यैकरससंज्ञा-याश्च लाभात् तत्र लब्धे विहारसमृद्धौ समाधिः प्रज्ञा शेषं पूर्ववत् यावत् शुभाशुभनिर्माणात् संक्लेशोत्प-त्त्यावरणाञ्च विमुक्तिः । आकाशानन्त्यायतनविमोक्षः कतमः । विमोक्षानुकूला काशानन्त्यायतनविमोक्षः तथा विज्ञानानन्त्यायतनाकिंचन्यायतननैवसंज्ञानावसंज्ञायतनवि-मोक्षा अपि द्रष्टव्यः यावत् विमोक्षः शान्तो विमोक्षः असक्त्यावरणं च ॥ संज्ञावेदयितनिरोधविमोक्षः कतमः । नैवसंज्ञानासंज्ञायतनविमोक्षं निश्रित्य समतिक्रान्तानां शिष्टे शान्ते विमोक्षे मोक्षानुसदृशो विहारः विहार-समृद्धौ च चित्तचैतसिकानां निरोधः संज्ञावेदयित-निरोधावरणाद् विमुक्त्यर्थम् ॥[११२]

रूपी रूपाणि पश्यत्ययं प्रथमो विमोक्ष इति विस्तरः । तत्र कथं रूपी त्युच्यते । स्वात्मन्या

---

११२. अ.ध.स. पृ. ९५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रूप्यसमापत्तिसंनिश्रयेण रूपसंज्ञाया अभिभावनाद्रूपसंज्ञासंनिवेशनाद्वा द्रष्टव्यानि रूपसंज्ञासंमुखीकरणादित्यर्थः । कथं रूपाणि पश्यतीत्युच्यते । सुवर्णदुर्वर्णादीनि रूपाण्यधिमुच्य दर्शनात् । कथं विमोक्ष इत्युच्यते । विमुच्यतेऽनेन निर्माणावरणादिति कृत्वा ।

अध्यात्ममरूपसंज्ञाारूप्य समापत्तिसंनिश्रयेण द्रष्टरि स्वात्मनि रूपसंज्ञाविभावनादरूपसंज्ञासंनिवेशनाद्वा द्रष्टरि नामसंज्ञासंमुखीकरणादित्यर्थः । शेषं पूर्ववत् ।

शुभं विमोक्षं कायेन साक्षात्कृत्वोपसंपद्य विहरत, शुभाशुभेषु रूपेष्वन्योन्यापेक्षासंज्ञामन्यो - न्यानुगमसंज्ञां च निश्रित्यान्योन्यैकरससंज्ञालाभात् । तथाहि शुभानि रूपाण्यपेक्ष्य तदन्येष्वशुभानीति भवत्यशुभानि वापेक्ष्य शुभानीति नानपेक्ष्यैकजातीयानामेव दर्शने शुभाशुभताबुद्ध्यभावात् । तथाहि शुभेष्वप्यशुभतानुगताऽशुभेष्वपि शुभता, शुभसंमतस्यापि त्वङ्मात्रस्य केशादिषट्त्रिंशदशुचिद्रव्यान्तर भावादित्येवमन्योन्यं सर्वरूपाणि मिश्रयित्वा शुभतैकरसाकारया संज्ञया विमुच्यते । तस्यैवं रूपादिविमोक्षविभुत्वलाभिनः शुभाशुभनिर्माणावरणं च प्रहीयते तत्र च संक्लेशोत्पत्त्यावरणम् । कः पुनर्निर्माणे संक्लेशः । शुभरुपनिर्माणे आभोगः, अशुभरूपनिर्माणे प्रातिकूल्यमिति ।

आकाशानन्त्यायतनादीनि चत्वार्यार्यश्रावकस्य यान्यनाश्रवानुकूलानि शुद्धानि तानि विमोक्षकाख्यां लभन्ते,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदास्वादनविमोक्षणात् । ये ते शान्ता विमोक्षा अतिक्रम्य रूपाण्यारूप्यास्तेष्वसक्तिः परिशुद्धिः । तस्या आवरणमारूप्यास्वादनमिति ।

संज्ञावेदयितनिरोधस्य निश्रयो नैवसंज्ञानासंज्ञायतनम्, आलंबनाकारसहाया न सन्ति चित्तचैतसिकानामभावात् । स्वभावस्तस्य चित्तचैतसिकानां निरोधः । स च मोक्षानुसदृशो विहारः, लोकोत्तरेण मार्गेण परिवृत्त्याश्रयस्यार्यश्रावकस्य पुनश्चित्तचैतसिकानामप्यप्रवृत्त्यवस्थायाः परमशान्तत्वात् क्लिष्टमनोऽसमुदाचाराच्च । एते चाष्टौ विमोक्षा विहारा इत्युच्यन्ते, एभिरार्याणां विहरणात् । तत्रापि बहुलमाभ्यां विमोक्षाभ्यां विहरन्ति, तृतीयेनाष्टमेन च प्रधानत्वात् । अत एव चानयोः कायेन साक्षात्कृत्योपसंपद्य विहरतीति वचनं नान्येषु रूप्यरूपिविमोक्षावरणाशेषप्रहाणाद्यथाक्रमम् । तयोः संपूर्णाश्रयपरिवृत्तिसाक्षात्करणमुपादायेत्यपरः पर्यायः ।[११३]

६०. पञ्चानन्तर्याणि । तद्यथा-मातृवधः, पितृवधः, अर्हद्वधः, तथागतदुष्टचित्तरुधिरोत्पादः, संघभेदश्चेति ॥

अष्टपुद्गलेषु एकः पुद्गल अर्हत् पुद्गलः । रत्नानि त्रीणि तत्रं संघरत्नम् । अर्हत् वधः संघभेद्श्च अनन्तर्यकर्म इति । —

११३. अ.स.भा. पृ. १२४-१२५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

६१. अष्टौ लोकधर्मा:—लाभ:, अलाभ:, सु:खम्, दु:खम्, यश:, अयश:, निन्दा, प्रशंसा चेति॥

बोधिसत्वभूमौ नव लोकधर्मान्ते प्रस्तूयते यथा —

नव लोकधर्मा: । अलाभ: अयशो निन्दा दु:खं नाशधर्मकस्य नाश: क्षयधर्मकस्य क्षय: जराधर्मकस्य जरा व्याधिधर्मकस्य व्याधि: मरणधर्मकस्य मरणम् । एषां लोकधर्माणां समस्तव्यस्तानाम् आपतनात् सम्मुखीभावात् यद्दु:खमुत्पद्यते तल्लोकधर्माधिष्ठानमित्युच्यते । तेनापि स्पृष्टो बोधिसत्त्वो न तन्निदानं वीर्यं स्रंसयति प्रतिसंख्यायोद्वहते अधिवासयति ।[११४]

६२. नवाङ्गप्रवचनननानि । तद्यथा- सूत्रम्, गेयम्, व्याकरणम्, गाथा, उदानम्, जातकम्, वैपुल्यम्, अद्भुतधर्म:, उपदेशश्चेति ॥

तत्र सूत्रं कतमत् । यत्तत्र तत्र भगवता तांस्तान् तानि तानि विनेयाचरितानि चारभ्य स्कन्धप्रतिसंयुक्ता वा कथा कृता, धातुप्रतिसंयुक्ता वा कथा कृता, धातुसंगणसंयुक्ता वा, आयतनप्रतिसंयुक्ता वा । प्रतीत्यसमुत्पादप्रतिसंयुक्ता वा, आहारसत्यस्थितिप्रतिसंयुक्ता वा, श्रावकप्रत्येकबुद्धतथागतप्रतिसंयुक्ता वा । स्मृत्युपस्थान-

---

११४. बो.भू. पृ. १३३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सम्यक्प्रहाणर्धि पादेन्द्रियबलबोध्यंगमार्गांगप्रतिसंयुक्ता । अशुभा, आनापानस्मृतिशिक्षाऽवेत्यप्रसादप्रतिसंयुक्ता कथा कृता । सा च कथा संगीतिकारैः परिगृह्य शासनचिर-स्थितये, यथायोगमनुपूर्व्वेण रचिता, अनुपूर्व्वेण समायुक्ता । प्रतिरूपैर्नामकायपदव्यंजनकायैर्युदत तेषां तेषामर्थानां सूचनार्थं कुशलानामर्थोपसंहितानां बुद्धचर्योपसंहितानामिदमुच्यते सूत्रं ।

गेयं कतमत् । यस्यान्ते पर्यवसाने गाथा अभिगीता, यच्च सूत्रं नेयार्थमिदमुच्यते गेयं ।

व्याकरणं कतमत् । यस्मिंछ्रावकेभ्यो अभ्यतीत-कालगतो उपपत्तौ व्याक्रियते । यच्च सूत्रं नीतार्थमिदमुच्यते । व्याकरणं ।

गाथा कतमा । या न गद्येन भाषिता । अपितु पादोपनिबन्धेन द्विपदा वा, त्रिपदा वा, चतुष्पदा वा, पंचपदा वा, षट्पदा वा इयमुच्यते गाथा ॥

उदाना कतमा । यत्पुद्गलस्य नाम गोत्रम-परिकीर्तयित्वा, उद्दिश्य भाषितमायत्याम्वा सद्धर्म–स्थितये, शासन स्थितये च । इयमुच्यते उदाना ।

जातकं कतमत् । यदतीतमध्वानमुपादाय तत्र तत्र भगवतः च्युत्युपपादेषु बोधिसत्त्वचर्या दुष्करचर्या । आख्याता इदमुच्यते जातकं ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वैपुल्यं कतमत् । यत्र बोधिसत्त्वानां मार्गो देश्यते। अनुत्तरायै सम्यक् संबोधये । दशबलानावरण-ज्ञानसमुदागमाय इदमुच्यते वैपुल्यं ॥

अद्भुताधर्मा कतमे । यत्र बुद्धानाञ्च, बुद्धश्रावकाणां च, भिक्षूणाञ्च, भिक्षुणीनाञ्च, शिक्षमाणानां, श्रामणेकीरीणामुपासिकानां, साधारणाऽसाधारणाश्च तदन्यप्रतिविशिष्टाश्चाऽश्चर्याऽद्भुतसम्मता गुणविशेषा आख्याता इमे उच्यन्ते अद्भुता धर्माः ॥

अभिधर्मसमुच्चये धर्माविनिश्चयः इति द्वादशाङ्गः धर्मः आर्य शासनं विवृणोति यथा—

उपदेशाः कतमे । सर्व्वमातृका अभिधर्मः सूत्रान्त-निष्कर्षः । सूत्रान्तव्याख्यानमुपदेश इत्युच्यते ।[११५]

सूत्रं कतमत् । यदभिप्रेतार्थं सूचनाकारेण गद्यभाषितम् । दशानुशंसान् संपश्यन् तथागतः सूचनाकारेण धर्मं देशयति सुखं व्यवस्थापयेति सुखं देशयति । श्रोतापि सुखमुद्गृह्णाति धर्मगौरवतया क्षिप्रं बोधि-संभारान् परिपूरयति आशुधर्मतां प्रतिविध्यति । बुद्धेऽवेत्यप्रसादं लभते धर्मे संघे चावेत्य प्रसादं लभते । परमदृष्टधर्मसुखविहारं स्पृशति । सांकथ्यविनिश्चयेन सतां चित्तमाराधयति । पण्डितः पण्डित इति संख्यां गच्छति ।

---

११५. श्रा.भू. पृ. १३६-१३९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गेयं कतमत् । सूत्राणां मध्ये वा अन्ते वा गाथया यद् गीयते । सूत्रेषु अनिरूपितोऽर्थो वा यद् व्याख्यायते । अतो गेयमित्युच्यते ॥

व्याकरणं कतमत् । तत् स्थानेषु समतिक्रान्तानामतीतानामार्य श्रावकाणां प्राप्त्युत्पत्तिप्रभेदव्याकरणम् । अपि च सूत्रेषु निरूपितार्थस्य स्फुटीकरणम् । विवृत्याभिसन्धिव्याकरणात् ।

गाथा कतमा । सूत्रेषु पादयोगेन देश्यते । द्विपदी त्रिपदी चतुष्पदी पंचपदी षट्पदी वा ॥

उदानं कतमत् । सूत्रेषु कदाचित् तथागतेन आत्तमनस्केन यदुदाहृतम् ॥

निदानं कतमत् । पृष्टेन यद् भाषितम् । सोत्पत्तिकं शिक्षाप्रज्ञप्तेकं वा । अतोऽपि निदानम् ॥ अवदानं कतमत् । सूत्रेषु सदृष्टान्तकं भाषितम् ॥

इतिवृत्तकं कतमत् । यदार्यश्रावकाणां पूर्वलौकिकं वृत्तं देशयति ॥

जातकं कतमत् । यत् बोधिसत्त्वचरितपिटक संप्रयुक्तं वृत्तं देशयति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वैपुल्यं कतमत्। बोधिसत्त्वपिटकसंप्रयुक्तं भाषितम् । यदुच्यते वैपुल्यं तद् वैदल्यमप्युच्यते वैतुल्यमप्युच्यते । किमर्थं वैपुल्यमुच्यते । सर्वसत्त्वानां हितसुखाधिष्ठानतः उदारगम्भीरधर्मदेशनातश्च ॥ किमर्थमुच्यते वैदल्यम् । सर्वावरणविदलनतः ॥ किमर्थमुच्यते वैतुल्यम् । उपमानधर्माणां तुलनाऽभावतः ॥

अद्भुतधर्मः कतमः । यत्र श्रावकबोधिसत्त्वतथागतानां परमाद्भुताश्चर्यधर्माणां देशना ॥

उपदेशः कतमः । सर्वगम्भीरगूढ धर्मलक्षणानामविपरीतं व्याख्यानम् ।[११६]

६३. द्वादश धूतगुणाः पैण्डपातिकः, त्रैचीवरिकः, खलुपश्चाद्भक्तिकः, नैषद्यिकः, यथासंस्तरिकः, वृक्षमूलिकः, एकासनिकः, आभ्यवकाशिकः, आरण्यकः, स्मशानिकः, पांशुकूलिकः, नामन्तिकश्चेति ॥

गृहीतपिण्डपातसमादानत्वात् पैण्डपातिकः । संघाट्यादित्रिचीवरमात्रत्वात् त्रैचीवरकः ।

---

११६. अ.ध.स. पृ. ७८ - ७९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समस्तं भक्तादिकमादाय भोजनात्पश्चात्खलु भक्तिकः । निषद्यया रात्रौ स्थानात् नैषद्यिकः । यथासंस्तीर्णकर्पटादौ शयनाद्याथासंस्तरिकः । तथा [वृक्षमूले स्थितत्वेन] वृक्षमूलिकः । एकाशनोपवेशेन यथेष्टं परिभोगादेकाशनिकः। उपर्यावरणाभावेन आभ्यवकाशिकः। श्मशाने स्थितत्वेन श्माशानिकः । रथ्याकर्पटचीवरत्वेन पांशुकूलिकः । धृतोर्णाचीवरादित्वेन नामतिकः।

ग्रामं परित्यज्य कोशमात्रेणावस्थानादारण्यकः।[११७]

६४. दश भूमयः । प्रमुदिता, विमला, प्रभाकरी, अर्चिष्मती, सुदुर्जया, अभिमुखी, दूरंगमा, अचला, साधुमती, धर्ममेघा चेति ॥

तत्र कतमे बोधिसत्त्वानामधिशीलविहारस्य आकाराः कानि लिङ्गानि कानि निमित्तानि वेदितव्यानि । इह बोधिसत्त्वेन पूर्वमेव प्रमुदितविहारे दशाकारेण चित्ताशयेनाशयशुद्धिः प्रतिलब्धा भवति । सर्वाचार्य गुरुदक्षिणीयाविसवादनाध्याशयः । सहधार्मिकबोधिसत्त्वसौरत्यसुखसंवासाशयः । सर्वक्लेशोपक्लेशमारकर्माभिभव-स्वचित्तवशवर्तनाशयः । सर्वसंस्कारेषु दोषाशयः निर्वाणेऽनुशंसाशयः । कुशलानां बोधिपक्ष्याणां धर्माणां भावनासातत्याशयः । तेषामेव च भावनानुकूलतया

---

११७. अ.प्र. पृ. ५००

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्राविविक्याशयः । सर्वलोकामिषसमुच्छ्रयलाभसत्कारनिरपेक्षाशयः । हीनयानमपहाय महायानाधिगमाशयः । सर्वसत्त्वसर्वार्थकरूणाशयश्च । इतीमे दश सम्यगाशयास्तस्मिंश्चित्ते प्रवृत्ता भवन्ति । यैरस्याशयः शुद्ध इत्युच्यते । एषामेव चाशयानामधिमात्रत्वात्परिपूर्णत्वात् द्वितीयमधिशीलविहारं बोधिसत्त्वः प्रविशत्याक्रमते । सोऽधिशीलविहारे प्रकृतिशीली भवति । स्वल्पमपि मिथ्याकर्मपथसंगृहीतदौःशील्यं न समुदाचरति । प्रागेव मध्यमधिमात्रं वा । दशसु च परिपूर्णेषु कुशलेषु कर्मपथेषु प्रकृत्या संदृश्यते । स एवं प्रकृतिशीली प्रज्ञया क्लिष्टाक्लिष्टानां कर्मपथानां दुर्गतिसुगतियानेषु कर्मसमुदाचारे हेतुफलसमुदागमव्यवस्थानं यथाभूतं प्रजानाति । विपाकनिष्यन्दफलतश्च तानि कर्माणि यथाभूतं प्रजानाति । स स्वयं चाकुशलकर्मप्रहाणे कुशलकर्मसमादाने संदृश्यते । परांश्च तत्रैव समादापयितुकामो भवति समादापयति च विषमकर्मसमाचारदोषदुष्टञ्च सत्त्वधातुं सर्वमविशेषेण सम्पत्तिविपत्तिगतं परमार्थतो दुःखितं व्यसनस्थं विचित्रै– र्व्यसनाकारैरनुकम्पमानोऽनुकम्पावैपुल्यमनुप्राप्तः प्रत्यवेक्षते । तस्यास्मिन् अधिशीलविहारे व्यवस्थितस्य बुद्धदर्शनं कुशलमूलविशुद्धिः पूर्ववद्वेदितव्या । तत्रायं विशेषः । तद्यथा तदेव सुवर्णं कुशलेन कर्मकारेण कासीसं ग्रक्षिप्तं भूयस्या मात्रया विशुद्धतरं भवत्यग्नौ प्रक्षिप्यमाणम् । एवमस्य बोधिसत्त्वस्य सा कुशलमूलविशुद्धिर्वेदितव्या । अस्मिंश्च विहारे शुद्धचित्ताशयनिष्पत्तिप्रवेशत उपपत्तिश्चातुर्द्वीपकश-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चक्रवर्ती भवति । यद्भू यसा बाहुल्येन च दौ:शील्यादकुशलेभ्य: कर्मपथेभ्य: सत्त्वान् व्यावर्तयति । कुशलेषु च कर्मपथेषु समादापयति । प्रभावोऽप्यस्य पूर्वकाद् दशगुणो वेदितव्य: । इत्येवं बोधिसत्त्वानामधिशीलविहार: । प्रकृतिशीलतश्च सर्वाकारदौ:शील्यमलापकर्षतश्च सर्वक्कर्मपथसर्वाकारहेतुफलज्ञानप्रतिवेधतश्च शुभे कर्मणी परसमादापनकामश्चानुकम्पा वैपुल्यप्रतिलम्भतश्च सत्त्वधातुकर्मजदु:खव्यसनालोचनतश्च कुशलमूलविशुद्धितश्च उपपत्तितश्च प्रभावतश्च समासनिर्देशतो वेदितव्य: । विस्तरनिर्देशत: पुनर्यथा सूत्रमेव यथा दशभूमिके विमलायां भूमौ दौ:शील्यमलापगतत्वात् विमला भूमिरित्युच्यते । दौ:शील्यमलापगतत्वात् एवाधिशीलविहार इति । या तत्र विमला भूमि:सेहाधिशीलविहारो वेदितव्य: ।

तत्र कतमे बोधिसत्त्वानामाकारा: कानि लिङ्गानि कानि निमित्तानि अधिचित्तविहारस्य । इह बोधिसत्त्वेन पूर्वमेवाधिशीलविहारे ते दश शुद्धाशया मनसिकृता भवन्ति जुष्टा प्रतिविद्धा: । दशभिरपरैराकारैस्तेषां चित्ताशयमनसिकाराणामधिमात्रत्वात् परिपूर्णत्वादधिशीलविहारं समतिक्रम्याधिचित्तविहारमनुप्रविशति । शुद्धो मे दशभिराकारैश्चित्ताशय इति मनसिकारेण । अभव्यश्चाहं तस्माद् दशाकाराच्छुद्धाशयात्परिहाणायेति मनसिकारेण । सर्वास्रवसास्रवेषु मे धर्मेषु चित्तं न प्रस्कन्दति प्रतिकूलतायां च सन्तिष्ठत इति मनसिकारेण । तत्प्रतिपक्षभावनायां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

च मे विज्ञानं संस्थितमिति मनसिकारेण । अभव्यश्चाहमस्मात्प्रतिपक्षात्पुनः परिहाणायेति मनसिकारेण । अभव्यश्चाहमेवं दृढप्रतिपक्षस्तैः सर्वास्रवसास्रवैर्धर्मैः सर्वमारैश्चाभिभवितुमिति मनसिकारेण । असंलीनं च मे मानसं प्रवर्तते सर्वबुद्धधर्मेष्विति मनसिकारेण । सर्वदुष्करचर्यासु च मे नास्ति व्यथेति मनसिकारेण । अधिमुक्तं च मे महायाने चित्तमेकान्तेन न तदन्यहीनयानेष्विति मनसिकारेण । सर्वसत्त्वार्थक्रियाभिरतञ्च मे चित्तमिति मनसिकारेण । एभिर्दशभिश्चित्ताशयमनसिकारैः प्रविशति ।

अधिचित्तविहारस्थितो बोधिसत्त्वः सर्वसंस्कारानादीनवाकारैर्विचित्रैर्विदूषयति । तेभ्यश्च मानसमुद्वेजयति । बुद्धज्ञाने चानुशंसदर्शी भवति विचित्रैरनुशंसाकारैः । तत्र च स्पृहाजातो भवति घनरसेन च्छन्देन । सत्त्वधातुं दुःखितं व्यवलोकयति विचित्रैर्दुःखाकारैः । तेषु च सत्त्वेषूपेक्षाचित्तो भवत्यर्थप्रतिशरणचित्तः । सर्वसंस्कारेष्वप्रमत्तः । बोधायोत्तप्तवीर्यः । सत्त्वेषु विपुलकरुणाशयः । तेषां सत्त्वानामत्यन्तदुःखविमोक्षोपायं सर्वक्लेशानावरणज्ञानमेव पश्यति । तस्य च विमोक्षस्य समुदागमाय धर्मधातौ सर्वविकल्पप्रचार संक्लेशोत्पत्तिप्रतिपक्षं प्रज्ञां पश्यति । तस्य च ज्ञानालोकस्य निष्पत्तये सम्यक्संबोधिं पश्यति । तञ्च ध्यानसमाधिसमापत्तिनिर्हारं बोधिसत्त्वपिटकश्रवणपूर्वकं श्रवणनिदानं पश्यति । दृष्ट्वा च महता वीर्यारम्भेण श्रुतपर्येष्टिमापद्यते । सद्धर्मश्रवणहेतोर्नास्ति तद्द्रविणं परिष्कारसाध्यात्मिक-वाह्यं वस्तु

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यन्न परित्यजति । नास्ति सा गुरुपरिचर्या यान्नाभ्युपगच्छति । नास्ति सा सन्ततिर्यान्नाभ्युपगच्छति । नास्ति सा कायोत्पीडा यान्नाभ्युगच्छति । स प्रीततरो भवत्येक चतुष्पदगाथाश्रवणेन न त्वेवं त्रिसाम्रपूर्णप्रतिमेन महारत्नराशिना । प्रीततरो भवत्येकधर्मपदश्रवणेन सम्यक्संबुद्धोपनीतेन बोधिसत्त्वचर्यापरिशोधकेन न सर्वशक्रत्व मारत्व ब्रह्मत्व- लोकपालत्व- चक्रवर्तित्व-समुच्छ्रयप्रतिलम्भैः । स चेदेनं कश्चिदेवं वदेत् । एवमहमिदं धर्मपदं सम्यक्संबुद्धोपनीतं सर्वबोधिसत्त्व-चर्यापरिशोधकं तेऽनुश्रावयिष्यामि स चेन्महत्यामग्निखदा-यामात्मानं प्रक्षिपसि महान्तञ्च दुःखोपक्रमं संप्रतीच्छसीति । श्रुत्वास्यैवं भवेत् । उत्सहाम्यहमस्य धर्मपदस्यार्थे पूर्ववत् त्रिसाहस्रमहासाहस्रप्रतिमायामाप्यग्निखदायां ब्रह्मलोकादात्मानमुत्संष्टुं प्रागेव प्रत्यवरायाम् । नारकदुःखसंवासैरप्यस्माभिर्बुद्धधर्माः पर्येषितव्याः प्रागेव प्राकृतैर्दुःखोपक्रमैरिति । एवंरूपेण वीर्यारम्भेण धर्मान् पर्येष्यैवं योनिशोमनसिकरोति । यथा धर्मान्नुधर्मप्रतिपत्तिं बुद्धधर्मानुगतां न व्यञ्जनस्वरमात्रविशद्धिमिति विदित्वा तदेव श्रुतं निश्रित्य धर्मनिमित्तानि सम्यगालम्बनीकुर्वन् विविक्तं कामैर्विस्तरेण प्रथमं द्वितीयं तृतीयं चतुर्थञ्च ध्यानं लौकिकं चतस्र आरूप्यसमापत्तीर्लौकिकीश्चत्वार्य-प्रमाणानि पञ्च चाभिज्ञा उपसंपद्य विहरति । स तैर्बहुलं विहृत्य तानि ध्यानानि समाधीन् समापत्तीः व्यावर्तयित्वा प्रणिधानवशेन कामधातौ यत्र सत्त्वार्थं बोधिपक्षधर्मपरिपूरिं च पश्यति तत्रोपपद्यते । न त्वेवास्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तद्वशेनोपपत्तिर्भवति । तस्य कामवीतरागत्वात्कामबन्धनानि प्रहीणानि भवन्ति ध्यानसमाधिसमापत्तिव्यावर्तनत्वाद् भवबन्धनानि । अधिमुक्तिचर्या-भूमावेवास्य पूर्वमेव धर्मतथताधिमोक्षाद् दृष्टिकृतबन्धनानि प्रहीणानि भवन्ति । मिथ्यारागद्वेषमोहाश्चास्यात्यन्तं न प्रवर्तन्ते । तस्य बुद्धदर्शनं विस्तरेण कुशलमूलविशुद्धिः पूर्ववद्वेदितव्या । तत्रायं विशेषः । तद्यथा तदेव सुवर्णकुशलस्य कर्मारस्य हस्तगतं प्रक्षीणमलकषायमपि समधरणमवतिष्ठते तुल्यमानम् । एवमस्य साकुशल मूलविशुद्धिर्वेदित्तव्या । उपपत्तितश्च शक्रो भवति देवेन्द्रो यद्भूयसा । कुशलः सत्त्वानां कामरागविनिवर्तनतायै । प्रभावेऽपि यत्र पूर्वके विहारे सहस्रमाख्यातं तत्रेह शतसहस्रं वेदितव्यम् । अयं बोधिसत्त्वानामधिचित्तविहारश्चित्तमनस्कार- परिनिष्पत्ति प्रवेशतश्च संसारसत्त्वधातुमहाबोधिसम्यक् प्रतिवेधतश्च सत्त्वदुःखविमोक्षोपाय-सम्यक्-पर्येषणतश्च महागौरवधर्मपर्येषणतश्च धर्मानुधर्मप्रतिपत्ति-लौकिकध्यानसमाधिसमापत्त्यभिज्ञाभिनिर्हार-विहारतश्च तद्वयावर्तनं प्रणिधाय यत्र कामोपपत्तितश्च कुशलमूलविशुद्धितश्चोपपत्तितश्च प्रभावतश्च समासनिर्देशतो वेदितव्यः । विस्तरनिर्देशः पुनर्यथासूत्रं तद्यथा दशभूमिके प्रभाकर्यां भूमौ । श्रुताकारधर्मालोकावभास-समाध्यालोकावभास - प्रभावितत्वादस्या भूमेः प्रभाकरीत्युच्यते । अध्यात्मं चित्तविशुद्धिमुपादाय सा प्रभा संभवति तस्मात्स विहारः अधिचित्त इत्युच्यते । येनार्थेन प्रभाकरी भूमिः तेनैवार्थेनाधिचित्तविहारो वेदितव्यः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र कतमो बोधिसत्त्वानां बोधिपक्ष्यप्रतिसंयुक्तोऽधिप्रज्ञविहारः । इह बोधिसत्त्वेन पूर्वमेवाधिचित्तविहारे दश धर्मालोकप्रवेशाः श्रुतपर्येष्टिमधिपतिं कृत्वा प्रतिलब्धा भवन्ति । येषामधिमात्रत्वात्परिपूर्णत्वादधिचित्तविहारमतिक्रम्य प्रथममधिप्रज्ञविहारं प्रविशति । ते पुनर्दश धर्मालोकप्रवेशा ग्रन्थतो यथा सूत्रमेव वेदितव्याः । ये च प्रज्ञप्यन्ते यत्र च प्रज्ञप्यन्ते येन च प्रज्ञप्यन्ते ते च यत्समाः परमार्थः यस्य च संक्लेशव्यवदानश्च संक्लिश्यन्ते विशुद्धन्ते च यत्प्रतियुसंक्तेन संक्लेशेन संक्लिश्यन्ते यया चानुत्तरया विशुद्धया विशुध्यन्ते । इत्ययं समासार्थस्तेषां धर्मालोकनिर्देशानां वेदितव्यः । स तस्मिन् विहारे व्यवस्थितः । अभेद्याशयता पूर्वङ्गमैर्यथासूत्रमेव दशाकारेण ज्ञानपरिपाकेन ज्ञानपरिपाचकैर्धर्मैः समन्वागतः संवृत्तो भवति तथागतकुले तदात्मक-धर्मप्रतिलम्भात् । सर्वाकारां बोधिसत्त्वापेक्षामधिपतिं कृत्वा स्मृत्युपस्थानप्रमुखान् सप्तत्रिंशद्बोधिपक्ष्यान् धर्मान् भावयन्ति यथासूत्रमेव । तस्य तान्धर्मानुपायपरिग्रहेण भावयतः सत्कायदृष्टिः सुसूक्ष्माप्यस्य स्कन्धधात्वायतनान्यभिनिवेशः सर्वेञ्जितानि चात्यन्तासमुदाचारतः प्रहीयन्ते । तेषां प्रहाणाद् यानि तथागत–विवर्णितानि कर्माणि तानि सर्वेण सर्वं नाध्याचरति । यानि पुनस्तथागत–वर्णितानि तानि सर्वाप्यनुवर्तन्ते यथावत् । तथाभूतश्च भूयसा मात्रया स्निग्धमृदुकर्मण्यचित्तश्च भवति तथा चित्राकारसुविशुद्धचित्तश्च । कृतज्ञकृतवेदितादिभिस्तदाशयानुगुणैर्विचित्रैः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
शुक्ल-धर्मैः समन्वागतो भवति। उत्तरी च भूमिपरिशोधकानि कर्माणि समन्वेषमाणो महावीर्यारम्भप्राप्तो भवति । तस्य तन्निदानमाशयाध्याशयाधिमुक्तिधातुः परिपूर्यते । तन्निदानं चासंहार्यो भवति अविकम्प्यः सर्वतीर्थ्यमारशासनप्रत्यर्थिकभूतैः । पूर्ववच्च बुद्धदर्शनं विस्तरेण कुशलमूलविशुद्धिर्वेदितव्या । तत्रायं विशेषः । तद्यथा तदेव सुवर्णकुशलेन कर्मकारेणालंकारविधिकृतमसंहार्यं भवत्यकृताभरणैर्जातरुपैः । एवमस्य बोधिसत्त्वस्य तानि कुशलमूलान्यसंहार्याणि भवन्ति तदन्यबालविहारस्थितैर्बोधिसत्त्वकुशलमूलैः । तद्यथा च मणिरत्नमुक्तालोकमसंहार्य भवति तदन्यैर्मणिभिः । सर्ववातोदकवृष्टिभिश्चानाच्छेद्यप्रभं भवति । एवमयं बोधिसत्त्वोऽसंहार्यो भवति सर्वश्रावकप्रत्येकबुद्धैः । अनाच्छेद्यप्रज्ञालोकश्च भवति सर्वमारप्रत्यर्थिकैः । उपपत्तितश्च सुयामो भवति देवराजः। कुशलः सत्त्वानां सत्कायदृष्टिविनिवर्तनतायै । प्रभावे च यत्र पूर्वविहारे शतसहस्रगुणं समाख्यातं तत्रास्मिन् कोटिसमाख्यातं वेदितव्यम् । अयं बोधिसत्त्वानां बोधिपक्ष्याधिप्रज्ञविहारः । धर्मालोकप्रवेशनिष्पत्तिं प्रतिलाभतश्च ज्ञानपरिपाचनतश्च बोधिपक्ष्यधर्मनिषेवणतश्च सत्कायदृष्ट्यादि—सर्वाभिनिवेशेञ्जितप्रहाणतश्च प्रतिषिद्धानुज्ञातकर्मविवर्जन—निषेवणतश्च तन्निदानं चित्तमार्दवतश्च तदन—कूलगुणसमृद्धितश्च भूमिपरिशोधक—कर्मपर्येष्टिमारभ्य महावीर्यारम्भतश्च तन्निदानमाशयाध्याशयाधिमुक्तिविशोधनतश्च तन्निदानं सर्वशासनप्रत्यर्थिकासंहार्यतश्च कुशलमूलविशुद्धितश्चोप-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
पत्तितश्च प्रभावतश्च समासनिर्देशतो वेदितव्यः । विस्तरनिर्देशः पुनस्तद्यथादशभूमिकेऽर्चिष्मती भूमिनिर्देशे बोधिपक्ष्या धर्मास्तस्यां भूमौ ज्ञानार्चिभूताः सम्यग्धर्मदेशना प्रज्ञावभासकरकालोकानाम् । तस्मात्सा भूमिरर्चिष्मतीत्युच्यते । सैव चेह बोधिपक्ष्याप्रज्ञावभासकरधिप्रज्ञविहार इत्युच्यते ।

तत्र कतमो बोधिसत्त्वानां सत्यप्रतिसंयुक्तो द्वितीयोऽधिप्रज्ञविहारः । इह बोधिसत्त्वः पूर्वकेऽधिप्रज्ञविहारेया दश विशुद्धाशयसमताः प्रतिलब्धाः तासामधिमात्रात्वात् परिपूर्णत्वात् द्वितीयमधिप्रज्ञविहारं प्रविशति । दश विशुद्धाशयसमता यथासूत्रं ग्रन्थतो वेदितव्याः । असमैश्च बुद्धैर्बुद्धाः समाः । तदन्यसत्त्वधातुसमतिक्रान्ताः । यैश्च धर्मैर्यथा समाः । इत्ययं समासार्थो विशुद्धाशयसमतानां वेदितव्याः । सोऽस्मिन्विहारे व्यवस्थितः । भूयो ज्ञानवैशेषिकतां प्रार्थयमानः चत्वार्यसत्यानि दशभिराकारैर्यथाभूतं प्रजानाति । ग्रन्थतो यथासूत्रमेव सर्वं वेदतव्यम् । परसंज्ञापनतां प्रत्यात्मज्ञानतां तदुभयाधिष्ठानतां चारभ्य यच्च देश्यते । सूत्रविनयमातृकामारभ्य येन च देश्यते । प्रत्युपन्नदुःखात्मकतां हेतु त श्चानागतदुःखप्रभावतां हेतुक्षयात् (तत्) क्षयानुत्पाद (न) तां तत्प्रहाणोपायनिषेवणतां चारभ्य यथा देश्यते । इत्ययं समासार्थस्तस्य दशाकारस्य चतुरार्यसत्यज्ञानस्य वेदितव्यः । स एवं सत्यकुशलः सर्वञ्च संस्कारगतं प्रज्ञया सम्यग्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
विदूषयति । सत्त्वधातौ च करूणाशयं विवर्धयति । पूर्वान्तापरान्ततश्च बालसत्त्वमिथ्याप्रतिपत्तिं सम्यक् प्रतिविध्यति । तेषाञ्च विमोक्षाय महापुण्यज्ञानसम्भारपरिग्रहे चित्तं प्रणिधते । तद्गताशयं च समुदानयति । स्मृतिमतिगतिप्रमुखैः प्रभूतैर्विचित्रै र्गुणैः समृद्धश्च । अन्य मनसिकारापगतः। चित्रैः परिपाचनोपायैः सत्त्वान् परिपाचयति । यानि च सत्त्वानुग्राहकानि लौकिकानि लिपिशास्त्रमुद्रागणनादीनि यथासूत्रमेव शिल्पकर्मस्थानानि तानि सर्वाण्याभिनिर्हरति सत्त्वकरुण (त) या । अनुपूर्वेण यावत् बोधिप्रतिष्ठापनार्थं लौकिकव्यवहारानुकूलतया दारिद्रय-नाशोपायतया धातुवैषम्यमनुष्यामनुष्योपसंहृतोपद्रवप्रशमनतयाऽनवद्यक्री-डारतिवस्तूपसंहारतो धर्मरतिव्यावर्तनतया सन्निवासोपकरणार्थिनामल्पकृच्छ्रेण सन्निवासोपकरणोपसंहरणतया राजचौराद्युपद्रवपरित्राणतया स्थानास्थानप्रयोगानुज्ञाप्रतिषेधनतया मङ्गल्यामङ्गल्यवस्त्वादानत्यागसन्नियोजनतया दृष्टे धर्मे परस्परानभिद्रोहसम्परायाविपरीताभ्युदयमार्गोपदेशनतया । इत्ययं तेषां सत्त्वानुग्राहकानां शिल्पकर्मस्थानानां समासार्थो वेदितव्यः । सर्वमन्यत्पूर्ववतत् । तत्रायं विशेषः । तद्यथा तदेव स्वर्णकुशलेन कर्मकारेण मुसारगल्व-मृष्टं प्रत्यर्पितमतुल्यतयाऽसंहार्यं भवति तदन्यैः सुवर्णैः । एवमयं बोधिसत्त्वोऽसंहार्यो भवति सर्वश्रावकप्रत्येकबुद्धैः तदन्यभुमिस्थितैश्च बोधिसत्त्वैः । तद्यथा चन्द्रसुर्यनक्षत्राणामाभा असंहार्या च भवति सर्व वातमण्डलैः । (सर्व) वातवाहा साधारण च भवति । एवमेवास्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बोधिसत्त्वस्य सा प्रज्ञा असंहार्या भवति सर्वश्रावकप्रत्येकबुद्धैः । लौकिकक्रिया साधारणा च भवति । उपपत्तितः संतुषितो भवति देवराजः । कुशलः सर्वतीर्थ्यविनिवर्तनतायै । प्रभावश्च कोटीशतसहस्रसंख्या निर्देशतो वेदितव्यः । अयं बोधिसत्त्वानां सत्यप्रतिसंयुक्तोऽधिप्रज्ञविहारः। शुद्धाशयसमता-निष्पत्ति-प्रवेशतश्च उपायसत्यव्यवचारणा - प्रतिविवर्धनतश्च—सर्वसंस्कारविदूषणतश्च कारुण्यविवर्धनतश्च तदर्थं पुण्यज्ञानसंभारोपचयप्रणिधानप्रयोगतश्च स्मृतिमतिगत्यादिगुणविवृद्धितश्चानन्यमनसिकार-सर्वाकार-सत्त्वपरिपाचताभियोगतश्च लौकिकशिल्पाभिनिर्हारतश्च कुशलमूलविशुद्धितश्चोपपत्तितश्च प्रभावतश्च समासनिर्देशतो वेदितव्यः । विस्तरनिर्देशतः पुनस्तद्यथा दशभूमिके सुदुर्जयायां भूमौ सत्त्वेषु निश्चयज्ञानं सुदुर्जयम् । तच्चेह परिदीपितम् । तस्मात्सा भूमिः सुदुर्जयेत्युच्यते । तेनैव चार्थेन सत्यप्रतिसंयुक्तोऽधिप्रज्ञविहारो द्रष्टव्यः ।

तत्र कतमो बोधिसत्त्वानां प्रतीत्यसमुत्पादप्रतिसंयुक्तोऽधिप्रज्ञविहारः । इह बोधिसत्त्वेन पूर्वमेव सत्यप्रतिसंयुक्ते अधिप्रज्ञविहारे दश धर्मसमताः प्रतिलब्धा भवन्ति । यथासूत्रं ग्रन्थतस्ता वेदितव्याः । तासामधिमात्रत्वात्परिपूर्णत्वादिदं विहारमनुप्रविशति । सर्वधर्मेषु पारमार्थिकस्य सतः स्वभावस्य निर्निमित्तसमतया अभिलापाभिसंस्कारप्रतिभासस्यालक्षणसमतया तस्यैवालक्षणत्वात् स्वयमजातसमतया हेतुतोऽनुत्पन्नसमता स्वयं हेतु तश्चा-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
नुत्पन्नत्वादत्यन्तमादिशान्तसमतया विद्यमानस्य वस्तु-ग्राहकस्य ज्ञानस्य निष्प्रपञ्चसमतया आदानत्यागाभि-संस्कारविगमसमतया च तस्यैव क्लेशदुःखसंक्लेश-विसंयोगाद् विविक्तसमतया विकल्पितस्य ज्ञेयस्वभावस्य मायानिर्मितोपमसमतया निर्विकल्पज्ञानगोचरस्य स्वभावस्य भावाभावाद्वयसमतया। इत्ययं तासां दशानां धर्मसमता-नामर्थविभागो वेदितव्यः। सोऽस्मिन्विहारे स्थितः सत्त्वेषु संवृद्धकरुणो बोधौ तीव्रच्छन्दाभिलाषजातः। लोकानां संभवञ्च विभवञ्च सर्वाकारया प्रतीत्यसमुत्पाद-सम्यग्-व्यवचारणतया व्यवचारयति प्रजानाति। प्रतीत्यसमुत्पाद-ज्ञानसन्निश्रितं चास्य विमोक्षमुखत्रयमाजातं भवति शून्यमनिमित्तमप्रणिहितम्। ततो निदानं चास्यात्म-पर-कारक-वेदकभावाभावसंज्ञा न प्रवर्तन्ते। स एवं परमार्थकुशलः सत्त्वसापेक्षः योनिशः प्रतिविध्यति क्लेशसंयोगात्। प्रत्ययसामग्र्याच्च संस्कृतं प्रकृति-दुर्बलमात्मात्मीयविरहितमनेकदोषदुष्टं प्रवर्तते न विना क्लेशसंयोगप्रत्ययसामग्रीम्। तेन मया क्लेशसंयोग-प्रत्ययसामग्रीं च विकलीकर्तव्या चात्मरक्षार्थम्। न च सर्वेण सर्वं संस्कृतं व्युपशमयितव्यं सत्त्वानुग्रहार्थम्। तस्यैवं ज्ञानकारुण्यानुगतस्यास्मिन् विहारेसऽङ्गज्ञानाभिमुखो नाम प्रज्ञापारमिताविहारः अभिसंमुखी भवति। येनायं सर्वलोकिकचर्यास्वशक्तश्चरति। स च विहारो या तीक्ष्णा सप्तम्यां भूमौ प्रायोगिकचर्यापर्यन्तगता बोधिस-त्त्वक्षान्तिः तयानुलोमिक्या क्षान्त्या संगृहीतो वेदितव्यः। सोऽसङ्गज्ञानाभिसुख – प्रज्ञापारमिता – विहा – राभिमुख्याद्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
बोध्याहारकांश्च प्रत्ययानाहरति । लौकिकानाञ्च संस्कृतसंवासे न संवसति । प्रशमे च शान्तदर्शी भवति । न च तत्रावतिष्ठते । तस्यैवमुपाय-प्रज्ञाज्ञानानुगत-स्यावतार-शून्यतासमाधिप्रमुखानि दश समाधिमुखशत-सहस्राण्यामुखी भवन्ति । यथा शून्यतासमाधिः एवम-प्रणिहितानिमित्तसमाधयो वेदितव्याः । तेषामामुखीभावाद-भेद्याशयश्च भवति । सर्वाकाराच्छासनादसंहार्यश्च भवति सर्वमारतीर्थ्यशासनप्रत्यर्थिकैः शेषं पूर्ववत् । तत्रायं विशेषः । तद्यथा तदेव सुवर्णं कुशलेन कर्मकारेण वैदूर्यमणिरत्नमृष्टं प्रत्यर्पितमसंहार्यं भवति तदन्यैः सर्वजातरूपैः एवमस्य बोधिसत्त्वस्य तानि कुशलमूलानि विशुद्धतराणि भवन्त्यसंहार्याणि पूर्ववत् । तद्यथा चन्द्रप्रभा सत्त्वाश्रयांश्च प्रह्लादयत्यनाच्छेद्यप्रभा च भवति चतसृभिर्वातमण्डलिकाभिः । एवमस्य बोधिसत्त्वस्य सा प्रज्ञाभा सर्वसत्त्वक्लेशपरिदाहञ्च प्रशमयति । अनाच्छेद्या च भवति सर्वमारप्रत्यर्थिकैः । सुनिर्मितश्च भवति देवराजः । कुशलः सत्त्वानां सर्वाभिमानविनिवर्तनतायै । प्रभावोऽपि कोटीशतसहस्त्रं संख्यानिर्देशतो द्रष्टव्यः । अयं प्रतीत्यसमुत्पादप्रतिसंयुक्तोऽधिप्रज्ञविहारः। धर्मसमता–परिनिष्पत्तिप्रवेशतश्च प्रतीत्यसमुत्पादावबोध-विमोक्षमुखसम्भवतश्च सर्वमिथ्यासंज्ञासमुदाचारतश्च उपायसंसारपरिग्रहतश्च असङ्गज्ञानाभिमुख-प्रज्ञापारमिता-विहाराभिमुखतश्च अप्रमाण समाधिप्रतिलम्भतश्च अभेद्याशयप्रतिलम्भतश्च शासनादासंहार्यतश्च कुशलमूलविशुद्धित उपपत्तितः प्रभावतश्च समासनिर्देशतो वेदितव्यः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विस्तर-निर्दशत स्तद्यथाऽभिमुख्यां भूमौ । असङ्गज्ञानाभिमुखस्य प्रज्ञापारमिताविहारस्याभिमुख्यादभिमुखीत्युच्यते । तनैवार्थेनायं विहारो वेदितव्यः ।

तत्र कतमो बोधिसत्त्वानां साभिसंस्कारः साभोगो निर्निमित्तो विहारः । इह बोधिसत्त्वेनानन्तरेऽधिप्रज्ञविहारे दशोपायेन प्रज्ञया चाभिनिर्हृताः सर्वसत्त्वासाधारणा लौकिकाः सर्वलोकासाधारणाश्च मार्गान्तरारम्भविशेषाः प्रतिलब्धा भवन्ति । येषामधिमात्रत्वात्परिपूर्णत्वात्सप्तमं विहारमनुप्रविशति । तेषां यथासूत्रमेव ग्रन्थविस्तरो वेदितव्यः । लौकिकसम्पत्तिसंवर्तकं पुण्यपरिग्रह मारभ्य सत्त्वेषु हितसुखाशयमारभ्य बोधाय पुण्यसम्भारबोधिपक्ष्य-धर्मोत्तरोत्कर्ष-मारभ्य श्रावकासाधारणतामारभ्य प्रत्येकबुद्धासाधारणतामारभ्य सत्त्वधर्मधातुमारभ्य लोकधातुमारभ्य तथागतकायवाक्चित्तज्ञानमारभ्य । इत्यथं तेषामुपायप्रज्ञाभिनिहृतानां मार्गान्तराणामारम्भविशेषाणामधिकारार्थः समासतो वेदितव्यः । स एभिर्युक्तोऽप्रमाणसंख्येयं तथागतविषयं प्रतिविध्यति । तत्समुतथा नाय चानाभोगनिर्निमित्ताकल्पाविकल्पनतयाऽप्रमाणबुद्धिविषय-समुत्थानं पश्यन् निरन्तरं निश्छिद्रं प्रयुज्यते सर्वेर्यापथ—चारविहारमनसिकारेषु । नास्य सर्वावस्थागतस्य मार्गाविप्रयुक्तो भवति । तस्य चित्तक्षणे दशपारमिताः प्रमुखाः सर्वे बोधिपक्ष्या धर्माः परिपूर्यन्ते विशेषेण । अन्येषु तु विहारेषु न तथा । प्रथमे प्रमुदितविहारे प्रणिधानाध्यालम्बनतया द्वितीये चित्तदौःशील्य-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मलापकर्षणतया तृतीये प्रणिधानविवर्धनधर्मालोकप्रतिलाभतया चतुर्थे मार्गावतारणतया पञ्चभे लौकिकक्रियावतारण या षष्ठे गम्भीरप्रवेशनतया । आस्मिन् पुन: सप्तमे विहारे सर्वबुद्धधर्मसमुत्थापनतया बोधज्ञानि परिपूर्यन्ते बोधिसत्त्वप्रायोगिकचर्यापरिपूरिसंग्रहादस्य विहारस्य ज्ञानाभिज्ञाचर्याविशुद्धाष्टमविहाराक्रमणाच्च । तथा हि स बोधिसत्त्वोऽस्य विहारस्यानन्तरमष्टमं विशुद्धं विहारं प्रविशति। स च विहार एकान्तविशुद्ध: । इमे तु सप्त विहारा व्यामिश्रा: । विशुद्धविहारपूर्वङ्गमत्वादसंक्लिष्ट: । तदसंप्राप्तत्वात्संक्लिष्टचयपतिता वक्तव्या: । तस्मादस्मिन् विहारे सर्वे रागादिप्रमुखा: क्लेशा: प्रहीयन्ते । स च न संक्लेशो न नि:क्लेशो वेदितव्य: असमुदाचाराद् बुद्धज्ञानाभिलाषाच्च । तथाभूतस्यास्याध्याशयपरिशुद्धमप्रमाणं काय वाडभनस्कर्म प्रवर्तते । स यानि तथागतविवर्णितानि कर्माणि पूर्ववत् तस्य पञ्चमविहाराभिनिहृतानि लौकिकानि शिल्पज्ञानानीह परिपूर्यन्ते आचार्यसम्मतश्च भवति त्रिसाहस्रमहासाहस्रे स्थापयित्वा उर्ध्वविहारस्थान् बोधिसत्त्वांस्तथागतांश्च । न कश्चिदस्याशयप्रयोगाभ्यां समो भवति । सर्वे च ध्यानादयो बोधिपक्ष्या धर्मा आमुखी भवन्ति । भावनाकाराभिमुखतया नोत्तरियाकारस्थानत: । तद्यथा अष्ठमे विहारे । स तथा प्रयुक्त: सुनिश्चितविषय माधिप्रमुखानि दश समाधिशतसहस्राण्यनिनिर्हति बोधिसत्त्वसमाधीनाम् । तेषाञ्च लाभात्समतिक्रान्तो भवति श्रावकप्रत्येकबुद्धसमाधिविषयम् । स एवं सर्वक्लेशविविक्तेन दुर्विज्ञेयेन

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्वविकल्पप्रचारापगतेन कायवाङ् मनस्कर्मणा विरहति। न चोत्तरिविशेषपरिमार्गणाभियोगमुत्सृजति सत्त्वापेक्षया। बोधिपरिपूर्णार्थं तस्याप्रमाणं सर्वनिमित्तापगतं कायवाङ् मनस्कर्म प्रवर्तते सुपरिशोधितमनुत्पत्तिकधर्मक्षान्त्यावभासितम् । अस्मिन्विहारे स्वबुद्धिविषयतया सर्वश्रावकप्रत्येकबुद्धविषयसमतिक्रान्तास्तदन्येषु तु षट्षु बुद्धधर्माध्यालम्बनतया षष्ठे च विहारे बोधिसत्त्वो निरोधं समापद्यते। अस्मिंस्तु प्रतिक्षणं समापद्यते । इदञ्चास्यात्यद्भूतं कर्माचिन्त्यम् । यद् भूतकोटिविहारेण च विहरति न च निरोधं साक्षात्करोति। स तमेवोपायज्ञानाभिनिहारमधिपतिं कृत्वा सर्वसत्त्वासाधारणं बोधिसत्त्वचर्याञ्चरति लौकिकप्रतिभासाञ्चातन्मयीं च यथासूत्रमेव। तस्य तु पिण्डार्थः। पुण्यक्रियामारभ्य कडत्रपरिषत्परिग्रहमभिनिर्वृत्तिविशेषप्रार्थना-समारम्भं विमोक्षत्रयविहारतां हीनयानाधिमुक्तोपायविनयनतां कामपरिभोगं कामविशेषप्रार्थनां तीर्थिकव्यावर्तनतां परचित्तानुवर्तनतां महाजनकायानुवर्तनतां चारभ्य । शेषं पूर्ववत् । तत्रायं विशेषः । तद्यथा तदेव सुवर्णं कुशलेन कर्मकारेण सर्वमणिरत्नमृष्टं प्रत्यर्पितमत्यर्थं भ्राजते । असंहार्यञ्च भवति तदन्यैर्जाम्बूद्वीपकैराभरणैः । एवमस्य तानि कुशलमूलानि विशुद्धतराण्यसंहार्याणि भवन्ति सर्वश्रावकप्रत्येकबुद्धकुशलमूलैस्तदन्यैश्च निकृष्टतरविहारस्थैर्बोधिसत्त्वकुशलमूलैः । तद्यथा सूर्याभा जम्बूद्वीपे यद्भूयसा स्नेहश्च परिशोषयति । असंहार्या च भवति स च तदन्यप्रभाभिः। एवमस्य बोधिसत्त्वस्य प्रज्ञाभा सत्वानां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्वक्लेशविषाणि च शोषयति । असंहार्या च भवति पूर्ववत् श्रावकादिज्ञानप्रभाभिः । वशवर्ती च भवति देवराजः । कुशलः श्रावकप्रत्येकबुद्धाभिसमयोपसंहारेषु । प्रभावः कोटीशतसहस्रसंख्यानिर्देशतो वेदितव्यः । अयं साभोगो निर्निमित्तो विहारः उपायप्रज्ञाभिनिहृतमार्गान्तरा-रम्भविशेषनिष्पत्तिप्रवेशतश्च तथागतविषयसमुत्थान-प्रति-वेध-निरन्तरप्रयोगतश्च प्रतिक्षणं सर्वबोधिपक्ष्यधर्मसमुदा-गमतश्च क्लिष्टाक्लिष्ट-व्यवस्थानतश्च प्रयोगिकचर्यापरि-पूरिसंग्रहतश्च आशयशुद्धिकर्मप्रवृत्तिम् अधिकृत्य सर्वलौ-किकशिल्पकर्मादिपरिपूरणतश्च अप्रमेयश्रावकप्रत्येकबुद्धा-साधारणसमाधि-प्रतिलम्भतश्च प्रतिक्षणनिरोधसमापत्ति-तश्च सर्वसत्त्वासाधारणलोकचर्याचरणतश्च कुशलमूल-विशु-द्धितश्च उपपत्तितः प्रभावतश्च समास-निर्देशतो वेदितव्यः । विस्तरतः पूर्ववत् । तद्यथा दूरंगमायां भूमौ । बोधिसत्त्व-प्रायोगिकचर्या-परिपूरिसंगृहीतत्वात् दूरं-गमेत्युच्यते । तेनैव चार्थेन विहारो वेदितव्यः ।

तत्र कतमो बोधिसत्त्वानाम् अनाभोगो निर्निमित्तो विहारः । इह बोधिसत्त्वेन प्रथमेऽनन्तरे विहारे दशाकारं सर्वधर्मपरमार्थावतारज्ञानं प्रतिलब्धं भवति । त्रिषु अध्वेषु यथायोगम् आद्यनुत्पन्नतामजन्मतामलक्षणताम् आरभ्य तदन्यहेतुभावासम्भवाविनाशताञ्चारभ्य परमार्थ-तो निरभिलाप्यस्वभावे वस्तुन्यभिलापाभिसंस्कारप्रतिभासस्य स्वभावस्य लक्षणेन हेतुभावेन चाविद्यमानस्य तस्यैव संक्लेशात्मनाप्रवृत्तिताञ्चानिवृत्तिताञ्चारभ्य तदज्ञाननि-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

थ्याभिनिवेशहेतुकाञ्च तस्मिन्विद्यमाने वस्तुनि निरभिलाप्ये आदौ मध्ये पर्यवसाने सर्वकालसंक्लेशसमतां चारभ्य तथता-सम्यक्प्रवेशनिर्विकल्पसमतया च तत्संक्लेशापनयनमारभ्य । इत्यस्य ज्ञानस्य दशाकारस्याधिमात्रत्वात्परिपूर्णत्वादिमम‌ष्टमं परिशुद्धं विहारमवतरति ।

इहस्थश्चानुत्पत्तिकेषु धर्मेषु परमां बोधिसत्त्वक्षान्तिं सुविशुद्धां लभते । सा पुनः कतमा । चतसृभिः पर्येषणाभिरयं बोधिसत्त्वः सर्वधमान् पर्येष्य यदा चतुर्भिरेव यथाभूतपरिज्ञानैः परिजानाति । तदा सर्वमिथ्याविकाभिनिवेशेष्वपनीतेषु सर्वधर्माणां दृष्टे च धर्मे सर्वसंक्लेशानुत्पत्यनुकूलतां पश्यति । सम्पराये च सर्वेण सर्वं निरवशेषतोऽनुत्पतिं पश्यति तेषामेव पूर्वमिथ्याविकल्पाभिनिवेशहेतुसमुत्पन्नानां धर्माणाम् । ताः पुनः चतस्रः पर्येषणा यथापूर्वं निर्दिष्टास्तत्त्वार्थपटले। चत्वारि च यथाभूतपरिज्ञानानि तान्यधिमुक्तिचर्याविहारमुपादाय यावत्साभोगनिर्निर्मित्ताद्विहारान् न सुविशुद्धानि भवन्ति । अस्मिंस्तु विहारे परिशुद्धानि भवन्ति । तस्मात् स बोधिसत्त्वः अनुत्पत्तिकेषु धर्मेषु क्षान्तिप्रतिलब्ध इत्युच्यते । स तस्याः क्षान्तेर्लाभाद् गम्भीरं बोधिसत्त्वविहारमनुप्राप्तो भवति । तस्य ये पूर्वके निर्निमित्ते विहारे चत्वारोऽपक्षालास्ते प्रहीणा भवन्ति । यः साभोगाभिसंस्कारः स प्रहीणो भवति । उत्तरि च विशुद्धविहारे औत्सुक्यं प्रहीणं भवति । सर्वाकारसत्त्वार्थक्रियाशक्तावौत्सुक्यं प्रहीणं भवति । सूक्ष्मसंज्ञा-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समुदाचारश्च प्रहीणो भवति । तस्मात् स विहारः सुविशुद्ध इत्युच्यते ।

तस्य च तस्मिन् (दूरंगमायां भूमौ) गम्भीरे विहारेऽभिरतस्रा तस्मिन् धर्ममुखस्रोतसि तथागत-संचोदना -समादापना - अभिनिर्हारमुख-ज्ञानाभिज्ञा-कर्मोपसंहारोऽ-प्रमेयः । तथा संचोदितस्य चाप्रमाणकायविभक्तिज्ञाना-भिनिर्हारो दशवशिता-प्राप्तिश्च यथासूत्रमेव विस्तरेण वेदितव्याः।वशिताप्राप्तः स तावदाकांक्षति तावत्तिष्ठति । येन वा ध्यानविमोक्षादिचित्तविहारेणाकांक्षति तेन विहरति । संकल्पमात्रेणैवास्य सर्वभोजनादि-परिष्कार-सम्पद् भवति । सर्वशिल्पकर्मस्थानेषु चास्य यथाकाम-प्रचारता भवति । सर्वोपपत्तिसंवर्तनीयेषु च कर्मसु सर्वोपपत्त्यायतनेषु चास्य कामकामोपपत्तिता भवति । यथेप्सितञ्च सर्वर्द्धिकार्यं करोति । सर्वप्रणिधानानि चास्य यथाकामं समृध्यन्ति । यद् यदेव वस्तु यथाधिमुच्यते तत्तथैव भवति नान्यथा । यञ्च ज्ञेयं ज्ञातुकामो भवति तदपि जानीते यथावत् । नाम-कायपदकायव्यञ्जनकायानाञ्च निकामलाभी भवति । सर्वधर्मसम्यक्व्यवस्थानकुशलः । एवं वशिताप्राप्तस्य बोधिसत्त्वस्यातः परेण वशिताप्राप्तकृतोऽनुशंसो विस्तरेण यथासूत्रमेव वेदितव्यः । औदारिकञ्च बुद्धदर्शनं विहाय सततसमितमविरहितो भवति बुद्धदर्शनेन । शेषकुशल-मूलविशुद्धिर्यथासूत्रं वेदितव्या । महर्घसुवर्णदृष्टान्तेन (आभादृष्टान्तेन) च । उपपत्तिः प्रभावविशेषश्चाप्यस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बोधिसत्त्वस्यास्मिन्विहारे यथासूत्रमेव वेदितव्यः । अयमनाभोगो निर्निमित्तो विहारः । परमार्थवतारज्ञान-निष्पत्तिप्रवेशतश्च अनुत्पत्तिकधर्मक्षान्तिलाभतश्च सर्वा-पक्षालापगत-गम्भीर-बोधिसत्त्वविहारप्राप्तितश्च धर्ममुख-स्रोतसि बुद्धैरप्रमेयाभिनिर्हारमुखज्ञानाभिज्ञाकर्मोपसंहारतश्च अप्रमाणकायविभक्तिज्ञानप्रवेशतश्च वशिताप्राप्तितश्च वशितानुशंसप्रत्यनुभवनतश्च कुशलमूलविशुद्धित उप-पत्तिः प्रभावतश्च समासनिर्देशतो वेदितव्यः । विस्तरेण निर्देशतो यथासूत्रं तद्यथाऽचलायांभूमौ । पूर्वकाभिसंस्का-रापगमादनाभोगानिश्चलवाहिमार्गसमारूढं तच्चित्तं तस्यां भूमौ प्रवर्तते । तस्मात् सा भूमिरचलेत्युच्यते । तेनैव चार्थेनायं विहारो द्रष्टव्यः ।

तत्र कतमो बोधिसत्त्वानां प्रतिसंविद्विहारः । इह बोधिसत्त्वस्तेनापि विहारेण गम्भीरेणासंतुष्ट उत्तरिज्ञान-विशेषतामनुगच्छन् यैश्च धर्मज्ञानाभिसंस्कारैः परेषां धर्मः सर्वाकारो बोधिसत्त्वेन देशयितव्यो यच्च धर्मा-ख्यानकृत्यं तत्सर्वं यथाभूतं प्रजानाति तत्रेदं धर्मसमाख्यानकृत्यम् । गहनोपविचारेषु ये च संक्लि-श्यन्ते विशुध्यन्ते च । येन च संक्लिश्यन्ते येन च विशुध्यन्ते । यच्च संक्लेशव्यवदानम् । या च तस्यानैकान्तिकता । या च तस्यैकान्तिकता । या च तस्यैकान्तिकताऽनैकान्तिकता । तस्य यथाभूतज्ञानम् । एवञ्च धर्म-देशनाकुशलस्य देशनाकृत्यकुशलस्य च यत् सर्वाकारमहाधर्म - भाणकत्वम् अप्रमेयधारणी-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तस्य सर्वस्वराङ्गविभक्तिकुशलस्याक्षयप्रतिभानस्य । यादृश्या धर्मधारणोद्ग्रहणशक्त्या समन्वागतस्य । यया बोधिसत्त्वप्रतिसंविदभिनिहृतया वाचा । यादृशे धर्मासने निषण्णस्य । यत्र येषु च धर्म देशयतः यावद्भिर्मुखैः । यया सत्त्व-विज्ञापन सन्तोषण-कृत्य-संनियोजन-शक्त्या समन्वागतस्य । तत् सर्वं यथासूत्रमेव विस्तरनिर्देशतो वेदितव्यम् । कुशल-मूलविशुद्ध्युपपत्तिप्रभावविशेषोऽपि यथासूत्रमेव वेदितव्यः । अयं बोधिसत्त्वानां प्रतिसंविद्विहारः शान्तविमोक्षसन्तुष्टि-प्रवेशतश्च धर्मसमाख्यानाभिसंस्कारज्ञानतश्च तत्कृत्य-ज्ञानतश्च अचिन्त्यमहाधर्मभाणकत्वप्रतिलम्भतश्चकुशल-मूलविशुद्धित उपपत्तितः प्रभावतश्च समासनिर्देशतो वेदितव्यः । विस्तरनिर्देशतः पुनः यथासूत्रमेव । तद्यथा साधुमत्यां भूमौ । सर्वसत्त्वानां हितसुखाशयपरिशुद्ध्या बोधिसत्त्वप्रतिसंविन्मत्या धर्मसमाख्यानाधिकारत्वात् सा भूमिः साधुमतीत्युच्यते । तेनैव चार्थेनायमपि विहारो द्रष्टव्यः ।

तत्र कतमो बोधिसत्त्वानां परमो विहारः । इह बोधिसत्त्वस्य प्रतिसंविद्-विहारे सर्वाकारपरिशुद्धे धर्मराज-त्वार्हस्य धर्माभिषेकसमासन्नस्य विमलादिसमाधि-अप्रमेय-प्रतिलम्भ-तत्कृत्यकरणतः सर्वज्ञज्ञानविशेषाभिषेकपश्चिम-समाधिसम्मुखीभावाच्च सर्वबुद्धेभ्यस्तदनुरूपासनकायपरि-वारप्रतिलाभिनः स्वरश्मिगमनप्रत्यागमनैः सर्वाकारसर्वज्ञ-ज्ञानाभिषेकप्रतिलम्भतश्च अभिषिक्तस्य च सर्वविनेय-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समुदानयन-तद्विमोक्षोपाय-बुद्धकृत्यज्ञानतश्च अप्रमेय-विमोक्ष-धारणी-अभिज्ञा प्रतिलम्भतश्च तदाधिपतेय महा-स्मृतिज्ञानाभिनिर्हारनिर्वचनव्यवस्थानतश्च महाभिज्ञाभिनि-र्हारतश्च कुशलमूलविशुद्धि - उपपत्तिप्रभावशिषतश्च समासनिर्देशतः परमो विहारो वेदितव्यः । विस्तर-निर्देशतः पुनर्यथासूत्रमेव तद्यथा धर्ममेघायां बोधिसत्त्व-भूमौ । परिपूर्णबोधिसत्त्वमार्गः सुपरिपूर्ण- बोधिसम्भा-रश्च स बोधिसत्त्वः तथागता नामन्तिकात् धर्ममेघभू मित्युदारां दुःसहां तदन्यैः सर्वसत्त्वैः सद्धर्मवृष्टिं सम्प्रतीच्छति । महामेधभूतश्च स्वयमनभिसम्बुद्धबोधि-अभिसम्बुद्धबोधिश्चाप्रमेयानां सत्त्वानां सद्धर्म- वृष्टया निरपमया क्लेशरजांसि प्रशमयति । विचित्राणि च कुशलमूलशस्यानि विरोहयति विवर्धयती पाचयती तस्यां भूमाववस्थितः । तस्मात् सा भूमिर्धर्ममेघेत्यु-च्यते । तेनैव चार्थेन परमो विहारो द्रष्टव्यः ।[११८]

६५. समन्तप्रभा, निरुपमा, ज्ञानवती । एताः सहितास्त्रयोदश भूमयः ॥

त्रयोदशी भूमिस्तु अप्रतिष्ठितनिर्वाणधातुरूपा ।[११९]

६६. पञ्च चक्षूंषि । मांसचक्षुः, धर्मचक्षुः, प्रज्ञाचक्षुः, दिव्यचक्षुः, बुद्धचक्षुश्चेति ॥

---

११८. बो.भू. पृ. २२७ - २४२
११९ बौ.त.को.भा.१. पृ. ८७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अत्र प्रथमं मांसचक्षुषाऽऽदिकर्मिको योगी विश्वबिम्बमभिज्ञामन्तरेण पश्यति । ज्ञानचक्षुषा सम्यक्संबुद्धावधिवशात् सर्वोपधिविनिर्मुक्तितः ।

प्रज्ञाचक्षुषा बोधिसत्त्वावधिवशात् ।
दिव्यचक्षुषाऽभिज्ञावधिवशात् ।
बुद्धचक्षुषा वीतरागावधिवशात् ।

एवं तथागतस्य पञ्चचक्षूंषि मांसादीन्युक्तानि शून्यतादर्शनं प्रति । अन्ये सत्त्वाः शून्यतादर्शनविषये जात्यन्धा इति ।[१२०]

६७. षट् क्लेशाः रागः, प्रतिघः, मानः, अविद्या, कुदृष्टिः, विचिकित्सा चेति ॥

अनुनयसंयोजनैः षट् क्लेशान् विवृणोति यथा अभिधर्मसमुच्चये —

अनुनयसंयोजनं कतमत् । त्रैधातुको रागः । अनुनयसंप्रयोजनेन संप्रयुक्तः त्रैधातुकं नोद्वेजयति । अनुद्वेगेन अकुशलसमुदाचारः कुशलासमुदाचारश्च । तेन आयत्यां दुःखाभिनिवृत्तौ दुःखेन संयुज्यते ।

---

१२०. बौ.त.को.भा.१. पृ. ३७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रतिघसंयोजनं कतमत् । सत्त्वेषु दुःखे दुःखस्थानीयेषु च धर्मेषु वित्तस्य विहिंसा । प्रतिघसंयोजनेन संप्रयुक्तो प्रतिघनिमित्तेषु चित्तं नोपेक्षते । अनुपेक्षया च अकुशलसमुदाचारः कुशलासमुदाचारश्च । तेन आयत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते ॥

मानसंयोजनं कतमत् । सप्त मानाः । मानोऽतिमानो मानातिमानोऽस्मिमानोऽभिमान ऊनमानो मिथ्यामानश्च । मानः कतमः । हीनान् श्रेयानस्मि असदृशेन सदृशोऽस्मीति वा या चित्तस्योन्नतिः । अतिमानः कतमः । सदृशात् श्रेयानस्मि श्रेयसा सदृशोऽस्मीति वा या चित्तस्योन्नतिः । मानाति मानः कतमः । श्रेयसः श्रेयानस्मीति या चित्तस्योन्नतिः । अस्मिमानः कतमः । पञ्चसूपादानस्कन्धेष्वात्मात्मीयाभिनिवेशाद्या चित्तस्योन्नतिः । अभिमानः कतमः । अप्राप्त उत्तरे विशेषाधिगमे प्राप्तो मयेति या चित्तस्योन्नतिः । ऊनमानः कतमः । बह्वन्तरविशिष्टादल्पान्तरहीनोऽस्मीति या चित्तस्योन्नतिः । मिथ्यामानः कतमः । अगूणवतो गुणवानस्मीति या चित्तस्योन्नतिः । मानसंयोजनेन संप्रयुक्त आत्मात्मीयौ न संजानाति । असंज्ञानात् आत्मात्मीयग्रहः अकुशलसमुदाचारकुशलासमुदाचारश्च । तेनायत्यां दुःखाभिनिवृत्तौ दुःखेन संयुज्यते ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अविद्यासंयोजनं कतमत् । त्रैधातुकमज्ञानम् । अविद्यासंयोजनेन संप्रयुक्ता दुःखधर्मान् समुदयधर्मान् नाध्यवस्यति । अनध्यवसायेन अकुशलसमुदाचारः कुशलासमुदाचारश्च । तेनायत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते ।

दृष्टिसंयोजनं कतमत् । तिस्रो दृष्टयः । सत्कायदृष्टिरन्तग्राहदृष्टिर्मिथ्यादृष्टिश्च।दृष्टिसंयोजनेन संप्रयुक्तो मिथ्यानिःसरणं परिकल्पितविप्रतिसारं पर्येषने अभिनिविशते । मिथ्यानिःसरणाभिनिवेशेनाकुशलसमुदाचारः कुशलासमुदाचारश्च । तेनायत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते ।

परामर्शसंयोजनं कतमत् । दृष्टिपरामर्शः शीलव्रत परामर्शश्च । परामर्शसंयोजनेन संप्रयुक्तो मिथ्यानिःसरणोपायं कल्पयत्यभिनिविशते। मिथ्यानिःसरणोपायाभिनिवेशेनाकुशलसमुदाचारः कुशलासमुदाचारश्च । तेनायत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते ।

विचिकित्सासंयोजनं कतमत् । सत्येषु विमतिः । विचिकित्सासंयोजनेन संप्रयुक्तो बुद्धधर्मसंघेषु रत्नेषु विचिकित्सते रत्नत्रयं न समुदाचरति । रत्नत्रयासमुदाचारेणाकुशलसमुदाचारः कुशलासमुदाचारश्च। तेनायत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते ॥[१२१]

---

१२१. अ.ध.स. पृ. ४४ - ४६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

६८. पञ्च दृष्टयः । सत्कायदृष्टिः, अन्तग्राहदृष्टिः, मिथ्यादृष्टि, दृष्टिपरामर्शः, शीलपरामर्शः ॥

सत्कायदृष्टि कतमा । पञ्चोपादानस्कन्धानात्मतः आत्मीयतो वा समनुपश्यतो या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः । सर्वदृष्टिगतसन्निश्रयदानकर्मिका ।

अन्तग्राहदृष्टि कतमा । पञ्चोपादानस्कन्धान् शाश्वतो वा उच्छेदतो वा समनुपश्यतः या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः । मध्यमा प्रतिपन्निर्याणपरिपन्थकर्मिका ।

मिथ्यादृष्टिः कतमा । हेतुं वाऽपवदतः फलं वा क्रियां वा सद्वा वस्तु नाशयतः मिथ्या च विकल्पयतो या क्षान्ति रुचिर्मतिः प्रेक्षा दृष्टिः । कुशलमूलसमुच्छेदकर्मिका । अकुशलमूलदृढतासन्निश्रयदान कर्मिका । अकुशले प्रवृत्तिकर्मिका कुशलेचाप्रवृत्तिकर्मिका वा ।

दृष्टिपरामर्शः कतमः । दृष्टिं दृष्टयाश्रयांश्च पञ्चोपादानस्कन्धानग्रतः श्रेष्ठतो विशिष्टतः परमतश्च समनुपश्यतो या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टि । असदृष्टयमिनिवेशसन्निश्रयदानकर्मकः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शीलव्रतपरामर्शः कतमः । शीलं व्रतं शीलव्रताश्च पञ्चोपादानस्कन्धान् शुद्धितो मुक्तितो नैर्याणिकतश्च समनुपश्यतो या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः । श्रमवैफल्यसन्निश्रयदानकर्मकः ।[१२२]

६९. चतुर्विंशतिरुपक्लेशाः । तद्यथा-क्रोधः, उपनाहः, म्रक्षः, प्रदाशः, ईर्ष्या, मात्सर्यम्, शाठ्यम्, माया, मदः, विहिंसा, ह्रीः, अनपत्रपा, स्त्यानम्, अश्राद्धयम्, कौसीद्यम्, प्रमादः, मुषितस्मृतिः, औद्धत्यम्, विक्षेपः, असंप्रजन्यम्, कौकृत्यम्, मिद्धम्, वितर्कः, विचारश्चेति ॥

क्रोधः कतमः ।

प्रत्युपस्थिते अपकारनिमित्ते प्रतिघांशिकश्चेतस आघातः । शस्त्रादान दण्डादानादिसंरम्भसन्निश्रयदानकर्मकः ।

उपनाहः कतमः ।

तत ऊर्ध्वं प्रतिघांशिक एव वैराशयस्यानुत्सर्गः । अक्षान्तिसन्निश्रयदानकर्मकः ।

---

१२२. अ.ध.स. पृ. ७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

म्रक्ष : कतमः ।

सम्यक् चोदितस्य मोहांशिका अवद्यप्रच्छादना । कौकृत्यास्पर्श विहारसन्निश्रयदानकर्मकः ।

प्रदाशः कतमः ।

प्रतिघांशिकः कोधोपनाहपूर्वङ्गमश्चेतस आघातः । उच्चप्रगाढपारुष्यवचनसन्निश्रयदान कर्मकः अपुण्यप्रसव-कर्मकः अस्पर्शविहारकर्मकश्च ।

ईर्ष्या कतमा ।

लाभसत्काराध्यवसितस्य परसंपत्तिविशेषे द्वेषांशिकः अमर्ष कृतश्चेतसो व्यारोषः । दौर्मनस्यास्पर्श-विहारकर्मकः ।

मात्सर्यम् कतमत् ।

लाभसत्काराध्यवसितस्य परिष्कारेषु रागांशिश्चेतस आग्रहः । असंलेखसन्निश्रयदानकर्मकम् ।

शाठ्यम् कतमत् ।

लाभसत्काराध्यवसितस्य रागमोहांशिका भूतदोष-विमालना । सम्यगववादलाभपरिपन्थकरम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

माया कतमा ।

लाभसत्काराध्यवसितस्य रागमोहांशिका अभूत-गुणसंदर्शना । मिथ्याजीवसन्निश्रयदानकर्मिका ।

मद: कतम: ।

आरोग्यं वा आगम्य यौवनं वा दीर्घायुष्कलक्षणं वोपलभ्यान्यतमान्यतमां वा सास्रवां संपत्तिं रागांशिकन्न-न्दीसौमनस्यम् । सर्व्वक्लेशोपक्लेशसन्निश्रयदानकर्मक: ।

विहिंसा कतमा ।

प्रति[घांशि]का निर्घृणता निष्करुणता निर्दयता । विहेठनकर्मिका ।

[ह्री: : तथा] आह्रीक्यं कतमत् ।

रागद्वेषमोहांशिका स्वयमवद्येनालज्जना । सर्व्व-क्लेशोपक्लेशसाहाय्यकर्मकम् ।

अनपत्राप्यं कतमत् ।

रागद्वेषमोहांशिका परतोऽवद्येनालज्जना । सर्व्व-क्लेशोपक्लेशसाहाय्यकर्मकम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्त्यानम् कतमत् ।

मोहांशिका चित्ताकर्मण्यता । सर्व्वक्लेशोपक्लेशसाहाय्यकर्मकम् ।

अश्राद्धचं कतमत् ।

मोहांशिकः कुशलेषु धर्मेषु चेतसोऽनभिसंप्रत्ययोऽप्रसादोऽनभिलाषः । कौसीद्यसन्निश्रयद ।नकर्मकम् ।

कौसीद्यं कतमत् ।

निद्रापार्श्वशयनसुखल्लिकामागम्य मोहांशिकश्चेतसोऽनभ्युत्साहः। कुशलपक्षप्रयोगपरिपन्थकर्मकम् ।

प्रमादः कतमः ।

सकौसीद्यान् रागद्वेषमोहान्निश्रित्य कुशलानां धर्माणामभावना सास्रवेभ्यश्च धर्मेभ्यश्चेतसोऽनारक्षा । अकुशलवृद्धिकुशलपरिहाणिसन्निश्रयदानकर्मकः ।

मुषितस्मृतिता कतमा ।

क्लेशसंप्रयुक्ता स्मृतिः । विक्षेपसन्निश्रयदानकर्मिका ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

औद्धत्यम् कतमत् ।

शुभनिमित्तमनुसरतो रागांशिकश्चेतसोऽव्युपशमः। शमथपरिपन्थकर्मकम् ।

विक्षेपः कतमः ।

रागद्वेषमोहांशिकश्चेतसो विसारः । स पुनः स्वभावविक्षेपः बहिर्धाविक्षेपः अध्यात्मविक्षेपः निमित्तविक्षेपः दौष्ठुल्यविक्षेपः मनसिकारविक्षेपश्च । स्वभावविक्षेपः कतमः ।

पञ्च विज्ञान कायाः ॥ बहिर्धा विक्षेपः कतमः । कुशलप्रयुक्तस्य पंचसु कामगुणेषु चेतसो विसारः । अध्यात्मविक्षेपः कतमः । कुशलप्रयुक्तस्य लयौद्धत्यास्वादना । निमित्तविक्षेपः कतमः । परसंभावनां पुरस्कृत्य कुशलप्रयोगः ॥ दौष्ठुल्यविपेक्षः कतमः । अहंकारममकारास्मिमानपक्ष्यं दौष्ठुल्यमागम्य कुशलप्रयुक्तस्योत्पन्नोत्पन्नेषु वेदितेष्वहमिति वा ममेति वा अस्मीति वा उद्ग्रहो व्यवकिरणा निमित्तीकारः ॥ मनसिकारविक्षेपः कतमः । समापत्त्यन्तरं वा यानान्तरं वा समापद्यमानस्य संश्रयतो वा यो विसारः । वैराग्यपरि पन्थकर्मकः ॥

असंप्रजन्यं कतमत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क्लेशसंप्रयुक्ता प्रज्ञा यया असंविदिता कायवाक्-चित्तचर्या प्रवर्तते । आपत्तिसन्निश्रयदानकर्मकम् ।

कौकृत्यं कतमत् ।

यदभिप्रेतानभिप्रेतं कारणाकारणमागम्य मोहांशिकश्चेतसो विप्रतिसारः । कुशलमकुशलमव्याकृतं काले अकाले युक्तमयुक्तश्च । चित्तस्थितिपरिपन्थकर्मकः ।

मिद्धं कतमत् ।

मिद्धनिमित्तमागम्य मोहांशिकश्चेतसोऽभिसंक्षेपः कुशलः अकुशलः अव्याकृतः काले वा अकाले वा युक्तो वा अयुक्तो वा । कृत्याविपत्तिसन्निश्रयदान कर्मकम् ।

वितर्कः कतमः ।

चेतनां वा निश्रित्य प्रज्ञां वा पर्येषको मनोजल्पः । सा च चित्तस्यौदारिकता ।

विचारः कतमः ।

चेतनां वा निश्रित्य प्रज्ञां वा प्रत्यवेक्षको मनोजल्पः । सा च चित्तस्य सूक्ष्मता । स्पर्शास्पर्श-विहारसंनिश्रयदानकर्मकौ ।[१२३]

---

१२३. अ.ध.स. पृ. ८-१०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

७०. पञ्चाहाराः । ध्यानाहाराः, कवलीकाराहाराः, प्रत्याहाराः, स्पर्शाहाराः, संचेतनिकाहाराश्चेति ॥

७१. पञ्च भयानि। आजीविकाभयम्, शोकभयम्, मरणभयम्, दुर्गतिभयम्, पर्षदसाद्यभयं चेति ॥

७२. चत्वारि ध्यानानि । तद्यथा-सवितर्कं सविचारं विवेकजं प्रीतिसुखमिति प्रथमध्यानम् । अध्यात्मप्रमोदनात्प्रीतिसुखमिति द्वितीयम् । उपेक्षास्मृतिसंप्रजन्यं सुखमिति तृतीयम् । उपेक्षास्मृतिपरिशुद्धिरदुःखासुखा वेदनेति चतुर्थं ध्यानमिति ॥

चत्वारि ध्यानानि इति समापत्तिजानि रूपधातुस्वभावानि चत्वारि ध्यानानि ।

तत्र प्रथमध्यानं वितर्को विचारः प्रीतिः सुखं चित्तैकाग्रता चेति पञ्चाङ्गम् ।

द्वितीयमध्यात्मसंप्रसादः प्रीतिः सुखं चित्तैकाग्रता चेति चतुरङ्गम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तृतीयमुपेक्षा स्मृतिः संप्रजन्यं सुखं चित्तैकाग्रता चेति पञ्चाङ्गम् ।

चतुर्थं ध्यानमुपेक्षापरिशुद्धिः स्मृतिपरिशुद्धि अदुःखासुखा वेदना चित्तैकाग्रता चेति चतुरङ्गम् ।[१२४]

इह भिक्षवो भिक्षुः विविक्तं कामैः विविक्तं पापकैरकुशलैर्धर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य विहरति ।

स वितर्कविचाराणां व्युपशमादध्यात्मसंप्रसादाच्चेतस एकोतीभावादवितर्कविचारं समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसंपद्य विहरति ।

स प्रीतेर्विरागादुपेक्षको विहरति, स्मृतः संप्रजानन् सुखं च कायेन प्रतिसंवेदयति, यत्तदार्या आचक्षते "उपेक्षकः स्मृतिमान् सुखविहारी" ति तृतीयं ध्यानमुपसंपद्य विहरति ।

स सुखस्य च प्रहाणात् दुःखस्य च प्रहाणात् पूर्वमेव च सौमनस्यदौर्मनस्ययोरस्तङ्गमाददुःखासुखमुपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुसंपद्य विहरति ।[१२५]

---

१२४. अ.प्र.(टीका) पृ. ३६८

१२५. अ.वि.सू. पृ. १७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

७३. त्रयो विमोक्षाः - शून्यता, अनिमित्तः, अप्रणिहितश्चेति ॥

त्रीणि विमोक्षमुखानि । तद्यथा शून्यताअप्रणिहितमानिमित्तेमेषां त्रयाणां विमोक्षमुखानां कथं व्यवस्थानं भवति। आहाद्वयमिदं संस्कृतमसंस्कृतञ्च ।

तत्र संस्कृतं त्रैधातुकप्रतिसंयुक्ताः पञ्चस्कन्धाः, असंस्कृतं पुनः निर्व्वाणं । इदमुभयं यच्च संस्कृतं, यच्चा- संस्कृतमित्युच्यते ।

यत्पुनरिदमुच्यते । आत्मा वा, सत्त्वो वा, जीवो वा, जन्तुर्वा, इदमसत् । तत्र संस्कृते दोषदर्शनादादीनवदर्शनादप्रणिधानं भवति । अप्रणिधानाच्चाप्रणिहितं विमोक्षमुखं व्यवस्थाप्यते । निर्वाणे पुनः तत्र प्रनिधानवतः प्रणिधानं भवति । शान्तदर्शनं । प्रणीतदर्शनं । निःसरणदर्शनं च । निःसरणदर्शनाच्च पुनरानिमित्तं विमोक्षमुखं व्यवस्थाप्यते । तत्रासत्यसम्विद्यमाने नैव प्रणिधानं भवति । तद्यथैवासत्तथैवासदिति । जानतः पश्यतः शून्यताविमोक्षमुखं व्यवस्थाप्यते । एवं त्रयाणां विमोक्षमुखानां व्यवस्थानं भवति ॥[१२६]

---

१२६. श्रा.भू. पृ. २६७ - २६८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

७४. बोधिसत्त्वानां दश वशिताः । आयुर्वशिता, चित्तवशिता, परिष्कारवशिता, धर्मवशिता, ऋद्धिवशिता, जन्मवशिता, अधिमुक्तिवशिता, प्रणिधानवशिता, कर्मवशिता, ज्ञानवशिता चेति ॥

दूरंगमाभूमौ बोधिसत्त्वेन दशवशिता प्राप्यते इत्याह बौधिसत्त्वोभूमौ -

तस्य च तस्मिन् दूरगंमाया भूमौ गम्भीरे विहारेऽभिरतस्य तस्मिन् धर्ममुखस्रोतसि तथागत-संचोदना - समादापना - अभिनिर्हारमुख - ज्ञानभिज्ञा - कर्मोपसंहारोऽप्रमेयः । तथा संचोदितस्य चाप्रमाणकाय-विभक्तिज्ञानाभिनिर्हारो दशवशिता-प्राप्तिश्च यथासूत्रमेव विस्तरेण वेदितव्याः । वशिताप्राप्तः स तावदाकांक्षति तावत्तिष्ठति । येन वा ध्यानविमोक्षादिचित्तविहारेणाकांक्षति तेन विहरति । संकल्पमात्रेणैवास्य सर्वभोजनादि-परिष्कारसम्पद् भवति । सर्वशिल्पकर्मस्थानेषु चास्य यथाकामप्रचारता भवति । सर्वोपपत्तिसंवर्तनीयेषु च कर्मसु सर्वोपपत्त्यायतनेषु चास्य कामकामोपपत्तिता भवति । यथेप्सितञ्च सर्वर्द्धिकार्यं करोति । सर्वप्रणि-धानानि चास्य यथाकामं समृध्यन्ति । यद् यदेव वस्तु यथाधिमुच्यते तत्तथैव भवति नान्यथा । यञ्च ज्ञेयं ज्ञातुकामो भवति तदपि जानीते यथावत् । नामकायपदकायव्यञ्जनकायानाञ्च निकामलाभी भवति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मसम्यक्व्यवस्थानकुशलः । एवं वशिताप्राप्तस्य बोधिसत्त्वस्यातः परेण वशिताप्राप्तकृतोऽनुशंसो विस्तरेण यथासूत्रमेव वेदितव्यः ।[१२७]

७५. बोधिसत्त्वानां दश बलानि । तद्यथा-अधिमुक्तिबलम्, प्रतिसंख्यानबलम्, भावबलम्, क्षान्तिबलम्, ज्ञानबलम्, प्रहाणबलम्, समाधिबलम्, प्रतिभानबलम्, पुण्यबलम्, प्रतिपत्तिबलं चेति ॥

७६. तथागतस्य दश बलानि । तद्यथा-स्थानास्थानज्ञानबलम्, कर्मविपाकज्ञानबलम्, नानाधातुज्ञानबलम्, नानाधिमुक्तिज्ञानबलम्, सत्त्वेन्द्रियपरापरज्ञानबलम्, सर्वत्रगामिनीप्रतिपत्तिज्ञानबलम्, ध्यानविमोक्षसमाधिसमापत्तिसंक्लेशव्यवदानव्युत्थानज्ञानबलम्, पूर्वनिवासानुस्मृतिज्ञानबलम्, च्युत्युतपत्तिज्ञानबलम्, आस्रवक्षयज्ञानबलं चेति ॥

इह भिक्षवस्तथागतः स्थानं च स्थानतो यथाभूतं प्रजानाति, अस्थानं चास्थानतः ।

---

१२७. बो.भू. पृ. २४०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अतीतानागतप्रत्युत्पन्नानां कर्मधर्मसमादानानां विपाकं यथाभूतं प्रजानाति ।

परसत्त्वानां परपुद्गलानामनेकाधिमुक्तिकानां नानाधिमुक्तिनां यथाभूतं प्रजानाति ।

अनेकधातुकं लोकं नानाधातुकं लोकं यथाभूतं प्रजानाति ।

परसत्त्वानामिन्द्रियपरापरज्ञतां यथाभूतं प्रजानाति ।

सर्वत्रगामिनीं प्रतिपदं च यथाभूतं प्रजानाति ।

परसत्त्वानामिन्द्रियबलबोध्यङ्गध्यानविमोक्षसमाधिसमापत्तीनां संक्लेशव्यवदानव्यवस्थानं यथाभूतं प्रजानाति ।

पुनरपरं साकारं सोद्देशं सनिमित्तमनेकविधं पूर्वनिवासं समनुस्मरति, एकामपि जातिं समनुस्मरति, द्वे तिस्रश्चतस्रो वा यावदनेकान्यपि जातिकोटिनियुतशतसहस्राणि अनुस्मरतीति विस्तरः ।

पुनरपरं स दिव्येन चक्षुषा विशुद्धेनातिक्रान्तमानुष्यकेण सत्त्वान् पश्यति च्यवमानानुपपद्यमानान्, कायवाङ्मनसां सुचरितदुश्चरितैः सुगतिदुर्गतिषूपपद्यमानानिति विस्तरः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आस्रवक्षयादनास्रवां चेतोविमुक्तिं प्रज्ञया यथाभूतं प्रजानाति । इमानि भिक्षवो दश तथागतबलानि ।[१२८]

७७. चत्वारि वैशारद्यानि । तद्यथा-अभिसंबोधिवैशारद्यम् आश्रवक्षयज्ञानवैशारद्यम् नैर्वाणिकमार्गावतरणवैशारद्यम् अन्तरायिकधर्मानन्यथात्वनिश्चित्तव्याकरणवै-शारद्यं चेति ॥

अभिसंबोधिवैशारद्यं कतमत् । ध्यानं निश्रित्य स्वार्थमेवारभ्य सर्वाकारज्ञेयाभिसंबोधिप्रतिज्ञाप्रतिष्ठापनसमृद्धौ यः समाधिः प्रज्ञा तत्संप्रयुक्ताश्च चित्तचैतसिका धर्माः ॥

आस्रवक्षयवैशारद्यं कतमत् । ध्यानं निश्रित्य स्वार्थमेवारभ्य सर्वाकारास्रवक्षयप्रतिज्ञा प्रतिष्ठापनसमृद्धौ यः समाधिः प्रज्ञाशेषं पूर्ववत् ॥

नैर्याणिकप्रतिपद्वैशारद्यं कतमत् । ध्यानं निश्रित्य परार्थमारभ्य सर्वाकार नैर्याणिकमार्गधर्म प्रतिज्ञाप्रतिष्ठापनसमृद्धौ यः समाधिः प्रज्ञा शेषं पूर्ववत् ।

अन्तरायिकधर्मवैशारद्यं कतमत् । ध्यानं निश्रित्य परार्थमारभ्य सर्वाकारान्तरायिकधर्मप्रतिज्ञाप्रतिष्ठापनसमृद्धौ यः समाधिः प्रज्ञा शेषं पूर्ववत् ॥[१२९]

---

१२८. अ.वि.सू. पृ. ४८ - ४९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

७८. पञ्च मात्सर्याणि । धर्ममात्सर्यम्, लाभमात्सर्यम्, आवासमात्सर्यम्, कुशलमात्सर्यम्, वर्णमात्सर्यं चेति ॥

मात्सर्यसंयोजनं कतमत् । लाभसत्काराध्यवसितस्य परिष्कारेषु चेतस आग्रहः । मात्सर्यसंयोजनेन संप्रयुक्त उपचयमनुनयति तद्वर्जनतां च न सत्करोति । उपचयानुनयेनाकुशलसमुदाचारः कुशलासमुदाचारश्च। तेनायत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते ॥[१३०]

७९. अष्टादशावेणिका बुद्धधर्माः । तद्यथा-नास्ति तथागतस्य स्खलितम् । नास्तिरवितम् । नास्ति मुषितस्मृतिता । नास्त्यसमाहितचित्तम् । नास्ति नानात्वसंज्ञा । नास्त्यप्रतिसंख्यायोपेक्षा । नास्ति छन्दपरिहाणिः । नास्ति वीर्यपरिहाणिः । नास्ति स्मृतिपरिहाणिः। नास्ति समाधिपरिहाणिः । नास्ति प्रज्ञापरिहाणिः । नास्ति विमुक्तिपरिहाणिः । नास्ति विमुक्तिज्ञानदर्शनपरिहाणिः । सर्वकायकर्मज्ञानपूर्वंगमज्ञानानुपरिवृत्तिः । सर्ववाक्कर्म-

---

१२९. अ.ध.स. पृ. ९८
१३०. " " पृ. ४६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
ज्ञानपूर्वंगमज्ञानानुपरिवृत्तिः । सर्वमनकर्म-ज्ञानपूर्वंगमज्ञानानुपरिवृत्तिः। अतीतेऽध्वन्यस-ङ्गमप्रतिहतज्ञानम् । प्रत्युत्पन्नेऽध्वन्यसङ्गम-प्रतिहतज्ञानदर्शनं चेति ॥

नास्ति तथागतस्य स्खलितमिति । कायवाग्दौ-ष्ठुल्यजनकानां क्लेशोपक्लेशानां सवासनानां प्रहाणात् । अन्येषां तु श्रावकादीनां कायादिस्खलितं भवेदसमन्वा-हरतः । तथा च मर्कटपूर्वेण उत्पत्त्यगमनं श्रूयते । आर्यपिलिन्दवत्सस्य गङ्गावृषलीवादसंचोदनमिति । रवितं सहसा वाक्क्रिया ।

मुषितस्मृतितेति। मुषितस्मृतेर्भावो मुषितस्मृतिता । सा नास्ति ।

नास्त्यसमाहितचित्तमिति । नित्यसमाहितत्वात् । चरन् समाहितो नागस्तिष्ठन्नागः समाहितः । स्वपन् समाहितो नागो निषण्णोऽपि समाहितः । इति गाथा-भिधानात् ।

नास्ति नानात्वसंज्ञेति । सुखदुःखादुःखासुखवेद-नीयेषु रागद्वेषमोहतो यथाक्रमं प्रवृत्तिः सा नानात्वसंज्ञा। सा च नास्ति तथागतस्येत्यर्थः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कारणान्तरापेक्षं यत्प्रवर्तते तत्सङ्गतमुच्यते । यत्पुनः कारणान्तरानपेक्षं प्रवर्तते तदसङ्गतमुच्यते । अत आह-असङ्गतमिति । यत् क्वचित् प्रवर्तते क्वचिन्न प्रवर्तते तत् प्रतिहतमित्युच्यते । यत् पुनर्ज्ञेयविबन्धाभावात् सर्वत्र प्रवर्तते तदप्रतिहतमित्युच्यते । तद्दर्शयन्नाह-अप्रतिहतमिति । ज्ञानदर्शनमिति । ज्ञानमेव प्रत्यक्षवृत्तित्वाद्दर्शनम् ।

सर्व कायादिकर्म ज्ञानपूर्वङ्गमं सूपस्थितस्मृतित्वाद्भगवतः ॥[१३१]

८०. चत्वारो माराः । तद्यथा- स्कन्धमारः, क्लेशमारः, देवपुत्रमारः, मृत्युमारश्चेतिः ॥

तत्र चत्वारो माराः संबहुलानि मारकर्माणि । वेदितव्यानि योगिना । योगप्रयुक्तेन । ते च परिज्ञाय परिवर्जयितव्याः । तत्र चत्वारो माराः । तद्यथा- स्कन्धमारः, क्लेशमारः, मरणमारः, । देवपुत्रमारश्च । पंचोपादानस्कन्धाः स्कन्धमारः । त्रैधातुकावचराः क्लेशाः । तेषां तेषां सत्त्वानां । तस्मात्तस्मात्सत्त्वनिकायाः य(याद्य)न्मरणं कालक्रिया मरणमारः । योप्यकुशलपक्षप्रयुक्तस्य स्कन्धक्लेशमृत्युसमतिक्रमाय काम-

---

१३१. अ.वि.सू. पृ. २८० - २८२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धातूपपन्नो देवपुत्रः । निश्चयप्राप्तः अन्तरायमुपसंहरति । व्याक्षेपकरणे । अयमुच्यते देवपुत्रमारः । तत्र यत्र च म्रियते । यश्चासौ मृत्युर्येन च मृत्युं नमयति, क्रामयत्यन्तरायिकेन वस्तुना । इत्येतदधिकृत्य चत्वारो मारा व्यवस्थापिता: ।[१३२]

८१. चत्वारि श्रद्धाङ्गानि । तद्यथा- आर्यसत्यम्, त्रिरत्नम्, कर्म, कर्मफलं चेति ॥

आर्यसत्यम्[१३३]

त्रिरत्न[१३४]

यदुक्तं सूत्रे त्रिविधं कर्म पुण्यकर्म अपुण्यकर्म आनिंज्यकर्म च । पुण्यकर्म कतमत् । कामप्रतिसंयुक्तं कुशलं कर्म। अपुण्यकर्म कतमत् । अकुशलं कर्म । आनिंज्यकर्म कतमत् । रूपारूप्यप्रतिसंयुक्तं कुशलं कर्म ॥ यदुक्तं सूत्रे अविद्यालम्वना: संस्कारा: पुण्यानिंज्या अपुण्यानिंज्याश्चेति । कतमे पुण्यानिंज्या अविद्यालम्वना: संस्कारा उत्पद्यन्ते ।[१३५]

---

१३२. श्रा.भू. पृ. ३४३ - ३४५
१३३. द्रष्टव्य चत्वार्यार्यसत्यानि पृ. ३७–४२
१३४. द्रष्टव्य त्रीणिरत्नानि पृ. १
१३५. अ.ध.स. पृ. ५४-५५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यदुक्तं भगवता सत्त्वानां कर्मविपाकोऽचिन्त्य इति । तत्र कथं कर्मविपाकश्चिन्त्य: कथं कर्मविपाकोऽचिन्त्य: । कुशलस्य कर्मणो देवमनुष्यगतिष्विष्टविपाकला भश्चिन्त्य: । अकुशलस्य कर्मणो हीनासु तिसृषु दुर्गतिषु अनिष्टविपाकलाभश्चिन्त्य: । अयं चिन्त्य: ॥ येन कर्मणा सत्त्वानामात्मभावविपाकवैचित्र्यमभिनिर्वत्तते सोऽचिन्त्य । तदेव कुशलाकुशलं कर्मस्थानवस्तुहेतुविपाकप्रकारादिप्रभेदैरचिन्त्यम् । विविधवाह्यवस्तुवैचित्र्याभिनिर्वर्त्तकं कर्माचिन्त्यम् । मणिमन्त्रौषधिमुष्टियोगप्रतिसंयुक्तं कर्माचिन्त्यम् । योगिनां प्रभावकर्माचिन्त्यम् । बोधिसत्त्वानां वशिताभि: क्रियमाणं कर्मा चिन्त्यम् । तद्यथा आयुर्वशितया चित्तवशितया परिष्कारवशितया कर्मवशितया उपपत्तिवशितया अधिमुक्तिवशितया प्रणिधानवशियता ऋद्धिवशितया ज्ञानवशितया धर्मवशितया । एवं च बोधिसत्त्वानां महासत्त्वानामेवमादिभिर्वशिताभिर्यत्कमं क्रियते तदचिन्त्यम् । सर्वेषां बुद्धानां बुद्धकृत्यानुष्ठानं कर्माचिन्त्यम् ॥[१३६]

८२. नवानुपूर्वसमाधिसमापत्तय:। तद्यथा-चत्वारि ध्यानानि, चतस्र आरूप्यसमापत्तय:, निरोधसमापत्तिश्चेति ॥

---

१३६. अ.ध.स. पृ.६१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अनन्तमाकाशमिति, अनन्तं विज्ञानमिति, नास्ति किंचनेति, संज्ञा गण्डः, शल्यम् । आसंज्ञिकं मोहः । एतच्छान्तमेतत्प्रणीतं यदुत नैवसंज्ञानासंज्ञायतनमित्येवं मनसिकारैर्यथाक्रममाकाशविज्ञानाकिंचन्यनैवसंज्ञानासंज्ञा-यतनाख्यानि । विभावितरूपसंज्ञात्वेन रूपाभावादरूपा एव आरूप्याः कायचित्तसमतापादनाच्चतस्रः समापत्तयः ।[१३७]

८३. द्वात्रिंशल्लक्षाणि । तद्यथा- चक्राङ्कितपाणि-पादतलता । सुप्रतिष्ठितपाणिपादतलता । जालाबलबद्धा (वनद्धा?) ङ्गुलिपाणिपादतलता । मृदुतरुणहस्तपादतलता । सप्तोत्सदता । दीर्घाङ्गुलिता । आयतपार्ष्णिता । ऋजुगात्रता । उत्सङ्गपादता । उर्ध्वाग्ररोमता । ऐणेयजङ्घता । प्रलम्बबाहुता । कोषगतबस्तिगुह्यता । सुवर्ण-वर्णता । शुक्लच्छविता । प्रदक्षिणावर्तैक-रोमता । उर्णालंकृतमुखता । सिंहपूर्वान्तका-यता । सुसंवृत्तस्कन्धता । चितान्तरांसता । रसरसाग्रता । न्यग्रोधपरिमण्डलता । उष्णी-षशिरस्कता । प्रभूतजिह्वता । सिंहहनुता । शुक्लहनुता । समदन्तता । हंसविक्रान्त-गामिता । अविरलदन्तता । समचत्वारिं-

---

१३७. अ.प्र. पृ. ३६८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शद्दन्तता । अभिनीलनेत्रता । गोपक्षनेत्रता चेति ॥

तानि पुनर्द्वात्रिंशल्लक्षणानि-यदुत गुरूणामनुगमन-प्रत्युद्गमनादिना चक्राङ्कहस्तपादता । दृढसंवरसमादान-त्वात् कूर्मवत् सुप्रतिष्ठितपादता । चतुःसंग्रहवस्तुसेवनात् राजहंसवत् जालावनद्धाङ्गुलिपाणिपादता । प्रणीतखाद्यभो-ज्यादिदानात् मृदुतरुणहस्तपादता । प्रणीततरलेह्यादि-दानेन समुच्छ्रितहस्तपादस्कन्धग्रीवाप्रदेशत्वात् सप्तो-च्छ्रयता । वध्यमोक्षणत्वात् दीर्घाङ्गुलिता । जीवितानु-ग्रहकरणात् आयतपार्ष्णिता। प्राणातिपातविरत्या बृहदृजु-गात्रता । कुशलधर्मसमादानात् उच्छङ्खपादता । गृहीतकुशलसमादानवर्धनात् ऊर्ध्वगरोमता । सत्कृत्य विद्याशिल्पादिदानात् एणेयजङ्घता । संविद्यमानार्थयाचन-कजनाप्रत्याख्यानात् पटूरुबाहुता । सर्वजनब्रह्मचर्य-समादापनगुह्यमन्त्रारक्षणात् कोशगतबस्तिगुह्यता । प्रणीतोपास्तरणदानात् सुवर्णवर्णता । प्रासादवरदानात् श्लक्ष्णच्छविता । संगणिकादिपरिवर्जनात् प्रदक्षिणा-वर्तैकैकरोमता । सर्वगुरुजनयथास्थाननिवेशनात् ऊर्णाङ्कित-मुखता । सर्वथा मुखरवचनानवसादनात् सिंहपूर्वार्धकाय-ता । प्रियवादित्वसुभाषितानुलोमत्वात् सुसंवृतस्कन्धता । भैषज्यादिदानात् चितान्तरांसता । ग्लानजनोपस्थानात् रसरसाग्रता । वनारामादिकरणसमादापनात् न्यग्रोध-परिमण्डलता । विहाराद्यभ्यधिकप्रदानादुष्णीषशिरस्कता । श्लक्ष्णादिवचनात् प्रभूतजिह्वता । सर्वलोकधातुसत्त्व-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सद्धर्मविज्ञपनात् ब्रह्मस्वरता । संभिन्नप्रलापविरत्या सिंहहनुता । सर्वजनसंमानादिना शुक्लदन्तता । विशुद्धाजीवत्वात् समदन्तता । सत्यवचनसमुदाचारात् अविरलदन्तता । पिशुनवचनानभ्यासात् समचत्वारिंशद्दन्तता । सर्वसत्त्वैकपुत्रदर्शनात् अभिनीलनेत्रता । प्रतिघादिविवेकदर्शनात् गोपक्ष्मनेत्रता चेति।[१३८]

लक्षणमधिकृत्याह-तत्र कतमानि द्वात्रिंशल्लक्षणानीति । ननु चोद्देशकाले लक्षणान्युद्दिष्टानि । किमर्थं पुनः प्रश्नं कृत्वा उद्देशः क्रियते ? उच्यते । पूर्वं सामान्यरूपेणोक्तम्, इदानीं विशेषरूपेणेति । बहुधर्मप्रपञ्चेन वा व्याहितत्वान्नष्ट इवोद्देशो लक्ष्यते । तदर्थं पुनराह । तदेव विक्षिप्तचित्तानां श्रोतणां समवधानार्थम् दत्तावधानानां सुखोद्ग्रहणार्थं च । उद्घटितज्ञानां संक्षिप्तरुचीनामनुग्रहार्थं पुनरुद्देशः कृतः । विपञ्चितज्ञानां विस्तररुचीनामनुग्रहार्थं तन्निर्देशो विस्तरेणेति अस्मद्गुरवः ।

चक्रवर्तिनोऽपि लक्षणानि भवन्ति, न तु यथा भगवतो देशस्थोत्तप्तपरिपूर्णतराणीत्याह-तथागतस्येति । संख्यान्तरव्यवच्छेदेनावधारणार्थमाह-द्वात्रिंशल्लक्षणानीति । द्वात्रिंशदेव, नाधिकानि नाल्पतराणि । महापुरुषभावज्ञापनहेतुत्वादाह-महापुरुषलक्षणानीति । महाकृपादिगुणान्वितत्वान्महांश्च स पुरुषश्चेति महापुरुषः । तस्य

१३८. अ.प्र. पृ. ५३७ - ५३८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लक्षणानि महापुरुषलक्षणानि । एभिश्च लक्ष्यते भाविनी फलविभूतिरिति लक्षणानि । तान्युद्दिशन्नाह-यदुत सुप्रतिष्ठितपादतेति । निर्देशो व्याख्यायते :-

सुप्रतिष्ठितपादता तथागतस्येति । सुप्रतिष्ठितपादभावः सुप्रतिष्ठितपादता । एवमुत्तरत्रापि भावप्रत्ययो वेदितव्यः । मृदुत्वात्समतलत्वादनुत्कटत्वाच्च भगवान् पद्भ्यां समं पृथ्वीं स्पृशति । मार्दवाद्भगवतः पादतलयोर्निम्नोन्नतपादपरिणामोऽनुमहीं भवतीत्यन्ये । कस्य कर्मणो विपाकेन लक्षणमेतदिति लक्षणशोभाश्रवणसंजाताभिलाषाणां श्रोतणां तदधिगमोपायं पर्येषमाणानां कर्मलक्षणविपाकहेतुमाह–पूर्वे दृढसमादानतयेति । पूर्वे पूर्वस्मिन् काले बोधिसत्त्वावस्थायाम् । दृढसमादानतयेति । सातत्यसत्कृत्यकुशलप्रयोगसम्पन्नतयेत्यर्थः । शिक्षासु सुदृढतयेति वा ।

अधस्तात्पादतलयोश्चक्राङ्कपादतलतेति । पादतलयोरधस्तात् सनाभि सनेमि सारं चक्रं भगवतः सर्वाकाररमणीयं सर्वाकारपरिपूर्णं तद्यथा दन्तमयं चक्रं सुशिल्पिना घटितम् । यदा च भगवान् पद्भ्यां महीमाक्रमते तदा तत्प्रतिबिम्बकं चक्राकारमुत्पद्यते पृथिव्यामिति । अन्ये त्वाहुः । वितस्तिमात्रेण भगवान् पृथिवीमस्पृशन् गच्छति । पादतलप्रतिबिम्बकमधिष्ठानात्तु उत्पद्यते इति । विपाकहेतुमाह– विचित्रदानोपचयेन निर्वृत्तमिति । नानाविधानुपानशय्यासनदानोपचयेन प्रकर्ष-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तेन निर्वृत्तं जनितमित्यर्थः । न च पादतलयोरेव चक्रे किं तर्हि करतलयोरपि चक्रे संविद्येते । तयोः प्रकटत्वादनिर्देशः ।

आयतपार्ष्ण्युत्सङ्गपादतेति । पादयोः पार्ष्णिर्भगवतः आयता भवति । बहलमांसोपलिप्ता । पादोपरि मांसोपलिप्तिश्च । कर्मनिर्देशः स्पष्टः ।

दीर्घाङ्गुलिकतेति । ह्रस्वाभिरङ्गुलीभिर्विकृतकरचरणो न राजते इत्याह–दीर्घाङ्गुलिकता । बुद्धानामनुपूर्वपरिणामिन्यः सूक्ष्माङ्गुलिलता दीर्घा भवन्ति । कर्मनिर्देशः स्पष्टः ।

जालहस्तपादतेति । हस्तयोः प्रत्यङ्गुलिपाश्वौं रुचिरसुतनुचर्मावच्छादितो हस्तसंकोचकाले प्रत्यङ्गुलिषु लीयते । वितते तु हस्ते विततं भवतीति । तद्यथा हंसराजस्य अहेर्वा फणाभोगोपसंहारवदिति । एवं पादतलयोः प्रत्यङ्गुलिपाश्र्व इति पूर्ववद्योजनीयमिति । कर्मनिर्देशः । पूर्वे परपरिवाराभेदनतयेति । सुभावितत्वात् पैशुन्यविरतेः पूर्वस्मिन् जन्मनि परसत्त्वपरिवाराभेदकरणतया वेदितव्यम् ।

मृदुतरुणहस्तपादतेति । मृदुः स्पर्शतः, तरुणो वर्णतः । तद्यथा तदहर्जातस्य बालकस्य करचरणतलम् । तद्वत्कोमलं पाणिपादतलं तथागतानाम् । युवमध्यवृद्धत्वा-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वस्थासु दौर्बल्यकाठिन्यरहितमित्यर्थः । अन्यत्र तु सूत्रे तूलपिचुः कर्पासपिचुर्वेति दृष्टान्तद्वयोपन्यासः कृतः । तत्र किञ्चित् सुकुमारतरं लोकप्रतीतं निदर्शनीयमिति कृत्वा । तूलपिचुः शाल्मलीतूलकम् । कर्मनिर्देशः स्पष्ट एव ।

सप्तोत्सदशरीरतेति । उत्सदोऽभ्युन्नतः पीन इति यावत् । सप्तस्थानपीनतेत्यर्थः । सप्त स्थानानि- हस्तयोः पादयोश्चोपरि कन्धरापृष्ठे स्कन्धयोश्चोपरि । तदेवं भगवतो हस्तयोरुपरि मणिबन्धादारभ्य यावदङ्गु- लीमूलं तूलपूर्णोपमोऽभ्युन्नतः । चरणयोश्चोपरि गुल्फादा- रभ्य यावदङ्गुलीमूलं कन्धरापृष्ठः तथा अंसयोर्मू- लोऽभ्युन्नत इति । कर्मनिर्देशः स्पष्ट इति ।

एणेयजङ्घतेति । एणा मृगजातिः । तद्वद्वृत्त- जङ्घत्वात् भगवानेणेयजङ्घ इत्युच्यते । अनुपूर्व- परिणामेनानुपूर्वपीनत्वेन वेत्यर्थः । कर्मनिर्देशः । पूर्वे बुद्धधर्मपरिग्रहणतयेति । बुद्धधर्मबलवैशारद्यादयस्तेषां परिग्रहो यस्तदुत्पादकहेतुपरिग्रहः । एतदुक्तं भवति । तथा बोधिसत्त्वास्थायां पुण्यज्ञानसम्भारपरिग्रहो येनैणे- यजङ्घयोर्निष्पत्तिः ।

कोशगतवस्तिगुह्यतेति । वस्तौ गुह्यं वस्तिगुह्यं । वस्तिर्येन तत्पुरुषेन्द्रियं वेष्टितम् । गुह्यं पुरुषेन्द्रियम् । कोशो यत्र तद्वस्तिगुह्यं तिष्ठति । कोशगतवस्तिगुह्यं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यस्य स भवति कोशगतवस्तिगुह्यः । कोशगतवस्तिगुह्यभावः कोशगतवस्तिगुह्यता। तद्यथा अश्वाजानेयस्य तद्वद्भगवतो बुद्धस्येति ।

सिंहपूर्वार्धकायतेति । पूर्वस्यार्धः पूर्वार्धः । कायस्योर्ध्वभागः । सिंहस्य द्वौ भागौ । पूर्वो भागोऽपरश्च । तत्र पूर्वो भागः उर्ध्वकायस्य । अपरो भागः कायस्याधः । उपरि विशालकायो हि सिंहः । स इहोपमानीकृतः । तद्वद्भगवतोऽप्युपरि विशालः काय इति । कर्मनिर्देशः स्पष्टः ।

चितान्तरांसतेति । चितमन्तरमंसयोर्यस्य स भवति चितान्तरांसः । तद्भावश्चितान्तरांसता । चितं संचितमित्यर्थः । न यथान्येषां निम्नोन्नतम् । कर्मनिर्देशः स्पष्टः ।

समवृत्तस्कन्धतेति । समस्तुल्यः । वृत्तो वर्तुलः । निम्नोन्नताभावात् । सर्वतो वर्तुलस्कन्ध इत्यर्थः । वृत्तस्कन्धताया उत्सदस्य च को विशेषः? उत्सदो लिप्तलिप्तता । वृत्तस्कन्धता वृत्तत्वमित्ययं विशेषः । कर्मनिर्देशः । परेत्यादिना । अभयदानं प्राणातिपाताद्विरतिः । आश्वासदानं भीतानाम् ।

अनवनतप्रलम्बबाहुतेति । स्थितस्य हि भगवतो बाहुयुगलं जानुमण्डलं स्पृशति । कर्मनिर्देशो योज्यः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विशुद्धगात्रतेति। मलप्रस्वेदाभावात् विशुद्धगात्रता। कर्मनिर्देशः पूर्ववत् ।

कम्बुग्रीवतेति। कम्बुः शङ्खः । कम्बुग्रीवावद् ग्रीवाऽस्येति कम्बुग्रीवः। तद्भावः कम्बुग्रीवता । त्रिवली-तरङ्गरुचिरराजितग्रीव इत्यर्थः । कर्मनिर्देशः स्पष्टः ।

सिंहहनुता । वृत्तत्वाद् दृढमूलत्वादनुपूर्वपरिणा-माच्च सिंहहनुर्भगवानित्युच्यते। कर्मनिर्देशः स्पष्टः ।

समचत्वारिंशद्दन्ततेति । आकृतिसाम्याद्गुणसा-म्याद्वर्णसाम्याच्च समाः । नोन्नता न निम्ना नाधो-मुखा न वक्रीभूता इति । चत्वारिंशन्नाधिका न न्यूना इति । कर्मनिर्देशः स्पष्टः ।

समाविरलदन्ततेति । विकटाद्यभावात् समाः । नैरन्तर्येणावस्थितत्वादविरलाः । कर्मनिर्देशः स्पष्टः ।

सुशुक्लदन्ततेति। मलैः सुविमुक्तत्वात् सुशुक्लाः। तद्यथा वार्षिकी कुड्मलमालेति अन्यत्रोक्तम् । वर्षासु भवा वार्षिकी, मल्लिकेत्यर्थः । कर्मनिर्देशः स्पष्टः ।

प्रभूतजिह्वतेति । भगवतो जिह्वा हस्तमात्रा दैर्घ्येण तदनुरूपेण च विस्तारेण युक्ता । रक्तोत्पल-पत्रवत्तन्वी । तथा हि निष्कासिता सर्वमुखमण्डल-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

माच्छादयति । यद्येवं दीर्घा कथमस्या मुखेऽवस्थानं घटते? उच्यते । सौकुमार्यात्तनुत्वान्मृदुत्वात् प्रभूताऽपि मुखं न बाधते । कर्मनिर्देशः स्पष्टः ।

रसरसाग्रतेति । ....

ब्रह्मस्वरकलविङ्करुतस्वरतेति । ब्रह्मस्वरता कलविङ्कस्वरता च । ब्रह्मशब्दो महागुणस्याधिवचनम् । अतो महत्वात् ब्रह्मस्वरः । "त्रिसाहस्रमहासाहस्रं स्वरेण पूरयती" ति वचनात् । कलविङ्करुतस्वरो मधुरस्वरः । कर्मनिर्देशः स्पष्टः ।

अभिनीलनेत्रतेति । स्पष्टमेतल्लक्षणम् ।

गोपक्ष्मनेत्रता । स्पष्टः ।

श्लक्ष्णच्छविता । अकठिनता । सरोजपत्रवत् । रक्तोत्पलपत्रवद्वा । नरोत्तमतनोस्तनुत्वं वर्णयन्ति गुरवः । कर्मनिर्देशः स्पष्टः ।

सुवर्णच्छवितेति । सुवर्णशब्देन नैर्मल्यं वर्णं चोपलक्षयति । कनकगौरो भगवानित्यर्थः ।

एकैकरोमकूपतेति । एकस्मिन् रोमकूपे एक एव रोमाङ्कुरो भवति न द्वितीयादिका इति । कर्मनिर्देशः स्पष्टः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ऊर्ध्वाग्रप्रदक्षिणावर्तरोमतेति । वामावर्तान्यपि तथा स्युरित्याह–दक्षिणावर्तेत्यादि । इन्द्रनीलच्छायानुकारीणि नलिनीसूत्रंतन्तुरिव सुकुमारतराणि ऊर्ध्वाग्ररोमाणि । कुण्डलावर्तानीति क्वचित् पाठः । कुण्डलं परिणामसन्निवेशविशेषः ।

इन्द्रनीलकेशता । .... कर्मनिर्देशः स्पष्टः ।

सुशुक्लभ्रूमुखान्तरोर्णाललाटतेति । भ्रुवोर्मुखे यदन्तराले भगवतः स्फटिकगुडिकेव प्रदक्षिणावर्ता मृगाङ्ककरावदातोर्णा जाता । कर्मनिर्देशः । पूर्वं वर्णार्हाणां स्तुत्यर्हाणां वर्णभाषणतया स्तुतिकरणतया निर्वृत्तम् ।

उष्णीषशिरस्कतेति ।अत्र केचिद् भगवतः शिरोमध्येऽस्थिवृत्तमुन्नतमुष्णीषमाहुः । अन्ये शिरोमध्ये केशोद्भेदमुच्चैस्तर व्यवस्थितमुपरिचितपर्यन्तमुष्णीषमिच्छन्ति ।

न्यग्रोधपरिमण्डल इति विस्तरः । न्यगधस्ताद्रोहतीति न्यग्रोधः, वटः । तद्वत् परिमण्डलो भगवान् । व्यामपरिमण्डल आरोहानुरूपः परिणाहः । स्थितस्य हि भगवतो गजभुजसदृशो जानुलम्बोरुबाहुः ।

महानारायणशरीरसमन्तप्रासादिकतेति । महानारायणं नाम कायिकं बलम् । तद्विद्यते यस्य असौ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

महानारायणशरीरः । तथा हि भगवतो महानारायणबलं काये वर्णयन्ति । सन्धौ सन्धौ नारायणबलमित्यन्ये । समन्तप्रासादिक इति । असेचनकरूपत्वात् सर्वतः प्रासादिकः, प्रसादनीय इत्यर्थः ।

अप्रमाणैरित्यादि । "एकैकं पुण्यशतजातमि"ति वचनात् । कुशलमूलैर्लक्षणाभिनिर्वर्तकैः ।[१३९]

८४. अशीत्यनुव्यञ्जनानि । तद्यथा–ताम्रनखता । स्निग्धनखता । तुङ्गनखता । छत्राङ्गुलिता । चित्राङ्गुलिता । अनुपूर्वाङ्गुलिता । गूढशिरता । निर्ग्रन्थिशिरता । गुढगुल्फता । अविषमपादता । सिंहविक्रान्तगामिता । नागविक्रान्तगामिता । हंसविक्रान्तगामिता । वृषभविक्रान्तगामिता । प्रदक्षिणगामिता । चारुगामिता । अवक्रगामिता । वृत्तगात्रता । मृष्टगात्रता । अनुपूर्वगात्रता । शुचिगात्रता । मृदुगात्रता । विशुद्धगात्रता । परिपूर्णव्यञ्जनता । पृथुचारुमण्डलगात्रता। समक्रमता । विशुद्धनेत्रता। सुकुमारगात्रता । अदीनगात्रता । उत्साहगात्रता । गम्भीरकुक्षिता । प्रसन्नगात्र-

१३९. अ.वि.सू. पृ. २८३-३०७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ता । सुविभक्ताङ्गप्रत्याङ्गता । वितिमिरशुद्धालोकता । वृत्तकुक्षिता । मृष्टकुक्षिता । अभुग्नकुक्षिता । क्षामकुक्षिता । प्रदक्षिणावर्तनाभिता । समन्तप्रासादिकता । शुचिसमुदारता । व्यपगततिलकगात्रता । तूलसदृशसुकुमारपाणिता । स्निग्धपाणिलेखता । गम्भीरपाणिलेखता । आयतपाणिलेखता । नात्यायतवचनता । बिम्बप्रतिबिम्बोष्ठता । मृदुजिह्वता । तनुजिह्वता । रक्तजिह्वता । मेघगर्जितघोषता । मधुरचारुमञ्जुस्वरता । वृत्तदंष्ट्रता । तीक्ष्णदंष्ट्रता । शुक्लदंष्ट्रता । समदंष्ट्रता । अनुपूर्बदंष्ट्रता । तुङ्घनासता । शुचिनासता । विशालनयनता । चित्रपक्ष्मता सितासितकमलदलनयनता । आयतभ्रूकता । शुक्लभ्रूकता । सुस्निग्धभ्रूकता । पीनायतभुजलता । समकर्णता । अनुपहतकर्णेन्द्रियता । अविम्लानललाटता । पृथुललाता । सुपरिपूर्णोत्तमाङ्गता । भ्रमरसदृशकेशता । चित्रकेशता । गुडाकेशता । असंमुणितकेशता । अपरुषकेशता । सुरभिकेशता ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्रीवत्समुक्तिकनन्द्यावर्तलक्षितपाणिपादतलता चेति ॥

अशीत्यनूव्यञ्जनानि पूनर्यदूत :

सर्वसंस्कारविरक्तत्वेन ताम्रनखता । सर्वसत्त्वहिताध्याशयत्वेन स्निग्धनखता । श्रेष्ठवंशप्रसवत्वेन तुङ्गनखता । वृत्तानवद्यत्वेन वृत्ताङ्गुलिता । समुपचितकुशलमूलत्वेन चिताङ्गुलिता । सम्यगनुपूर्वप्रवृत्तत्वेन अनुपूर्वाङ्गुलिता । सुनिगूढकायादिकर्मान्ताजीवत्वेन गूढशिरता। क्लेशग्रन्थिभेदकत्वेन निर्ग्रन्थिशिरता। सुनिगूढधर्ममतित्वेन गूढगुल्फता । सर्वदुर्गस्थानजनोत्तार-कत्वेन अविषमपादता । नराभिभवनकुशलतया सिंहविक्रान्तगामिता । नागाभिभवनकुशलतया नागविक्रान्तगामिता । वैहायसंगमकुशलतया हंसविक्रान्तगामिता । पुरुषवृषभकुशलतया वृषभविक्रान्तगामिता । प्रदक्षिणमार्गानुयाततया प्रदक्षिणगामिता । प्रासादिककुशलतया चारुगामिता । नित्यमवक्रचित्ततया अवक्रगामिता । विशुद्धगुणाख्यापकतया वृत्तगात्रता । प्रमृष्टपापधर्मतया मृष्टगात्रता । विनेयानुरूपधर्मदेशकतया अनुपूर्वगात्रता । कायादिशुचिसमुदाचारत्वात् शुचिगात्रता । करुणाचित्तत्वात् मृदुगात्रता । विशुद्धचित्तत्वात् विशुद्धगात्रता । परिपूर्णधर्मविनयत्वात् परिपूर्णव्यन्जनता । पृथुचारुगुणाख्यानात् पृथुचारुमण्डलगात्रता । सर्वत्र समचित्तत्वात् समक्रमता ।सुविशुद्धधर्मदेशनात् विशुद्धनेत्रता । सुगमधर्मदेशनात् सुकुमारगात्रता । नित्यमदीनचित्तत्वात् अदीन-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
गात्रता।समुद्गमनकुशलत्वात् उत्सदगात्रता। क्षीणपुनर्भवत्वेन सुसंहतगात्रता। सुविभक्तप्रतीत्यसमुत्पाददेशकत्वेन सुविभक्ताङ्गप्रत्यङ्गता। सुविशुद्धपदार्थदर्शनात् वितिमिरशुद्धालोकता। वृत्तसंपन्नशिष्यसंवर्तनीयत्वेन वृत्तकुक्षिता। प्रमृष्टसंसारदोषत्वेन मृष्टकुक्षिता। भग्नमानशृङ्गत्वेन अभग्नकुक्षिता। धर्मक्षयविनिवर्त-कत्वेन अक्षामकुक्षिता। प्रतिविद्धधर्मगम्भीरत्वेन गम्भीरनाभिता। प्रदक्षिणग्राहिशिष्यसंवर्तनीयत्वेन प्रदक्षिणावर्तनाभिता। समन्तप्रासादिकपरिवारसंवर्तनीयत्वेन समन्तप्रासादिकता। शुचिचित्तत्वेन शुचिसमुदाचारता। व्यपगताकालधर्मविनयत्वेन व्यपगततिलकालकगात्रता। कायादिलाघवप्रापकधर्मदेशकत्वेन तूलसदृशसुकुमारपाणिता। प्रतिलब्धस्निग्धमहाश्रमणत्वेन स्निग्धपाणिलेखता। गम्भीरधर्मस्थानत्वेन गम्भीरपाणिलेखता। सम्यगायतिपरिशुद्धधर्मदेशकत्वेन आयतपाणिलेखता। प्रचुरतरशिक्षादेशकत्वेन नात्यायतवचनता। प्रतिबिम्बवत् विदितसर्वलोकत्वेन बिम्बप्रतिबिम्बोपमौष्ठता। मृदुवचनविनयत्वेन मृदुजिह्वता। प्रभूतगुणोपपन्नत्वेन तनुजिह्वता। रक्तबालजनदुरवगाहधर्मविनयत्वेन रक्तजिह्वता। सर्वत्रासापगतत्वेन मेघगर्जितदोषता। मधुराद्यालापत्वेन मधुरचारुमञ्जुस्वरता। निवृत्तभवसंयोजनत्वेन वृत्तदंष्ट्रता। दुर्दान्तजनदमकत्वेन तीक्ष्णदंष्ट्रता। परमशुक्लधर्मविनयत्वेन शुक्लदंष्ट्रता। समभूमिप्रतिष्ठितत्वेन समदंष्ट्रता। सम्यगनुपूर्वाभिसमयप्रकाशत्वेन अनुपूर्वदंष्ट्रता। प्रज्ञाप्रकर्षस्थापकत्वेन तुङ्गनासता। शुचिजनसंपन्नत्वेन

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शुचिनासता । परमोदारधर्मत्वेन विशालनयनता । समुपचितसत्त्वराशित्वेन चितपक्ष्मता । सर्वयुवतिजनाभिनन्दित्वेन सितासितकमलदलनयनता । नित्यमायतिदर्शित्वेन आयतभ्रूकता । श्लक्ष्णधर्मविनयकुशलत्वेन श्लक्ष्णभ्रूकता । कुशलस्निग्धसंतानत्वेन सुस्निग्धभ्रूकता । समन्तदोषदर्शित्वेन समरोमभ्रूकता । परमपीडानिवर्तकत्वेन पीनायतभुजता । विजितरागादिसमरत्वेन समकर्णता । सर्वसत्त्वानुपहतसंतानत्वेन अनुपहतकर्णेन्द्रियता । सर्वदृष्टिकृतान्यथाविपरिणामत्वेन अपरिम्लानललाटता । सर्ववादिप्रमथनत्वेन पृथुललाटता । परिपूर्णोत्तमप्रणिधानत्वेन सुपूर्णोत्तमाङ्गता । विषयरतिव्यावर्तकत्वेन भ्रमरसदृशकेशता । प्रहीणदर्शनभावनाप्रहातव्यानुशयत्वेन चितकेशता । श्लक्ष्णबुद्धिपरिज्ञातशासनत्वेन श्लक्ष्णकेशता । रागाद्यसंलुठितचेतनत्वेन असंलुठितकेशता । नित्यमपरुषवचनत्वेन अपरुषकेशता । बोध्यङ्गकुसुमावकीर्णत्वेन सुरभिकेशता । सर्वथाशोभासंवर्तनीयत्वेन श्रीवत्सस्वस्तिकनन्द्यावर्तललितपाणिपादतलता चेति ।[१४०]

८५. चक्रवर्तिनां सप्त रत्नानि । तद्यथा- चक्ररत्नम्, अश्वरत्नम्, हस्तिरत्नम्, मणिरत्नम्, स्त्रीरत्नम्, खड्गरत्नम्, परिणायकरत्नं चेति ॥

---

१४०. अ.प्र. पृ. ५३९-५४०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कथंरूपेण राजा चक्रवर्ती चक्ररत्नेन समन्वागतो भवति? इह राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य तदेव पोषधेयं च पञ्चदश्यां शिरःस्नातस्यो - पवासोषितस्योपरिप्रासादतलगतस्य स्त्र्यागारपरिवृतस्य पुर्वस्यां दिशि दिव्यं चक्ररत्नं प्रादुर्भवति । सहस्रारं सनेमिकं सनाभिकं सुवर्णवर्णकर्मालंकृतं सप्ततालमुच्चैः समन्ताद् दृष्ट्वान्तःपुरं राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य तद्दिव्यं चक्ररत्नमेव भवति । श्रुतं खलु मया यस्य किल राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य तदेव पोषधेयं पञ्चदश्यां शिरःस्नातस्योपवासोषितस्योपरिप्रासादतलगतस्य स्त्र्यागारपरिवृतस्य पूर्वस्यां दिशि दिव्यं चक्ररत्नं प्रादुर्भवति, स भवति राजा चक्रवर्ती । नूनमहं राजा चक्रवर्ती यन्न्वहं दिव्यं चक्ररत्नं मीमांसयेयम् । अथ राजा क्षत्रियो मूर्धाभिषिक्त एकांसमुत्तरासङ्गं कृत्वा दक्षिणजानुमण्डलं पृथिव्यां प्रतिष्ठाप्य दक्षिणेन पाणिना तद्दिव्यं चक्ररत्नं प्रार्थयेदेवं चावेदयेत्प्रवर्तयस्व भट्ट दिव्यं चक्ररत्नं धर्मेण माधर्मेण। अथ तद्दिव्यं चक्ररत्नं राज्ञा क्षत्रियेण मूर्धाभिषिक्तेन प्रवर्तितं सम्यगेव ऋद्धौ विहायसा पूर्वेण व्रजति । अन्वेति राजा चक्रवर्ती सार्धं चतुरङ्गेण बलकायेन । यत्र च पृथिवीप्रदेशे तद्दिव्यं चक्ररत्नं संतिष्ठते, तत्र राजा क्षत्रियो मूर्धाभिषिक्तो वासं कल्पयति सार्धं चतुरङ्गेण बलकायेन । अथ ये ते भवन्ति पूर्वस्यां दिशि राजानो मण्डलिनः, ते रूप्यपात्रीं वा सुवर्णचूर्णपरिपूर्णामादाय स्वर्णपात्रीं वा रूप्यचूर्णपरिपूर्णामादाय राजानं चक्रवर्तिनं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रत्युत्तिष्ठन्ति–एहि देव स्वागतं देवाय, इदं देवस्य राज्यमृद्धं च स्फीतं च क्षेमं च सुभिक्षं च रमणीयं चाकीर्णबहुजनमनुष्यं च । अध्यावसतु देव स्वकं विजितमनुप्राप्तम् । एवमुक्ते राजा क्षत्रियो मूर्धाभिषिक्तस्त्राता तान् राज्ञो मण्डलिन एतदवोचत्–कारयन्तु भवन्तः स्वकानि राज्यानि धर्मेण । हन्त भवन्तो मा प्राणिनं घातयिष्यथ, मादत्तादास्यथ, मा कामेषु मिथ्या चरिष्यथ, मा मृषा वक्ष्यथ, यावन्मा मे विजिते अधर्ममुत्पद्यते, माधर्मचारिणो रोचेथ । एवं खलु राजा क्षत्रियो मूर्धाभिषिक्तः पूर्वां दिशं विजयति । पूर्वां दिशं विजितः पूर्वं समुद्रमवगाह्य पूर्वं समुद्रमवतरति । पूर्वं समुद्रमवतीर्य सम्यगेव ऋद्धचा विहायसा दक्षिणेन व्रजति । अन्वेति राजा चक्रवर्ती सार्धं चतुरङ्गेण बलकायेन । पूर्ववदेवं दक्षिणां दिशं विजयति । यथा दक्षिणामेवं पश्चिमामुत्तरां दिशं विजयति । उत्तरां दिशं विजित्य उत्तरसमुद्रमवगाहते । अवगाह्योत्तरात्समुद्रात्प्रत्युत्तरति । प्रत्युत्तीर्य सम्यगेव ऋद्धचा विहायसा राजधानीमागत्योपरि अन्तःपुरद्वारेऽक्षतमेवास्थात् । एवंरूपेण राजा क्षत्रियो मूर्धाभिषिक्तश्चक्ररत्नेन समन्वागतो भवति ॥

कथंरूपेण राजा चक्रवर्ती हस्तिरत्नेन समन्वागतो भवति? इह राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य पूर्ववद्धस्तिरत्नमुत्पद्यते । सर्वश्वेतं सप्ताङ्गसुप्रतिष्ठितं स्वर्णचुडकं स्वर्णध्वजं स्वर्णालंकारं हेमजालप्रतिच्छन्नं ऋद्धिमन्तं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विहायसा गामिनं विकुर्वणाधर्मिणं यदुत बोधिर्नाम नागराजा । यदा च राजा क्षत्रियो मूर्धाभिषिक्तस्त-द्धस्तिरत्नं मीमांसितुकामो भवति, अथ सूर्यस्याभ्युद्ग-मनवेलायां तद्धस्तिरत्नमभिरुह्य इमामेव महापृथिवीं समुद्रपरिखां समुद्रपर्यन्तां समन्ततोऽन्वाहिण्डच राजधानी-मागत्य प्रशासनरतिः प्रत्यनुभवति । एवंरूपेण राजा चक्रवर्ती हस्तिरत्नेन समन्वागतो भवति ॥

कथंरूपेण राजा चक्रवर्ती अश्वरत्नेन समन्वागतो भवति? अथ राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य पूर्ववदश्व-रत्नमुत्पद्यते । सर्वनीलं कृष्णशिरसं मुञ्जकेशमा-दृतवदनं स्वर्णध्वजं स्वर्णालंकारं हेमजालप्रतिच्छन्नं ऋद्धिमन्तं विहायसा गामिनं विकुर्वणाधर्मिणं यदुत बालाहको नामाश्वराजम् । यदा च राजा क्षत्रियो मूर्धाभिषिक्तोऽश्वरत्नं मीमांसितुकामो भवति, अथ सूर्यस्याभ्युद्गमनवेलायामश्वरत्नमभिरुह्य इमामेव महा-पृथ्वीं समुद्रपरिखां समुद्रपर्यन्तां समन्ततोऽन्वाहिण्डच राजधानीमागत्य प्रशासनरतिः प्रत्यनुभवति । एवं-रूपेण राजा चक्रवर्ती अश्वरत्नेन समन्वागतो भवति ॥

कथंरूपेण राजा चक्रवर्ती मणिरत्नेन समन्वा-गतो भवति ? इह राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य पूर्ववन्मणिरत्नमुत्पद्यते शुद्धनीलवैडूर्यमष्टांशं सुपरिकर्म-कृतम् । तस्य खलु पुनर्मणिरत्नस्याभया सर्वमन्तःपुर-मवभास्येन स्फुटं भवति । यदा च राजा क्षत्रियो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मूर्धाभिषिक्तस्तं मणिरत्न मीमांसितुकामो· भवति, अथ रात्त्यामर्धरात्रसमयेऽन्धकारतमिस्रायां तं मणिरत्नं ध्वजाग्रे उच्छ्रापयित्वा उद्यानभूमिं निर्याति सुभूमिदर्शनाय । तस्य खलु पुनर्मणिरत्नस्याभया सर्वावन्तं चतुरङ्गबलकाय-मवभासेन स्फुटीभवति सामन्तेन योजनम् । ये खलु पुनस्तस्य मणिरत्नस्य सामन्तके मनुष्याः प्रतिवसन्ति, ते तेनावभासेनास्फुट समाना अन्योन्यं संजानन्ति, अन्योन्यं पश्यन्ति, अन्योन्यमाहुः–उत्तिष्ठ भद्रमुखाः कर्मान्तानि कारयत, आपणानि प्रसारयत, दिवा मन्यामहे सूर्यमभ्युद्गतम् । एवंरूपेण राजा क्षत्रियो मूर्धाभिषिक्तो मणिरत्नेन समन्वागतो भवति ॥

कथंरूपेण राजा चक्रवर्ती स्त्रीरत्नेन समन्वागतो भवति ? इह राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य पूर्ववत्स्त्री-रत्नमुत्पद्यते । सदृशी क्षत्रिया नातिदीर्घा नातिह्रस्वा नातिस्थूला नातिकृशा नातिगौरी नातिकृष्णा अभिरूपा प्रासादिका दर्शनीया । तस्याः सर्वरोमकूपेभ्यश्चन्द-नगन्धं प्रवाति, मुखाच्चोत्पलगन्धं प्रवाति । काचिलिन्दि-कसुखसंस्पर्शा । शीतलकाले चास्या उष्णस्पर्शानि गात्राणि भवन्ति, उष्णकाले च शीतसंस्पर्शानि । सा राजानं चक्रवर्तिनं मुक्त्वा नान्यस्मिन् मनसापि रागं करोति किं पुनः कायेन । एवंरूपेण राजा चक्रवर्ती स्त्रीरत्नेन समन्वागतो भवति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कथंरूपेण राजा चक्रवर्ती गृहपतिरत्नेन समन्वागतो भवति ? इह राज्ञः क्षत्रियस्य मूर्धाभिषि-क्तस्य पूर्ववद् गृहपतिरत्नमुत्पद्यते पण्डितो व्यक्तो मेधावी दिव्यचक्षुः । स तेन दिव्यचक्षुषा सामन्तेन योजनं सस्वामिकानि निधानानि पश्यति, अस्वामिकानि निधानानि पश्यति । स यानि तानि भवन्ति अस्वामिकानि, तै राज्ञश्चक्रवर्तिनो धनेन करणीयं करोति । एवंरूपेण राजा चक्रवर्ती गृहपतिरत्नेन समन्वागतो भवति ॥

कथंरूपेण राजा चक्रवर्ती परिणायकरत्नेन समन्वागतो भवति? इह राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य पूर्ववत्परिणायकरत्नमुत्पद्यते पण्डितो व्यक्तो मेधावी । राज्ञचक्रवर्तिनश्चिन्तितमात्रेण उद्योजयितव्यं सेनामुद्योजयति स्म । एवंरूपेण राजा चक्रवर्ती परिणायकरत्नेन समन्वागतो भवति । एभिः सप्तरत्नैः समन्वागतो भविष्यति । भवति चास्य पुत्रसहस्त्रं शूराणां वीराणां वराङ्गरूपिणां परसैन्यप्रमर्दकानाम् । स इमां महापृथिवीं ससागरपर्यन्तामखिलामकण्टकामदण्डेनाशस्त्रेणाभिनिर्जित्याध्यासयति । सचेदगारादनगारिकां प्रव्रजिष्यति, वान्तछन्दरागो नेता अनन्यदेवः शास्ता देवानां च मनुष्याणां चेति ॥[१४१]

---

१४१. ल.वि. पृ. ११-१४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

८६. तत्र त्रयोऽध्वानः । तद्यथा– अतीतोऽध्वा, अनागतोऽध्वा प्रत्युत्पन्नोऽध्वा चेति ॥

अध्वः इति कालः समयः ।[१४२]

८७. चत्वारः कल्पाः । तद्यथा–अन्तरकल्पाः, महाकल्पाः, शून्यकल्पाः, सारकल्पाश्चेति ॥

त्रयो मूहुर्त्ताहोरात्रमासा द्वादशमासकः ।
संवत्सरः सोनरात्रः कल्पो बहूविधः स्मृतः ॥
संवर्त्तकल्पो नरकासंभवात् भाजनक्षयः ।
विवर्तकल्पः प्राग्वायोर्यावन्नरकसम्भवः ॥
अन्तःकल्पोऽमिताद्यावद्शवर्षायुषस्ततः ।
उत्कर्षा अपकर्षाश्च कल्पा अष्टादशापरे ॥
उत्कर्ष एकस्तेऽशीति सहस्राद् यावदायुषः ।
इतिलोको विवृत्तोऽयं कल्पांस्तिष्ठति विंशतिम्॥
विवर्तते ऽथ संवृत्त आस्ते संवर्तते समम् ।
तेऽह्यशोतिर्महाकल्पस्तदसंख्यत्रयोद्भवम् ॥
बुद्धत्वमपकर्षे तू शताद् यावत्तदुद्भवः ।
द्वयोःप्रत्येकबुद्धानां खड्गः कल्पशतान्वयः॥[१४३]

---

१४२. ध.स.को. पृ. ३
१४३. " " पृ. ५३७ = ५४८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

८८. चत्वारि युगानि । तद्यथा–कृतयुगम्, त्रेतायुगम्, द्वापरयुगम्, कलियुगं चेति ॥

द्वात्रिंशच्च सहस्राणि कलौ लक्षचटुष्टयम् ।
वेदाग्निनेत्रैर्गुण्यं) हि कृतं त्रेता च द्वापरम् ॥
कलियुगमानम् ४,३२,००० वर्षाणि, द्वापरयुगमानम् ४,३२,०००×२ = ८,६४००० वर्षाणि, त्रेतायुगमानम् ४,३२,०००×३ =१२,९६,००० वर्षाणि, सत्ययुगमानम् ४,३२,०००× ४ = १७,२८,००० वर्षाणि ।[१४४]

बैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम् । कार्त्तिके शुक्लपक्षे तु त्रेताऽय नवमेऽहनि । अथ भाद्रपदे कृष्णत्रयोदस्यान्तु द्वापरम् । माघे च पौर्णमास्यां वै घोरं कलियुगं स्मृतम् । युगारम्भास्तु तिथयो युगाद्यास्तेन विश्रूताः ॥[१४५]

८९. लोकद्वयम् । तद्यथा–सत्त्वलोकः, भाजन-लोकश्चेति ॥

तत्र कतमा बोधिसत्त्वस्य लोकज्ञता । इह बोधिसत्त्वः सत्त्वलोकमारभ्यैवं यथाभूतं प्रजानाति कृच्छ्रं वतायं लोक आपन्नो यदुत जायतेऽपि जीर्यतेऽपि. म्रियतेऽपि च्यवतेप्युपपद्यतेप्यथ च पुनरमी सत्त्वा जरा-मरणस्योत्तरि निःसरणं यथाभूतं(न) प्रजानन्तीति ।[१४६]

---

१४४. मा.प. पृ. ८
१४५. वा.भा.३ पृ. १८१०
१४६. बो.भू. पृ. १७२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुनर्बोधिसत्त्वो भाजनलोकस्य संवर्तविवर्तं यथाभूतं प्रजानाति यथा भाजनलोकः संवर्तते विवर्तते च । पुनर्बोधिसत्त्वो लोकञ्च समुदयञ्च लोकनिरोधञ्च लोकसमुदयगामिनीञ्च प्रतिपर्द लोकनिरोधगामिनीञ्च प्रतिपदं लोकस्यास्वादमादीनवञ्च निःसरणञ्च यथाभूतं प्रजानाति । पुनर्बोधिसत्त्वः चक्षुर्यावन्मनः अरूपिणश्च स्कन्धांश्चातुर्महाभौतिकञ्च पुरुषस्य समुच्छ्रयमेतावन्मनुष्यत्वमित्युच्यते । तत्र या संज्ञा आत्मा वा सत्त्वो वेति संज्ञामात्रमेवैतत् । तत्र या प्रतिज्ञा अहं चक्षुषा रूपाणि पश्यामि यावन्मनसा धर्मान विजानामीति प्रतिज्ञामात्रमेव तत् । तत्र यो व्यवहार इत्यपि स आयुष्मानेवंनामा एवंजातीय एवंगोत्र एवमाहार एवं सुखदुःखप्रतिसंवेदी एवं दीर्यायुरेवं चिरस्थितिक एवमायुष्पर्यन्त इति व्यवहारमात्रमेवैतदिति सर्वं यथाभूतं प्रजानाति । इति हि स बोधिसत्त्वः सत्त्वलोकप्रवृत्तिञ्च भाजनलोकप्रवृत्तिञ्च अष्टाकारलोकोपपरीक्षार्थञ्च (लोकपरमार्थं च) यथाभूतं प्रजानाति । तस्माल्लोकज्ञ इत्युच्यते ।[१४७]

९०. चत्वारोयोनयः । तद्यथा–अण्डजः, संस्वेदजः, जरायुजः, उपपादुकश्चेति ॥

चतस्रो योनयो भूता नानाकर्मस्वभावतः ।

---

१४७. बो.भू. पृ. १७३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अण्डजावजरायुजाश्चसंस्वेदजोपपादुका: ॥
हंसक्रोञ्चमयूराश्चशुकसारादिअण्डजा: ।
हस्त्यश्वगोमहिषाश्चखरमानुषजरायुजा: ॥
कृमिकीटपतङ्गाश्चमशकादिस्तुस्वेदजा: ।
देवनरकसत्त्वानामन्तराभवमेवच ॥
एते औपपादुका: सत्त्वा: प्राथमकल्पिकादय:।[१४८]

भगवानस्यैतदवोचत्—इह सुभूते बोधिसत्त्वयानसंप्रस्थितेनैवं चित्तमुत्पादयितव्यम् यावन्त: सुभूते सत्त्वा: सत्त्वधातौ सत्त्वसंग्रहेण संगृहीता अण्डजा वा जरायुजा वा संस्वेदजा वा औपपादुका वा रूपिणो वा अरूपिणो वा संज्ञिनो वा असंज्ञिनो वा नैव संज्ञिनो नासंज्ञिनो वा, यावान् कश्चित्सत्त्वधातु: प्रज्ञप्यमान: प्रज्ञप्यते, ते च मया सर्वेऽनुपधिशेषे निर्वाणधातौ परिनिर्वापयितव्या: । एवमपरिमाणानपि सत्त्वान् परिनिर्वाप्य न कश्चित्सत्त्व: परिनिर्वापितो भवति । तत्कस्य हेतो: ? स चेत्सुभूते बोधिसत्त्वस्य सत्त्वसंज्ञा प्रवर्तेत, न स बोधिसत्त्व इति वक्तव्य: । तत्कस्य हेतो:? न स सुभूते बोधिसत्त्वो वक्तव्यो यस्य आत्मसंज्ञा प्रवर्तेत सत्त्वसंज्ञा वा जीवसंज्ञा वा पुद्गलसंज्ञा वा प्रवर्तेत ।[१४९]

---

१४८. सं.त.द्वि.प.
१४९. वि.प्र. पृ. २९ - ३०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९१. पञ्च कषायाः । तद्यथा–क्लेशकषायः दृष्टिकषायः, सत्त्वकषायः, आयुःकषायः, कल्पकषायश्चेति ॥

पुनः सत्त्वलोकस्यैव कषायोत्सदकालताञ्च यथाभूतं प्रजानाति। निष्कषायानुत्सदकषायकालताञ्च यदुत पञ्चकषायानारभ्य आयुष्कषायं (सत्त्वकषायं) क्लेशकषायं कल्पकषायम् । तद्यथा एतर्ह्यल्पं जीवितं मनुष्याणां यश्चिरं जीवति स वर्षशतम् । तद्यथैतर्हि सत्त्वा यद्भूयसा(अ) मातृज्ञा अपितृज्ञा अश्रामण्या अब्राह्मण्या न कुलज्येष्ठापचायका नार्थकरा न कृत्यकरा न इह लोके न परलोके अवद्ये भयदर्शिनो न दानानि ददति न पुण्यानि कुर्वन्ति नोपवासमुपवसन्ति न शीलं समादाय वर्तन्ते । तद्यथैतर्हि यद्भू यसाऽधर्मरागाश्च विषमलोभाश्च शस्त्रादानदण्डादानकलहभण्डनविग्रहविवादशाव्यवञ्च – निकृतिमृषावादमिथ्याधर्मसंगृहीता अनेकविधाः पापका अकुशला धर्माः प्रज्ञायन्ते । तद्यथैतर्हि सद्धर्मप्रलोपाय सद्धर्मान्तर्धानाय सद्धर्मप्रतिरूपकाणि प्रभूतानि प्रादुर्भूतानि मिथ्याधर्मार्थसन्तीरणापूर्विकाणि । तद्यथा एतर्हि दुर्भिक्षान्तरकल्पसमासन्नानि प्रचुराणि दुभिक्षाण्युपलभ्यन्ते । रोगान्तरकल्पसमासन्नाश्च रोगाश्च प्रचुरा उपलभ्यन्ते । शस्त्रान्तरकल्पसमासन्नाश्च प्रचुराः शस्त्रकाः प्राणातिपाता

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उपलभ्यन्ते । न तु तथा पुर्वमासीत् । एवं हि बोधिसत्त्वः सत्त्वालोकमारभ्य लोकज्ञो भवति ।[१५०]

९२. त्रयः सत्त्वाध्याः । तद्यथा–पूर्वान्तकोटिपरिज्ञायाः, अपरान्तकोटिपरिज्ञायाः, चतुर्मारकोटिपरिज्ञायाश्चेति ॥

९३. दश ज्ञानानि । तद्यथा–दुःखज्ञानम्, समुदयज्ञानम्, निरोधज्ञानम्, मार्गज्ञानम्, धर्मज्ञानम्, अन्वयज्ञानम्, संवृतिज्ञानम्, परचित्तज्ञानम्, क्षयज्ञानम्, अनुत्पादज्ञानं चेति॥

नामला क्षान्तयो ज्ञानम्, तत्प्रहेयस्य विचिकित्सानुशयस्याप्रहीणत्वात् । दृष्टयस्तु ताः, सन्तीरणात्मकत्वात्। यथा च क्षान्तयो दृष्टिर्न ज्ञानम्, एवं पुनः क्षयानुत्पादधीर्न दृक । क्षयज्ञानमनुत्पादज्ञानं च न दृष्टिः, असन्तीरणापरिमार्गणाशयत्वात् । तदन्योभयथार्या धीः, क्षान्तिक्षयानुत्पादज्ञानेभ्योऽन्यानाश्रवा प्रजा, दृष्टिः ज्ञानं च । अन्या ज्ञानम्, लौकिकी प्रज्ञा सर्वैव ज्ञानम्, दृशश्च षट् ॥

पञ्च दृष्टयः, लौकिकी च सम्यग्दृष्टिः । एषा षड्विधा लौकिकी प्रज्ञादृष्टिः, अन्या न दृष्टि : । ज्ञानं त्वेषा चान्या च ॥ कियता सर्वज्ञानसंग्रहः ? दशभि-

१५०. बो.भू. पृ. १७२ - १७३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ज्ञनै : समासेन तु साश्रवानाश्रवं ज्ञानम्, तयो पुन आद्यं संवृतिज्ञापकम् । यत् साश्रवं तत् संवृत्तिज्ञानम्, प्रायेण घटपटस्त्रीपुरुषादिसंवृतिग्रहात् । अज्ञानसंवृतत्वात् इत्यपरे। अनाश्रवं द्विधा धर्मज्ञानमन्वयमेव च ॥ अनाश्रवंज्ञानं द्विधा भिद्यतेधर्मज्ञानम्, अन्वयज्ञानं च ॥ एवमते द्वे ज्ञाने त्रिणि भवन्ति–संवृतिज्ञानम्, धर्मज्ञानम्, अन्वयज्ञानं च । तत्र सांवृतं सर्वविषयम्, संवृतिज्ञानस्य सर्वधर्माः संस्कृतासंस्कृता आलम्बनम्, सम्भवतः । कामदुःखादिगोचरम् । धर्माख्यम्, धर्मज्ञानस्य कामवचरं दुःखं तत्समुदयनिरोधप्रतिपक्षाश्चालम्बनम् । अन्वयज्ञानं तुर्ध्वदुःखादिगोचरम् ॥ अन्वयज्ञानस्य रूपारूपावचरं दुःखं तत्समुदयनिरोधप्रतिपक्षाश्चालम्बनम् । ते एव सत्यभेदेन चत्वारि, ते एव धर्मज्ञानान्वयज्ञाने चतूर्विधे अदृष्टिस्वभावे क्षयज्ञानमनूत्पादज्ञानं चोच्येते । ते पुनः प्रथमोदिते ॥ दुःखहेत्वन्वयज्ञाने ।

प्रथमोत्पन्ने तु क्षयज्ञानानुत्पादज्ञाने दुःखसमुदयान्वयज्ञाने, दूःखसमूदयाकारैर्भावाग्रिकस्कन्धालम्बनत्वात् ॥ किं वज्रोपमोऽपि ताभ्यामेकालम्बनो भवति ? यदि दुःखसमूदायालम्बनो भवति । अथ निरोंधमार्गालम्बनः, नैकालम्बनः । चतुर्भ्यः परचित्तवित् । बेत्तीति = वित्ज्ञानम् । परचित्तज्ञानं चतूर्भ्यो ज्ञानेभ्यो द्रष्टव्यम् । धर्मान्वयज्ञानमार्गाः संवृतिज्ञानेभ्यः । ' तस्य पुनखं नियमः भुम्यक्षपुद्गलोत्क्रान्तं नष्टाजातं न वेत्ति तत् ॥ भूस्यतिक्रान्तं न जानातीति । अधरध्यानभुमिकेनोत्तर-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ध्यानभूमिकमिन्द्रियातिक्रान्तं न जानाति ॥ श्रद्धाधिमूक्तसमयविमुक्तमार्गेण दृष्टिप्राप्तासमयविमुक्तमार्गं पुद्गलोत्क्रान्तं न जानाति । अनागाम्यर्हत्प्रत्येकबुद्ध बुद्धमार्गाणामधरेणोत्तरं नष्टाजातं न जानाति । अतीतानागतं वर्तमानपरचित्तचैत्तविषयत्वात् ॥ किं च भूयः – न धर्मान्वयधीपक्ष्यमन्योऽन्यम्, धर्मज्ञानपक्ष्यं परचित्तज्ञानमन्वयज्ञानपक्ष्यं चित्तं न जानाति, अन्वयज्ञानपक्ष्यं च धर्मज्ञानपक्ष्यं न जानाति, कामधातूर्ध्वधातुप्रतिक्ष्यालम्बनत्वात् तयोः । दर्शनमार्गे परचित्तज्ञानं नास्ति । तदालम्बनं त्वस्ति । तत्र परचित्तज्ञानेत्त दर्शनमार्गं ज्ञानुकामः प्रयोगंकृत्वा प्रथमौ दर्शनक्षणौं । श्रावकोवेत्ति खड्गस्त्रीन् सर्वान् बुद्धोऽप्रयोगतः ॥ श्रावको दर्शनमार्गात् परचित्तज्ञानेन द्वौ क्षणौ जानाति । दुःखे धर्मज्ञानक्षान्तिम्, धर्मज्ञानं चः, अन्वयज्ञानपक्षालम्बनस्यान्यप्रयोगसाध्यत्वात् । यावच्च स तत्र प्रयोगमारभते, तावदयं षोडसचित्तमनुप्राप्तो भवतीत्यन्तरा न जानाति । प्रक्येकबुद्धस्त्रीन् क्षणान् । प्रथमौ च द्वावष्टनं च समूदयान्वयज्ञानम्, मूदुप्रयोगत्वात् । प्रथम द्वितीयपञ्चदशानित्यपरे । बुद्धस्तू सर्वानेव दर्शनमार्गक्षणानप्रयोगेण जानाति ॥ अथ क्षयज्ञानानुत्पादज्ञानयोः को विशेष ? क्षयज्ञानं हि सत्येषु परिज्ञातादिनिश्चयः । न परिज्ञेयमित्यादिरनूत्पादनमतिर्मता ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कथमनाश्रवेण ज्ञानमैवं जानाति ? तत्पृष्ठब्धेन व्युत्थित एवं जानाति । अतस्तद्विशेषेण तयोर्विशेषः । शास्त्रे ज्ञापित इति कश्मिराः । अनाश्रवेणाप्येवं जानातीत्यपरे । दर्शनवचनं तु भाष्याक्षेपात् । प्रत्यक्ष-वृत्तित्वाद्वा । अत एवोक्तम्–"यत् तावत् ज्ञानं दर्शनमपि तत्" इति ।

इत्येतानि दशज्ञानाति भवन्ति यदुत धर्मज्ञानम्, अन्वयज्ञानम्, संवृत्तिज्ञानम्, दुःखज्ञानम्, समूदयज्ञानम्, निरोधज्ञानम्, मार्गज्ञानम्, परचित्तज्ञानम्, ज्ञयज्ञानम्, अनुत्पादज्ञान्न च ।

तत्र संवृतिज्ञानमेकं ज्ञानेकस्य च भागः धर्मज्ञान-मेकं ज्ञानं सप्तान्प्र च भागो दुःखसमूदयनिरोध-मार्गक्षयानूत्पादकपरचित्तज्ञाननाम् । एवमन्वयज्ञानम् । दुःखज्ञानमेकं ज्ञानंचतुर्णां च भागो धर्मान्वयक्षयानुत्पा-दिज्ञानानाम् । एवं समूदयनिरोधज्ञाने चतुर्णां भागः । मार्गज्ञानेकं ज्ञान्न पञ्चानां च भागो चतुर्णामनत्रोक्ता-नाम् परिचित्तस्य च । परचित्तज्ञानमेकं ज्ञानं चतुर्णां च भागो धर्मात्वयमार्ग संवृतिज्ञानानाम् । क्षयज्ञान-मेकं ज्ञानं षण्णा च भागो धर्मान्वयदुःखसमूदयनिरोध-मार्गज्ञानानाम् । एवमनूत्पादज्ञानम् ।[१५१]

---

१५१. अ.ध.को.भा.२ पृ. १०३३ — १०४२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९४. पञ्च ज्ञानानि । तद्यथा–आदर्शज्ञानम्, समताज्ञानम्, प्रत्यवेक्षणाज्ञानम्, कृत्यानुष्ठानज्ञानम्, सुविशुद्धधर्मधातुज्ञानं चेति ॥

विचित्रज्ञेयचक्रप्रतिबिम्बत्वात् स एवादर्शनम् । अपदादीनामेकतमत्वात् स एवं समताज्ञानम् । स एवं विवृतप्रविचयात् प्रत्यवेक्षणाज्ञानम् । जगदर्थस्य तत एव प्रवृत्ते स एव कृत्यानुष्ठानज्ञानम् । धर्मतारुपत्वाद्धर्मधातुज्ञानमसाविति ।[१५२]

९५. द्वे सत्ये । तद्यथा–संवृतिसत्यम्, परमार्थसत्यं चेति ॥

प्रथमं संवृतिसत्यं, द्वितीयं परमार्थसत्यं चेति ।[१५३]

यथा च युक्त्यागमाभ्यां विचारयतः अविपरीतवस्तुतत्त्वप्रविचयः समुपजायते, तदुपदर्शयितुं सत्यद्वयव्यवस्थामाह[१५४]-

संवृत्तिः परमार्थश्च सत्यद्वयमिदं मतम् ।
बुद्धेरगोचरस्तत्त्वं बुद्धिः संवृतिरुच्यते ॥

---

१५२. व.ति.टी. पृ. ८५–८५
१५३. से.टी. पृ. ७१
१५४. बो.च. पृ. २६७–२६८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संव्रियते आव्रियते यथाभूतपरिज्ञानं स्वभावावरणादावृतप्रकाशनाच्च अनयेति संवृतिः । अविद्या, मोहः, विपर्यास इति पर्यायाः । अविद्या हि असत्पदार्थस्वरूपारोपिका स्वभावदर्शनावरणात्मिका च सती संवृतिरुपपद्यते । यदुक्तमार्यशालिस्तम्बसूत्रे–

पुनरपरमे–तेत्त्वेऽप्रतिपत्तिः मिथ्याप्रतिपत्तिः, अज्ञानमविद्या । इति ।

उक्तं च–

"अभुतं ख्यापयत्यर्थं भूतमावृत्य वर्तते ।
अविद्या जायमानैव कामलातङ्कवृत्तिवत्" ॥ इति ।

तदुपदर्शितं च प्रीत्यसमुत्पन्नं वस्तुरूपं संवृतिरुच्यते । तदेव लोकसंवृतिसत्यमित्यभिधीयते लोकस्यैव संवृत्या तत् सत्यमिति कृत्वा ।

यदुक्तम्–

"मोहः स्वभावावरणाद्धि संवृतिः
सत्यं तया ख्याति यदेव कृत्रिमम् ।
जगाद तत्संवृतिसत्यमित्यसौ मुनिः
पदार्थं कृतकं च संवृतिम्" ॥ इति ।

सा च संवृतिर्द्विविधा–लोकत एव तथ्यसंवृतिर्मिथ्यासंवृतिश्चेति । तथा हि किञ्चित् प्रतीत्यजातं नीलादिकं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वस्तुरूपमदोषवदिन्द्रियैरुपलब्धं लोकत एव सत्यम्, मायामरीचिप्रतिबिम्बादिषु प्रतीत्य समुपजातमपि दोषवदिन्द्रियोपलब्धं यथास्वं तीर्थिकसिद्धान्तपरिकल्पितं च लोकत एव मिथ्या । तदुक्तम्–

"विनोपघातेन यदिन्द्रियाणां
षण्णामपि ग्राह्यमवैति लोकः ।
सत्यं हि तल्लोकत एवं शेषं
विकल्पितं लोकत एव मिथ्या" ॥ इति ।

एतत्तदुभयमपि सम्यग्दृशामार्याणां मृषा, परमार्थदशायां संवृतिसत्यालीकत्वात् । एतत् समनन्तरमेव उपपत्त्या प्रतिपादयिष्यामः । तस्माद विद्यावतां वस्तुस्वभावो न प्रतिभासते इति ।

परमः उत्तमः अर्थः परमार्थः, अकृत्रिमं वस्तुरूपम्, यदधिगमात् सर्वावृतिवासनानुसन्धिक्लेशप्रहाणं भवति । सर्वधर्माणां निःस्वभावता, शून्यता, तथता, भूतकोटिः, धर्मधातुरित्यादिपर्यायाः । सर्वस्य हि प्रतीत्यसमुत्पन्नस्य पदार्थस्य निःस्वभावता पारमार्थिकं रूपम्, यथाप्रतिभासं सांवृतस्यानुपपन्नत्वात् । तथा हि– न तावत् यथापरिदृश्यमानरूपेण सत्स्वभावो भावः, तस्य उत्तरकालमनवस्थानात्, स्वभावस्य च सर्वदा अनागन्तुकतया अविचलितरूपत्वात् । यो हि यस्यं स्वभावः, स कथं कदाचिदपि निवर्तेत । अन्यथा तस्य स्वभावताहानिप्रसङ्गान्निःस्वभा-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वतैव स्यात् । नापि स उत्पद्यमानः सत्स्वभावरूपेण कुतश्चिदागच्छति, निरुध्यमानो वा क्वचित् सन्निचयं गच्छति, अपि तु हेतुप्रत्ययसामग्रीं प्रतीत्य मायावशादुत्पद्यते, तद्वैकल्यतो निरुध्यते च । हेतुप्रत्ययसामग्रीं प्रतीत्य जातस्य परायत्तात्मलाभस्य प्रतिबिम्बस्येव कुतः सत्स्वभावता ! न च कस्यचित् पदार्थस्य परमार्थतो हेतुप्रत्ययसामग्रीतः समुत्पत्तिः सम्भवति, तस्या अपि अपरसामग्रीजनितात्मतया परायत्तात्मलाभाया निःस्वभावत्वात् । एवमन्यस्याः पूर्वपूर्वायाः स्वस्वकारणसामग्रीजन्यतया निःस्वभावता द्रष्टव्या । इत्थं कारणानुरूपं कार्यमिच्छता कथं निःस्वभावात् सस्वभावस्योत्पत्तिरभ्युपेतव्या ! यद्वक्ष्यति–

"मायया निर्मितं यच्च हेतुभिर्यच्च निर्मितम् । आयाति तत्कुतः कुत्र याति चेति निरूप्यताम् ॥ यदन्यसन्निधानेन दृष्टं न तदभावतः । प्रतिबम्बसमे तस्मिन् कृत्रिमे सत्यता कथम्?"॥ इति ।

उक्तं च–

"यः प्रत्ययैर्जायति स ह्यजातो
न यस्य उत्पादु सभावतोऽस्ति ।
यः प्रत्ययाधीनु स शून्य उक्तो
यः शून्यतां जानति सोऽप्रमत्तः" ॥ इति ॥[१५५]

---

१५५. बो.च. पृ. २६६–२६८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९६. चतुरार्यसत्येषु षोडश क्षान्ति ज्ञानलक्षणाः।
तद्यथा-दुःखे धर्मज्ञानक्षान्तिः दुःखे धर्मज्ञानम्,
दुःखेऽन्वयज्ञानक्षान्तिः, दुःखेऽन्वयज्ञानम् ।
समुदये धर्मज्ञानक्षान्तिः, समुदये धर्मज्ञानम्,
समुदयेऽन्वयज्ञानक्षान्तिः, समुदयेऽन्वयज्ञानम् ।
निरोधे धर्मज्ञानक्षान्तिः, निरोधे धर्मज्ञानम्,
निरोधेऽन्वयज्ञानक्षान्तिः, निरोधेऽन्वयज्ञानम् ।
मार्गे धर्मज्ञानक्षान्तिः मार्ग धर्मज्ञानम्, मार्गे-ऽन्वयज्ञानक्षान्तिः, मार्गेऽन्वयज्ञानं चेति ।

दुखं कतमत् । दुःखसत्यम् । दुःखे धर्मः कतमः । दुःखसत्याधिपतेयः शासनधर्मः ॥ धर्मज्ञानं कतमत् । प्रयोगमार्गे सत्याधिपतेयं धर्मविचारणाज्ञानम् । ज्ञान-क्षान्तिः कतमा। पूर्वाधिपतिबलविचारणामुपादाय प्रत्यात्मं दुःखसत्ये प्रत्यक्षानुभाविनी अनास्रवा प्रज्ञा । यया प्रज्ञया दुःखदर्शनप्रहातव्यान् सर्वक्लेशान् प्रजहाति । तस्मादुच्यते दुःखे धर्मज्ञानक्षान्तिरिति । दुःखे धर्मज्ञानं कतमत्। क्षान्त्यनन्तरं येन ज्ञानेन पुर्वोक्तेभ्यः क्लेशे-भ्यो विमुक्तिं साक्षात्करोति । तस्मादुच्यते दुःखे धर्मज्ञानमिति ॥ दुःखे अन्वयज्ञानशान्तिः कतमा । दुःखे धर्मज्ञानक्षान्त्यां दुःखे धर्मज्ञाने च प्रत्यात्मं प्रत्यक्षानुभाविनी अनाश्रव प्रज्ञा उत्पद्यते यदुत्तरमन्वय एष आर्यधर्माणाम् । तस्मादुच्यते दुःखे अन्वयज्ञान-क्षान्तिः। दुःखे अन्वयज्ञानं कतमत् । तदनन्तरमनास्रवं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानमुत्पद्यते । येन ज्ञानेन दुःखे अन्वयज्ञानक्षान्ति-मुपधारयति । तद् दुःखेऽन्वयज्ञानमित्युच्यते ॥ तद्वदन्येषु सत्येषु यथायोग्यम् ॥ [१५६]

९७. तत्र दुःखसत्ये चत्वार आकाराः । तद्यथा-अनित्यतः, दुःखतः, शून्यतः, अनात्मत-श्चेति ॥

दुःखलक्षणं कतमत् । तिस्त्रो दुःखताः अष्टाका वा दुःखं षडाकारं वा दुःखं बाहुल्येन पूर्वमुक्तं तद् दुःखं नाम । किं प्रतीत्यसूत्रे उक्तं यदनित्वं तद् दुःख-मिति । उभयांशिकीमनित्यतां प्रतीत्य दुःखलक्षणं प्रज्ञायते । उत्पादांशिकीमनित्यतां प्रतीत्य दुःखदुःखता प्रजायते । व्ययांशिकीमनित्यता प्रतीत्य विपरिणाम दुःखता प्रज्ञायते । उभयांशीकिमनित्यतां प्रतीत्य संस्का-रदुःखता प्रज्ञायते ॥ तथा च संस्कारानित्यतां संस्कार-विपरिणामतां च संथायोक्तं भगवता मया यत्किंचिद् वेदितमिदमत्र दुःखेस्येति ॥ अपि खलु उत्पादव्यय-धर्मद्वयानुगतेषु संस्कारेषु जात्यादयोऽष्टौ दुःखानि प्रज्ञायन्ते इत्यभिसंघाय बुद्धेन भाषितं यदनित्यं तद् दुःखमिति । अपि च अनित्येषु संस्कारेषु जात्यादिकं दुःखं प्रज्ञायते इति अनित्यतो दुःखं न सर्वे संस्कारा इत्यत्राधिसन्धिर्वेदितव्यः ॥

---

१५६. अ.ध.स. पृ. ६६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri.

शून्यतालक्षणं कतमत् । तेषु तस्य अभावः । अनेन नयेन समनुपश्यना शून्यता । पुनः तेषु अन्यस्य भावः । अनेन नयेन यथाभूतज्ञानभावः । एतद वतार-शून्यतोच्यते । यथाभूतज्ञानमविपरीतोऽर्थः ॥ तेषु अभावः कतमः । स्कन्धधात्वायतनेषु नित्यध्रुवकूटस्थाविपरिणाम-धर्मात्मात्मीयाभावः । अनेन नयेन तेषां शून्यता ॥ तेषु अन्यस्य भावः कतमः । तेष्वेव नैरात्म्यम् । तच्च आत्मनो नास्तिता अनात्मनोऽस्तिता सती शून्यता ॥ एतदभिसंधायोक्तं भगवता सतो यथाभूतज्ञानं भावः । असतो यथाभूतज्ञानमभावः । अपि खलु त्रिविधा शून्यता। स्वभावशून्यता तथाभावशून्यता प्रकृतिशून्यता च । आद्या परिकल्पिता द्रष्टव्या । तृतीया परि-निष्पन्नस्वभाव द्रष्टव्या ॥

अनात्मलक्षणं कतमत् । यथाऽत्मवादे स्थितस्य आत्मलक्षणस्य स्कन्धधात्वायतनेषु तल्लक्षणस्याभावः । स्कन्धधात्वायतनेषु आत्मलक्षणाभावतामुपादाय । इदमु-च्यते अनात्मलक्षणम् । एतदभिसंधायोक्तं भगवता सर्वे धर्मा अनात्मान इति ॥ अपि चोक्तं भगवता नैतत् सर्वं मम नैषोऽहमस्मि न मे स आत्मा इति । एवमेतं यथाभूतं संप्रज्ञाय द्रष्टव्यम् इति तस्य कोऽर्थ उक्तः । बहिर्धावस्त्वभिसंधायोक्तं नैतत् सर्व ममेति । कुत एतत् बहिर्धावस्तुनि कल्पितात्मांयलक्षणम् । अतः आत्मीयनिष्कर्षणम् । अध्यात्मवस्तुनि परिकल्पितात्मा-त्मीयलक्षणम् । अत आत्मात्मीयोभयनिष्कर्षणम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पूर्वमुक्तम् अनित्यं क्षणलक्षणमिति तत् कथं ज्ञायते । यथा चित्तचैतसिकानां क्षणिकता तथा रूपादीनामपि क्षणिकता द्रष्टव्या । चित्तोपात्ततामुपादाय चित्तैकयोगक्षेमतामुपादाय चित्तविकारतद्विकारतामुपादाय चित्ताश्रयतामुपादाय चित्ताधिपत्यसंभूततामुपादाय चित्तवशवर्त्तिनां चोपादाय ॥ अपि खलु अत्यन्तविकारोपलब्धितामुपादाय उत्पन्नस्य चानपेक्ष्य प्रत्ययं स्वरसविनाशितामुपादाय रूपस्यापि क्षणिकता द्रष्ठव्या ॥[१५७]

९८. समुदयसत्ये चत्वार आकाराः । तद्यथा-
हेतुतः,समुदयतः, प्रभवतः, प्रत्ययतश्चेति॥

तथा च समुदयसत्य समासतो लक्षणप्रभेदेन चतुर्विधम् । हेतुलक्षणं समुदयलक्षणं प्रभवलक्षणं प्रत्ययलक्षणं च । हेतुलक्षणं कतमत् । पुनर्भववासनाया आहारकं कारणं हेतुरिति हेतुलक्षणं वेदितव्यम् ॥ समुदयलक्षणं कतमत् । तेषां तेषामुपचितवासनानां सत्त्वानां तस्मिंस्तस्मिन् सत्त्वनिकाये उदयस्य कारणमिति समुदयलक्षणं वेदितव्यम् ॥ प्रभवलक्षणं कतमत् । प्रत्यात्मं सन्तानानां सर्वप्रकारप्रकर्षोद्भवस्य कारणमिति प्रभवलक्षणंवेदितव्यम्॥ प्रत्ययलक्षणं कतमत् । सत्त्वानामन्यान्यप्राप्त्यत्ययकारणमिति प्रत्ययकारणं वेदितव्यम् ॥[१५८]

---

१५७. अ.ध.स. पृ. ३९ - ४१
१५८. " " पृ. ६१ - ६२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९९. निरोधसत्ये चत्वार आकाराः । तद्यथा- निरोधतः, शान्ततः, प्रणीततः, निःसरणत- श्चेति ।

तथा च निरोधसत्यस्य समासतश्चत्वारो लक्षण-प्रभेदाः । निरोधलक्षणं शान्तलक्षणं प्रणीतलक्षणं निःसरणलक्षणं च । किमुपादाय निरोधलक्षणम् । क्लेशविसंयोगतामुपादाय ॥ किमुपादाय शान्तलक्षणम् । दुःखविसंयोगतामुपादाय । किमुपादाय प्रणीतलक्षणम् । सुखशुच्यधिष्ठानतामुपादाय । किमुपादाय निःसरणलक्षणम् । नित्यहिताधिष्ठानतामुपादाय ॥[१५९]

१००. मार्गसत्ये चत्वार आकाराः । तद्यथा- मार्गतः, न्यायतः, प्रतिपत्तितः, नैयाणिक- तश्चेति ।

तथा च मार्गसत्यस्य चत्वारः प्रकारभेदाः । मार्गलक्षणं न्यायलक्षणं प्रतिपद्लक्षणं नैर्याणिकलक्षणं च ॥ किमुपादाय मार्गलक्षणम् । तत्त्वार्थपरिमार्गणतामुपादाय ॥ किमुपादाय न्यायलक्षणम् । क्लेशप्रतिपक्षतामुपादाय ॥ किमुपादाय प्रतिपल्लक्षणम् । चित्ताविपर्यासप्रतिपादनतामुपादाय ॥ किमुपादाय नैर्याणिकलक्षणम् । नित्यपदयानतामुपादाय ॥[१६०]

बद्रीरत्नकृत भाष्योपेतः नागार्जुनपाद विरचित धर्मसंग्रहः प्रथमो भागः समाप्तः ॥

---

१५९. अ.ध.स. पृ. ६५
१६०. " " पृ. ७७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

परिशिष्ट

धर्मसंग्रह विषय वर्णानुक्रमणिका पृष्ठ

अ

अशीत्यनुव्यञ्जनानि १८९
अष्टादश धातवः ४८
अष्टादशावेणिका बुद्धधर्माः १७४
अष्टौ बोधिसत्वाः २०
अष्टौ लोकधर्माः १३०
अष्टौ लोकपालाः १५
अष्टौ विमोक्षाः १२६
अष्टाविंशतिविध शब्दः ६९

आ

आर्याष्टाङ्गिकमार्गः ९०

ए

एकादश स्प्रष्टव्यानि ७०

ग

गतयः षट् १२२

च

चक्रवर्तिनां सप्त रत्नानि १९३
चतस्रः प्रतिसंविदः १००
चतस्रो देव्यः ८
चतस्रो धारण्यः १०१
चत्वार्यार्यसत्यानि ३७
चत्वारः ऋद्धिपादाः ८५
चत्वारः कल्पाः १९९
चत्वारो गन्धाः ७०
चत्वारो ब्रह्मविहाराः २५
चत्वारो योनयः २०१
चत्वारो लोकपालाः १४
चत्वारि धर्मपदानि १०५
चत्वारि ध्यानानि १६७
चत्वारि प्रतिशरणानि १०३
चत्वारो माराः १७६
चत्वारि युगानि २००
चत्वारि वैशारद्यानि १७१
चत्वारि सम्यक्प्रहाणानि ८४
चत्वारि संग्रहवस्तूनि ३३
चत्वारि श्रद्धाङ्गानि १७७
चित्तसंप्रयुक्तसंस्काराःश्चत्वारिंशत ५५
चतुर्दश लोकपालाः १७
चतुरार्यसत्येषु षोडश क्षान्ति ज्ञानलक्षणाः ११२
चतुर्विंशतिरुपक्लेशाः १६१

त

तथागतस्य दश बलानि १७१
तत्र दुःखसत्ये चत्वार आकाराः २१३
तत्र रूपं विषयस्वभावम् ६८
तत्र चित्तविप्रयुक्तसंस्कारास्त्रयोदश ६३
तत्र त्रयोध्वानः १९९
तत्रैकादश रूपस्कन्धाः ५०

द

दश क्रोधाः १८
दश पारमिताः ३०
दश भूमयः १३५
दश लोकपालाः १७
दश ज्ञानानि २०७
दशाकुशलानि ११०
द्वादश धूतगुणाः १३४
द्वादशाङ्गप्रतीत्यसमुत्पादः ७५
द्वादशायतनानि ४७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

द्वात्रिंशल्लक्षाणि १७९
द्वे सत्ये २०८

न

नवाङ्गप्रवचननानि १३०
नवानुपूर्वसमाधिसमापत्तय: १७८
निरोधसत्ये चत्वार आकारा: २१६

प

पञ्च कषाया: २०३
पञ्च चक्षूंषि १५६
पञ्च दृष्टय १६०
पञ्च वलानि ८८
पञ्च बुद्धा: ७
पञ्च भयानि १६७
पञ्च भौतिकानि ७१
पञ्च महाभूतानि ७१
पञ्च मात्सर्याणि १७४
पञ्चरक्षा ९
पञ्च स्कन्धा: ४२
पञ्च ज्ञानानि २०८
पञ्चानन्तर्याणि १२९
पञ्चाभिज्ञा: ३५
पञ्चाहारा: १६७
पञ्चेन्द्रियाणि ८६

व

वोधिसत्वानां दश वशिता: १७०
वोधिसत्वानां दश वलानि १७९

म

मार्गसत्यै चत्वार आकारा: २१६

र

रस षड्विध: ७०

ल

लोकद्वयम् २००
लोकोत्तरपञ्चस्कन्धा: ४३

व

वेदना त्रिविधा ५३
विंशति: शून्यता ७२

ष

षट् क्लेशा: १५७
षट् पारमिता: २७
षड् धातव: १२३
षडनुस्मृतय: १०५
षड्योगिन्य: २१
षड् विषया: ६८

स

सप्त तथागता: १२
सप्त वोध्यङ्गानि ८९
सप्तविधा अनुत्तरपूजा २२
सप्तत्रिंशद्वोधिपाक्षिका धर्मा: ८२
समुदयसत्ये चत्वार आकारा: २१५
स्मृत्युपस्थानानि ८३
संज्ञास्कन्ध: ५४
संस्कारा द्विविधा: ५४

त्र

त्रय: सत्वाध्या: २०४
त्रयोदश भूमय: १५६
त्रयो विमोक्षा: ६९
त्रीणि कुशलमूलानि २४
त्रीणि यानानि ५
त्रीणि रत्नाणि १
त्रीण्यसंस्कृतानि ६५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सन्दर्भग्रन्थ सूची

१. साम्ताणी, नारायणेन हेमदानस (सं.), अर्थविनिश्चयसूत्रम् (पाटलिपुत्र : काशी प्रसादजायसवाल – अनुशीलनसंस्थानम्, २०२७)

२. शास्त्री, द्वारिकादास (सं), आचार्य वसुबन्धुविरचितम् अभिधर्मकोशम् प्रथमो भाग (वारणसी : बौद्ध भारती, १९८१)

३. शास्त्री, द्वारिकादास (सं.), आचार्यवसुबन्धुविरचित्तम् अभिधर्मकोशम् द्वितियो भाग (वारणसी : बौद्ध भारती, १०८१)

४. दत्त, नलिनाक्ष (सं.), बोधिसत्वभूमिः (पाटलिपुत्र, काशीप्रसाद जायसवाल अनुशीलनसंस्थानं, २०४३)

५. शुक्ला, करुणेश (सं.), श्रावकभूमि(आर्यसङ्ककृतिः) (पाटलिपुत्रः काशीप्रसाद जयसवाल अनुशीलसंस्थान, २०३०)

६. शुक्ला, करुणेश (सं.), आचार्यासङ्गरचिता श्रावकभूमिः (द्वितीयो भागः) (पटनः काशीप्रसाद जायसवाल अनुशीलन संस्थान, २०४७)

७. नेगी, रमेशचन्द्र (सं.), अतीशविरचिता एकादशग्रन्थाः (वाराणसी : केन्द्रीय उच्च तिब्वती शिक्षा संस्थान, १९९२)

८. टाटिया, नथमल (सं.), अभिधर्म समुच्चयभाष्यम (पाटलिपुत्र : काशीप्रसाद जायसवाल अनुशीलनसंस्था, २०३३)

९. वैद्य, पि.एल. (सं.), ललित विस्तरः (दरभङ्गा : मिथिला विद्यापीठ, २०४४) (सं. श्रीधर त्रिपाठी, द्वितीय संसकरण)

१०. वैद्य, पि.एल. (सं.), सद्धधर्मलक्तावतारसूत्रम् (दरभङ्गाः मिथिला-विद्यापीठ, २०२०)

११. वैद्य, पि.एल. (सं.), शान्तिदेवरचितः शिक्षा-समुच्चयः (दरभङ्गा : मिथिला-विद्यापीठ, २०१६)

१२. वैद्य, पि.एल. (सं.), सद्धर्मपुण्डरीकसूत्रम् (दरभङ्गा : मिथिला-विद्यापीठ, २०१६)

१३. द्विवेदी, बजवल्लभ र शाशनी, ठिनलेराम (सं.), बौद्ध तन्त्र कोश (वाराणसी : दुर्लभ बौद्ध ग्रन्थ शोध योजना केन्द्रीय उच्च तिब्वती शिक्षा संस्थान, १९९०)

१४. पाण्डे, जनार्दन शास्त्री (सं.), बौद्धस्तोत्रसंग्रहः (दिल्लीः मोतिलाल बनारसीदास, १९९४)

१५. शाशनी, ठिनलेराम (सं.), बौद्धतन्त्र कोश (भाग-२) (वाराणसी : दुर्लभ बौद्ध ग्रन्थ शोध योजना केन्द्रीय उच्च तिब्वती शिक्षा संस्थान, १९९७)

१६. रिनपोछे, सम्दोङ्ग र
द्विवेदी, वजवल्लभ (सं.), बसन्ततिलका (वाराणसी : दुर्लभ बौद्ध ग्रन्थशोध योजना केन्द्रीय उच्च तिब्वती शिक्षा संस्थान, १९९०)

१७. चक्रवर्ति, चिन्ताहरण (सं.), आचार्य चन्द्रकीर्तिकृत गुह्यसमाजतन्त्र

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रदीपोद्योतनटीकाषट्कोटित्याख्या (पाटलिपुत्रः काशी प्रसाद जायसवाल अनुशीलन संस्था, १९८४)

१८. शास्त्री, द्वारिकादास (सं.), श्रीगह्यसमाजतन्त्रम् (वाराणसी : बौद्ध भारतीय, २०४१)

१९. ओक, कृष्णजी गोविन्द (सं.), अमरकोश (दिल्ली : भारत भारतीय भंडार, १९९३)

२०. भट्टाचार्य, वेनोयतोष (सं.), महापण्डित श्रीमदभयाकरणगुप्तविरचिता निष्पन्न-योगावली (बारोदाः ओरियन्टल इष्टिच्यूट, १९७२)

२१. भट्टाचार्य, वेनोतोष (सं.), साधनमाला भाग १ र भाग २ (वारोदा : ओरियन्टल इष्टिच्यूट, १९६८)

२२. वेनर्जी, विश्वनाथ (सं.), श्री कालचक्रतन्त्रराजम् (कलिकाताः दि ऋसियाटिक् सोसाइटी, १९८५)

२३. वैद्य, पि.एल. (सं.), दिव्यावदानम् (दरभङ्गा : मिथिलाविद्यापीठ, १९५९)

२४. शास्त्री, द्वारिकादास (सं.), आर्यशान्तिदेवविरचिता वोधिचर्यावतारः (वाराणसी : बौद्ध भारती, १९८८)

२५. शर्मा, कुलचन्द्र (टि), अमरकोश, विद्वद्व रामरसिंह विरचित : (काठमाडौं : नेपाल राजकीय प्रज्ञा-प्रतिष्ठान, २०२६)

२६. बज्राचार्य, दिव्य बज्र (अनु.), वोधिचर्यावतार (यल : बोधिप्रकाश केन्द्र, २०५३)

२७. वज्राचार्य, दिव्यवज्र (सं.), अद्वय परामार्थ नासङ्गीति (भूषण प्रकाशन – २)

२८. वज्राचार्य, दिव्यवज्र (सं.), धर्मसंग्रह कोष (पकनाजोल : हेमवज्र वज्राचार्य, २०३६)

२९. वज्राचार्य, अमोघवज्र (सं.), सप्तवारपाठ पुस्तकम् (पकनाजोल : अमोघवज्र वज्राचार्य, १०९६)

३०. वज्राचार्य, वज्रीरत्न (सं.), नागार्जुनपादविरचिता धर्मसंग्रह (काठमाडौंः बज्राचार्य संरक्षण गुठी, ११४)

३१. बज्राचार्य, बद्रीरत्न (सं.), न्याधा बौद्ध पुजा विधि (यें, अष्टमान महर्जन, १११३)

३२. बज्राचार्य, बज्रीरत्न (सं.), महायज्ञ विधान (यें: भाइरत्न बज्राचार्य, १११६)

३३. बज्राचार्य, बद्रीरत्न (सं.), आयुर्यतारा पुजा विधि (येंः, हीरारत्न बज्राचार्य, २०५३)

३४. कुलिशवंशं, धर्महर्ष (सं.) बौद्ध स्तोत्र संग्रह

३५. (सेकोद्देशटीका)

३६. तत्वज्ञानसंसिद्धिः महासुख प्रकाशिका(टिकासहिता) (येंः, धर्मोदय सभा, २०१३)

३७. भट्टाचार्य,श्री तारानाथतर्कवाचस्पति ,वाचस्पत्यम् (तृतीय भाग), (वाराणसी :चौखम्वा संस्कृत सीरीज अफिस ,१९९०)

३८. माधवरामात्मज राजपण्डित वंशीधरकृत, मानसागरी पद्धति (कल्याण-वंवई , गङ्गा विष्णु श्री कृष्णदास स्टीम प्रेस ,१९८६)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संकेत सूची

अ.वि.सू. = अर्थविनिश्चयसूत्रम्

अ.को. = अमरकोष

बौ.त.को.भा.१ = वौद्ध तन्त्र कोष भाग १

वि.प्र. = विमलप्रभा

अ.व्र.वि.(पा.) = अष्टमी व्रत विधि (पाण्डुलिपि)

बो.भू. = वोधिसत्वभूमि:

बौ.स्तो.सं. १ = वौद्ध स्तोत्र संग्रह १ सं. धर्महर्ष

गु.त. = आचार्य चन्द्रकीर्तिकृता गुह्यसमाजतन्त्र

नि.यो. = निष्पन्नयोगावली

का.त. = श्री कालचक्रतन्त्रराजम्

न्या.बौ.पू.वि. = न्याधा वौद्ध पूजा विधि

बौ.स्तो.सं.२ = बौद्ध स्तोत्र संग्रह (सं. जनार्दन शास्त्री)

म.य.वि. = महायज्ञ विधान

स.पु. = सप्तवार पुस्तकम्

ता.पू.वि. = आर्यतारा पूजा विधि

आ.अ.स. = आर्य अमोघपाश लोकेश्वर समाधि

व.स.(पा.) = बज्रवाराही समाधि (पाण्डुलिपि)

ज्ञा.त. = ज्ञानोदयतन्त्रम्

सा.मा.भा.१ = साधनमाला भाग १

सा.मा.भा.२ = साधनमाला भाग २

ध.को. = धर्मसंग्रह कोष

त.ज्ञा.सं.म.प्र. = तत्व ज्ञानसंसिद्धि महासुख प्रकाशिका

ल.सू. = सद्धर्म लंकावतारसूत्र

श्रा.भू.भा.१ = आर्यसङ्गकृति श्रावकभूमि भाग १

श्रा.भू.भा.२ = आर्यसङ्गकृति श्रावकभूमि भाग २

अ.ध.को.भा.१=आचार्यवसुबन्धु विरचित्तम् अभिधर्मकोष भाग १

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अ.ध.को.भा.२=आचार्यवसुवन्धु विरचित्तम् अभिधर्मकोष भाग २

अ.ध.स. = अभिधर्मसमुच्चय

ध.सं.को. = धर्मसंग्रह कोष

म.सू.सं.भा.१. = महायानसूत्र संग्रह भाग १

म.सू.सं.भा.२. = महायानसूत्र संग्रह भाग २

अ.ए. = अतिशविरचिता एकादशग्रन्था

द.भू.सू. = दशभूमिकसूत्र

शि.स. = शान्तिदेवविरचित: शिक्षासमुच्चय

दि.अ. = दिव्यावदान

अ.प्र. = अष्टस्राहश्रीका प्रज्ञापारमिता

वो.भू. = बोधिसत्वभूमि

अ.प्र.(टीका) = अष्टस्राहश्रीका प्रज्ञापारमिता (टीका)

ल.वि. = ललितविस्तर

मा.प. = मानसागरीपद्धति

वा.भा.३ = वाचस्पत्यम् भाग ३

सं.त. = संवरोदयतन्त्र

व.ति.(टी.) = वसन्ततिलका टिका

से.टी. = सेकोद्देशटिका

बो.च. = बोधिचर्यावतार

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सम्पादकज्यूको छोटो चिनारी

श्रद्धेय गुरु डा. नरेश मान वज्राचार्य वि.सं. २०२३ मा जन्मनु भएको थियो । उहाँले कलिलै उमेरमा श्रद्धेय पूज्य गुरुवर पं. श्री वद्रीरत्न वज्राचार्यबाट बौद्ध क्रिया विधि (कर्मकाण्डमा) प्रशिक्षण एवं थुप्रै उच्च अभिषेक, योगादि प्राप्त गर्नु भएको थियो । श्रद्धेय पूज्य गुरुवर पं. श्री दिव्यवज्र वज्राचार्यबाट बौद्ध दर्शन अध्ययन गर्नुभएको थियो । तत्पश्चात् दिल्ली विश्वविद्यालय, भारतबाट बौद्ध अध्ययनमा स्नातकोत्तर, कलानिष्णान्त र विद्यावारिधि उपाधि हासिल गर्नु भयो ।

सर्व प्रथम नेपालमा बौद्ध दर्शन अध्यापनको व्यवस्थाको औचित्य माथि महेन्द्र संस्कृत विश्वविद्यालयमा कार्य पत्र प्रस्तुत गरि सोहि विश्वविद्यालयमा बौद्ध दर्शन अध्यापन कार्य थाल्नु भयो । केहि वर्ष पछि त्रिभुवन विश्वविद्यालयमा स्नातकोत्तर डिप्लोमा तहमा बौद्ध अध्ययन विभागको संस्थापक-प्रमुख पनि भई शैक्षिक कार्यक्रम सफलतापूर्वक संचालन गर्दै बौद्ध अध्ययन विभागको संस्थापक-प्रमुख हुनु भयो । पुनः छोटो समयमै बौद्ध अध्ययन केन्द्रीय विभागको संस्थापक-प्रमुख भई नेपालमा बौद्ध अध्ययन विषयको जगलाई मजबुत पार्नु भयो ।

लुम्बिनी बौद्ध विश्वविद्यालय मूल तयारी समितिको सदस्य-सचिव समेत हुनु भई लुम्बिनी बौद्ध विश्वविद्यालय स्थापना कार्यमा एक प्रमुख भुमिका निर्वाह गर्नु हुने श्रद्धेय गुरु डा. वज्राचार्यले आधा दर्जन भन्दा बढि पुस्तकहरू र कयौं अनुसन्धानात्मक लेखका रचनाकार हुनु हुन्छ । राष्ट्रिय-अन्तरराष्ट्रिय गोष्ठि एवं विश्वविद्यालयमा कार्यपत्र प्रस्तुत एवं अध्यापनकार्य गर्नुको अलावा नेपालमण्डलको बौद्ध धर्म संस्कृति आदिलाई संरक्षण, संबर्द्धन र सुधारकार्य गर्न तथा समाजमुखी बनाउने उद्देश्यले केहि संस्थाहरूको स्थापना पनि गर्नुभएको छ ।

त्रिरत्न प्रकाशन

About the editor

Rev. Guru Dr. Naresh Man Bajracharya was born in Kathmandu in 1965A.D. His Buddhist education began at an early age under the tutelage of most revered Gurus. He received training on various Buddhist rituals as well as higher consecrations and Yoga practices from Guru Badriratna Bajracharya and Buddhist philosophy from Guru Divyavajra Bajracharya. He obtained M.A., M.Phil. and Ph.D. degrees on Buddhism from Delhi University, India.

At the outset, Dr. Bajracharya presented a paper on the necessity of teaching Buddhist philosophy in the University in Nepal and embarked on his teaching career in the Mahendra Samskrit University. Later he became the founder coordinator of the Post Graduate Diploma in Buddhist Studies course in Tribhuvan University, Nepal. He was the founder head of the Department and Central Department of Buddhist Studies in the University. As the Member Secretary of the Lumbini Buddhist University Preparatory Committee he has played a leading role in the establishment of the University. He has laid a firm foundation of Buddhist Studies in Nepal.

Dr. Bajracharya is well known as the author of more than half dozen books and numerous learned research works. His contribution in seminar and workshops and teaching in Nepal and abroad are well received. He is making incredible efforts in the preservation, improvement and social uplift of Buddhism of Nepal Mandala for which he has also founded some organizations.

ISBN 99946-57-59-3

Tri-Ratna Publication

9 799994 657598

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal